चित्रकाव्यम्

CHITHRAKĀVYAM

श्री. उ. वे. शुण्डपालयम् तिरुमलै रामभद्राचारियर्

SRI. U.VE. SUNDAPALAYAM TIRUMALAI RAMABADRACHARIAR

F O R E W O R D

I deem myself fortunate in being asked to write this Foreword to the *Citrakāvya* composed by Sri U.Ve. Sundapalayam Tirumalai Ramabhadrachariar (AD 1840-1904), a great scholarly poet who was born in Sundapalayam near Coimbatore. He was proficient in Music and Astrology as well. He was the disciple of H.H. Sri Periyāṇḍavan Svāmī of Srirangam. His important Sankrit works *Hayagrīvamaṇitrayamālikā, Saṅgatiratnamālikā, Uḍurāśidaśaka* and the *Citrakāvya,* the present publication, show him as a poet of a very high order. Being an ardent Srīvaiṣṇava following the Vaḍagalai tradition, he brought out the tenets of the Viśiṣṭādvaita Philosophy also in his works. The present composition has two Parts: the first Part consisting of 400 verses, has 24 different varieties of literary puzzles, riddles and conundrums such as *Praśnottaram* (where the question itself forms the answer), *Uttarapraśna* (where the reply itself becomes the question), *Bhāṣādvayottaram* (where the world forming the reply is the same in Sanskrit and other language – Tamil, Kannada and Telugu) and such interesting features, which are food for thought and immense delight for those who know the subtle twists and shades, nuances and niceties of the incredibly rich Sanskrit language. Undoubtedly a study of the present work will improve one's vocabulary in Sanskrit, equip one with worldly knowledge and amazing powers for quick repartee and for enlightening scholarly audiences (sabhārañjana). One remarkable feature about this composition is that nowhere the author appears to have strained himself. The words are all simple and straightforward. There are no out-of-the way, laboriously worked out and abstruse usages. This is certainly a great characteristic of a mahākavi. Of special interest is the tenth section called "Sūtrapraśna' where the answer for specific questions constitute grammatical aphorisms of Pāṇini. Verse no. 67 may be cited as an illustration:

Narakaḥ kasyāḥ sūnuḥ? (Whose son was Naraka?)

Ke vā kurvanti dānam arthibhyaḥ? (Who carry out acts of charity for the needy?)

Pāṇinisūtreṇaikena (With one aphorism of Pāṇini)

Uttarayugmaṁ sudhībhir iha vācyam (both the answers should be given by the wise)

The single answer that applies to both the questions is : "bhuvaḥ prabhavaḥ". There are two words in this answer, which mean, "Of the Earth" and "the lords", respectively. Incidentally this is an aphorism of Pāṇini (I. iv. 31) which means "the source of the agent of the verb 'bhū' (to become) is called Apādāna." Unless one is a scholar and serious student of Sanskrit Grammer, one cannot answer these questions or enjoy the beauty of this verse.

One instance for the *Bhāṣādvayottaram*-kind of puzzle (v.52) may also be cited:

Kiṁ tṛṣṇāśamanaṃ ? (What is it that quenches thirst ?)

Kiṁ kṛtvā badhyate kacaḥ ? (By doing what, one knots the hair?)

Girvāṇadrāviḍoktibhyāṃ (Using Sanskrit and Tamil words)

Ekamevottaram vada (Reply in a single word)



The answer is: "vāri". This, in Sanskrit, means "water" and it forms the reply to the first question. It is also a Tamil word meaning "combing" and it forms the answer to the second question.

The second Part of this work is devoted to the more difficult and mind-boggling genre of composition called the Bandha (complicated pictorial structures). The poet has given here 100 such Bandhas classifying them as "The five weapons of Lord Nārāyaṇa (5), Chakra varieties (7), Mantra-varieties (4), Bhogopakaraṇa types (11), Senāṅga-types (6), Weapon-types (10), Gomūtrikā-bandha varieties (7), Sarpa-bandhas (7), Padma-bandhas (17), and Saṅkīrṇa-types (26)". One saving feature of this difficult variety of composition is that the author himself has given important clues and brief elucidation of all these varieties. It is a pity that the author's notes for verses 301 to 400 forming Part I are missing, so much so that an ordinary person may find it difficult to understand the meaning of this part of the work.

Now it may be worthwhile to make some observations about the difficult *Citrakāvya* in this context. Normally Figures of Speech (*Alaṁkāras*) are used by poets to embellish their compositions. These are twofold as Arthālaṁkāras (Figures of Speech of Sense) such as Simile, Metaphor, Hyperbole, Pun etc., and Śabdālaṁkāras (Figures of Speech of Sound) such as Alliteration and Yamaka. Great critics like Ānandavardhana (author of the *Dhvanyāloka*) have cautioned poets not to resort to the "cheap" varieties of Śabdālaṁkāras like Alliteration (Anuprāsa) and the much more difficult and complicated Śabdālaṁkāra like the *Yamaka* (See our author's *Citrakāvya*, vv. 385 to 400). The reason for such a warning is quite simple: One will be tempted to sacrifice sense for the sake of sound. Further, dificult permutations and combinations of words and syllables distract the poet from the main Sentiment (*rasa*) to be delineated. Rasa or Sentiment is the very life of Poetry and anything that brings in a break in the experience of the Sentiment is detrimental to the very purpose of composing a poem. A much more dreaded variety of Śabdacitra is the Bandha-type. The verses are composed in such a way that when the letters are arranged in a particular order, a "picotiral diagram" would emerge, resembling a drum, a lotus, an arrow, a palanquin, a conch, a discus, a club, etc. Composing the Citra-types is a very difficult art. Even accomplished poets will have to rack their brains to compose such verses. If that is the difficulty in composing such verses, imagine the difficulty faced by an ordinary reader who knows a little Sanskrit of course! One has to depend upon commentaries and lexicons to understand the meaning of a single verse. Sometimes it may take even an hour or so in understanding a verse!

Well, what happens then to the Sentiment which is the very life of the given poem? It will be completely cut off from the mainstream, so much so that such a composition becomes mere "acrobatics" or "gymnastics" in "sound". This no doubt reflects the amazing intellectual powers of the poet but it makes no sense to the man with an eye on the Rasa. But with all this said and understood, great poets still show their interest in composing such Citra-type of verses. We know that the great Kālidāsa tried his hand at the Yamaka in his *Raghuvaṁśa* (Canto IX). Bhāravi in his *Kirātārjunīya*, and Māgha in his *Śiśupālavadha* (Canto XIX) and Vedānta Deśika in his *Pādukāsahasra* (Paddhati XXX) have shown their skill in composing difficult varieties of Bandhas. Why? These difficult



varieties on one hand fit in the context of a given Poem such as the description of a hunting expedition or combats, in keeping with the *Vira-rasa,* or the amazing glory (*vaicitrya*) of a particular person or thing. So their is not much of "impropriety" (*anaucitya*) or "a break in the enjoyment of the chief Sentiment" (*rasa-bhaṅga*). So the advice or caution given by Ānandavardhana is only for ordinary poets or those who want to become poets. Once they start composing the Bandha-type, they are sure to be carried away by that trend and may find it difficult to come out of its "clutches". Our poet Sri Ramabhadrachariar also belongs to the order of Mahākavis like Māgha and Deśika and his only intention in composing the Citrakāvya and especially the second Part comprising the Bandha-kāvya was to show people that he too could try his hand at this difficult variety of composition. That our poet who lived in the recent past could also rank with other Mahākavis in composing this difficult composition is a matter of great satisfaction to all his admirers, followers, lovers and connoisseurs of Sanskrit poetry.

In these days when people spend their time doing a variety of things, a very useful and ennobling pastime-of course for those who know Sanskrit - is going through this Citrakāvya of Sri Ramabhadracharya. There is no doubt that the number of such people will be very limited. Even then the merits of the present work cannot be discounted or underrated. There are, and will still be men and women of taste who will be able to read this work and derive happiness along with knowledge.

Now, my special congratulations and appreciation go to Prof. K. Sampath, who, along with his late-lamented brother Sri. P.K. Srinivasan, unearthed the works of Sri Ramabhadracharya Svami as a "labour of love" and has accomplished the glorious task of publishing this work, which I am sure, is his *magnum opus*. May the tribe of such selfless men of refined taste increase!

M. Narasimhachary

Prof. M. NARASIMHACHARY
Department of Vaishnavism,
University of Madras,.



हरिः ओम्

श्रीरस्तु

।। चित्रकाव्यम् ।।

परिच्छेदद्वयात्मकम् रसिकजनमनोरञ्जनाय
श्रीमत्श्रीनिवासयतीन्द्रमहादेशिककटाक्षलब्ध -
सत्ताकेन शुण्डपालयापरनामधेयगोपालपुरवासिना
तिरूमलै रामभद्राचार्येण विरचितं तदीय -
सङ्ग्रहव्याख्यासहितं विजयतेतराम् ।

नन्दन संवत्सरं 1892 वृश्चिकमासम् ।

CHITRAKAVYAM

Sri. U.Ve. Sundapalayam Thirumalai Ramabhadrachari

Critically translitrated by
P.K. Srinivasan B.Sc., Retd. Asst. General Manager Telephones
Son of P.V. Krishnaswamy Iyengar,
Karthik Flats, 27/3 , Nallappan Street,
Mylapore, Chennai 600 004. INDIA

1998

H. H. SRIMAD PERIANDAVAN SRINIVASA MAHADESIKAN
SRIRANGAM

श्रीरस्तु

।। चित्रकाव्यम् ।।

विषयसूची (Contents)

		Page
विनय विज्ञप्तिः		1

प्रथमपरिच्छेदः

प्रकरणम् संख्या		
1	मंगलम्	2
2	तन्त्रोत्तरम्	3
3	व्याससमासोत्तरम्	4
4	अन्तर्लापि-बहिर्लापिक्रमः	7
5	उत्तरप्रश्नक्रमः	9
6	प्रश्नोत्तरम्	10
7	चित्रोत्तरम्	10
8	भाषाद्वयोत्तरम्	11
9	प्रतिलोमानुलोमोत्तरम्	11
10	सूत्रप्रश्नः	12
11	अव्यक्तवचनम्	14
12	अक्षरविन्याससरसम्	19
13	साधर्म्यम्	23
14	भाषान्तरभ्रमः	24
15	शब्दगूढम्	27

16	अर्थगूढम्	33
17	भावगूढम्	36
18	शास्त्रप्रमेयम्	38
19	अन्यापदेश:	46
20	सामान्य चाटुश्लोका:	49
21	समस्या	–
22	अनुप्रासादिकम्	65
23	निरोष्ठयादिकम्	67
24	यमकम्	70

द्वितीयपरिच्छेद:

1	पञ्चायुध बन्धा:	73
2	चक्र बन्धा:	78
3	मन्त्र बन्धा:	84
4	भोगोपकरण बन्धा:	87
5	सेनाङ्ग बन्धा:	97
6	आयुध बन्धा:	103
7	गोमूत्रिका बन्धा:	112
8	सर्प बन्धा:	119
9	पद्म बन्धा:	126
10	सङ्कीर्ण बन्धा:	143

व्याख्या प्रारम्भ: द्वितीयस्य परिच्छेदस्य श्लोकानां तत्र तत्रैव व्याख्यात् प्रायत्वात् प्रथम परिच्छेदीय कठिन श्लोकार्थ: शृङ्गग्राहिकया क्रमेणोच्यते ॥

श्रीरस्तु

।। चित्रकाव्यम् ।।

विषयसूची (Contents)

		Page
विनय विज्ञप्तिः		1

प्रथमपरिच्छेदः

प्रकरणम् संख्या		
1	मंगलम्	2
2	तन्त्रोत्तरम्	3
3	व्याससमासोत्तरम्	4
4	अन्तर्लापि-बहिर्लापिक्रमः	7
5	उत्तरप्रश्नक्रमः	9
6	प्रश्नोत्तरम्	10
7	चित्रोत्तरम्	10
8	भाषाद्वयोत्तरम्	11
9	प्रतिलोमानुलोमोत्तरम्	11
10	सूत्रप्रश्नः	12
11	अव्यक्तवचनम्	14
12	अक्षरविन्याससरसम्	19
13	साधर्म्यम्	23
14	भाषान्तरभ्रमः	24
15	शब्दगूढम्	27

H. H. SRIMUSHNAM SRIMAD ANDAVAN
RANGARAMANUJA MAHADESIKAN, SRIRANGAM

Srimathe Rangaramanuja Mahadesikaya Namaha
Srimathe Srinivasa Ramanuja Mahadesikaya Namaha
Srimathe Vedantha Ramanuja Mahadesikaya Namaha
Srimathe Ranganatha Mahadesikaya Namaha

Srimathe Srinivasa Mahadesikaya Namaha
Srimathe Nigamantha Mahadesikaya Namaha
Srimathe Baghawathe Bashyakaraya Mahadesikaya
Sri Ranganatha Divyamani Padukabyam Namaha

SRIRANGAM
SRIMAD ANDAVAN ASHRAMAM

H.Qrs. Melur Road, Srirangam, Tiruchirappalli
Phone : 0431- 432379

Camp : Chennai
Date : 24.06.2000.

श्रीमते रङ्गरामनुज महादेशिकाय नाम:
श्री रामभद्र कवि प्रणीत चित्र काव्यस्य विमर्शनानन्तरं श्रीमत्परमहंसेत्यादि
श्रीमदाण्डवन् स्वामिचरणानामादेशाद्धनुसारेणसादरं सश्लाघं समर्पिता

अभिन्दन पत्रिका

चित्र बद्ध चित्त भद्रै चित्रैरेवं विचित्रित: ।
विचित्रौऽपिच सचित्र स्यर्ववर्णैर्युताऽपि ह ॥ (1)
यज्ञवाट जनि जानि निबद्धं विज्ञमोद कर मज्ञयु रूहम् ।
नाभिजात रमणी रमणीयं चित्रकाव्यमति मात्र विचित्रम् ॥ (2)
सर्वो बन्धो दु:ख मूलं सदेति शास्त्रे लोके सुप्रसिद्धं किलैतत् ।
सर्वैर्बन्धैर्ग्रन्थ रत्नेऽत्र लब्धै: मोमुह्यन्ते भाकुका मोदभाज: ॥ (3)
रसव्यंग्य भिन्नं चमत्कार पुर्ण स्वलङ्कारजातं विशेषेण शाब्दम् ।
अनुप्रास मुख्यं सदाश्लिष्ट शब्दं लसत्यत्र काव्ये बहुग्रन्थि बद्धे ॥ (4)
कर्तारं तत्क्रियां कर्म मार्गमाणा बुभुत्सव: ।
श्लोकेषु पर्यटन्त्यत्र लोके दार्शनिका इव ॥ (5)
आचार्य रत्न दृष्ट: ग्रन्थोऽयं रामभद्र कवि सृष्ट: ।
वैचित्र्य मुग्ध विबुध: विलसतु विद्वद्गणै: कृतश्लाघ: ॥ (6)

इत्यहं,
आचार्यादेशानुसारी,
डॉ. नरसिंहराघव:
श्रीकार्यम्

श्रीरस्तु

विनय — विज्ञप्तिः

श्रीरामभद्रकविशेखरनिर्मिता या
धीरादृता जयति पञ्चशतीति चित्रा ।
सा राममातुलकृतिर्हरतात्प्रमोहं
घोरान्तरं गजमिव त्वरितं मृगेन्द्रः ॥ 1 ॥

भागद्वयात्मकमिदं हि न नामसंख्यैः
श्लोकैरुपेतमतिचारुविचित्रबन्धैः ।
चित्रोत्तरादिमपदार्थसुभावगूढैः
वेगैर्युतं प्रकरणैर्जयतीह काव्यम् ॥ 2 ॥

धीदं मृदुमतिभीदं रामकवीशाननिर्मितं हीदम् ।
विजयति हतबहुखेदं विरचितमोदं धुतामृतास्वादम् ॥ 3 ॥



हरिः ओम्

चित्रकाव्यम्

प्रथमपरिच्छेदः

प्रथमप्रकरणम् - मंगलम्

वन्दे वाञ्छितदानैकदीक्षितौ दिव्यदम्पती ।

अन्योन्येच्छाविभक्तात्मगुणौ लक्ष्मीचतुर्भुजौ ॥ 1 ॥

व्याख्या-वन्द इति । अन्योन्येत्यादि - सर्वज्ञत्वसर्वशक्तत्वाद्युभय-साधारणगुणानां पुंसत्व-स्त्री-दण्डधरत्व-पुरूषकारत्वादि-तत्तन्नियत गुणानाञ्च तदुभयेच्छासिद्धत्वमिति भावः ।

स्तोकेतराद्भुतदयादिगुणाम्बुराशिं राकेन्दुसुन्दरमुखं रमणीयरूपम् ।

नाकेशमुख्यसुरवन्दितपादपद्मं काकोदरेशगिरिनायकमाश्रयेऽहम् ॥ 2 ॥

प्रपद्ये जानकीनाथं प्रपन्नार्तिहरं प्रभुम् ।

यदङ्घ्रिरेणुश्श्वसुरो गौतमस्य मुनेरभूत् ॥ 3 ॥

जीयात् गुरुवेङ्कटनाथघण्टादिव्यावतारस्स हि रंगराजः ।

यः पादुकां पंचषनाडिकासु पद्यैस्सहस्त्रेण परिश्चकार ॥ 4 ॥

कुर्वे चित्रमयं काव्यं रामभद्रस्सतां मुदे ।

गुणज्ञा यदि दोषोऽत्र क्षन्तुमर्हन्ति पण्डिताः ॥ 5 ॥



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

द्वितीयप्रकरणं - तन्त्रोत्तरम्

ग्रीष्मे तु कीदृशी कुल्या कीदृशी च कुलाङ्गना ।
प्रश्नयोरुभयोरेकं वाच्यमुत्तरमञ्जसा ॥ 6 ॥
व्याख्या - ग्रीष्म इति । अपापा इत्युत्तरम् । अपां समूहः आपम् ।
अपगतम् आपं यस्यास्सा अपापेति । पापरहितेति च ।

वृक्षालिः कीदृशी च्छायां न करोति च शूलिन : ।
पत्नी का प्रश्नयोरेकं विदुषा वाच्यमुत्तरम् ॥ 7 ॥
वृक्षालिरिति - अपर्णेत्युत्तरं ज्ञेयं ।

कदाचिदप्यविश्वास्याः के वा ग्रीष्मे तु कीदृशः ।
नदीप्रवाहो वक्तव्यं प्रश्नयोरेकमुत्तरम् ॥ 8 ॥
कदाचिदिति-अरय इत्युत्तरम् । शात्रवः । वेगरहितः ।

नित्यवस्तुगुणः कीदृक् के पान्ति मधु पुष्पगम् ।
प्रश्नयोरनयोरेकं बुधैर्वक्तव्यमुत्तरम् ॥ 9 ॥
नित्येति - अलय इत्युत्तरम् । नाशरहितः । ळळयोरभेदात् अळयः भ्रमरा इति च ।

के वा सर्वात्मना रक्ष्याः को दुर्ब्राह्मण उच्यते ।
एकमेवोत्तरं देयं प्रश्नयोरुभयोरपि ॥ 10 ॥
केवेति - असव इत्युत्तरम् । प्राणाः । यज्ञशून्यः ।

कीदृशी वा पुष्करिणी संसृतिः कीदृशी भवेत् ।
भो भो महान्तो वदत प्रश्नयोरेकमुत्तरम् ॥ 11 ॥
कीदृशीति - सतामरसा इत्युत्तरम् । तामरससहिता । सताम् अरसा रागरहिता ।

कीदृशो भवति पुण्यवान् मृतः कीदृशश्च न भवेदुमापतिः ।
गृध्रराडपि च कीदृशो वने वालिसूनुमुखवानरादृतः ॥ 12 ॥
कीदृश इति - अविराजविरोधिभूषित इत्युत्तरम् । अविराजानां पर्वतश्रेष्ठानां विरोधी - इन्द्रः तद्भूः स्वर्गः -



तत्र उषितः। विराजः गरूडः तद्विरोधिनः सर्पाः - तैः भूषितो न भवति इति अविराजविरोधिभूषितः। गृध्रराट् - सम्पातिः। अविराजविरोधी सूर्यचन्द्र विरोधी विन्ध्यपर्वतः तद्भुवि - तत्प्रदेशे उषितः। सीतान्वेषण काल इति ज्ञेयम्। (अविः - सूर्यः, पर्वतः। अवयश्शैलमेषार्का इत्यमरः।)

कीदृग्भूतो भवेद्रुद्रः कीदृशो न भवेदिति।
प्रश्नयोरनयोश्शीघ्रं एकमेवोत्तरं वद ॥ 13 ॥
कीदृगिति - अगजाननादर इत्युत्तरम्। अगजायाः उमायाः आनने आदरो यस्येति पूर्वत्र। गजानने आदरो न विद्यते यस्य सः अगजाननादर इत्युत्तरत्र।

तृतीयप्रकरणं - व्याससमासोत्तरम्

को वा ददाह स्मरमिन्द्रलूनपक्षश्च कः को हि दृशा श्रृणोति।
प्रश्नत्रयस्यैकपदेन वाच्यमत्रोत्तरं व्याससमासतस्तु ॥ 14 ॥
को वेति - उरग इत्युत्तरम्। उः-शंभुः, अगः-पर्वतः इति व्यासेन। उरगः- सर्प इति समासेन।

पक्षाभ्यां याति कः कोपमूलं किं कीदृशो यतिः।
प्रश्नानामुत्तरं ब्रूहि विराग इति तन्त्रतः ॥ 15 ॥
पक्षाभ्यामिति - विः, आगः, विराग इति स्पष्टमेव।

निर्मलं किं सरस्यास्ते कः शक्रच्छिन्नपक्षकः।
मुक्तासरादिभिर्हारैः भूषितो योषितां स्तनः ॥ 16 ॥
निर्मलमिति - पयोधर इत्युत्तरम्। पयः जलम्, धरः-पर्वतः, पयोधरः-स्तनः। स्त्रीस्तनाब्धौ पयोधराविति नानार्थरत्नमाला।

पक्षिलक्ष्म्यचला वाच्याः कथं कान् रिक्तता गता।
वसन्ते पुष्पिताः के स्युः कीदृशा यान्ति खेचराः ॥ 17 ॥
पक्षीति-विमानगा इत्युत्तरम्। विः मा, नगाः।
कानित्यादि-विमान् लक्ष्मीरहितानित्यर्थः। अगाः वृक्षाः। विमानेन गच्छन्तीति विमानगाः।

सतृषां किं प्रियं रुद्रश्वशुरः कश्च कीदृशः।
दरिद्रः कीदृशो विष्णुदेहो वारिधरोपमः ॥ 18 ॥
सतृषामिति-वारि, धरः, अपमः, वारिधरोपमः।



कामुद्दधार भगवान् किटिरूपतः का शुक्लन्तनोति कचमिन्दुसमं वदन्ति ।
किं वा समस्तकवयः प्रथमं कमेव नत्वा समस्तशुभकर्म समारभन्ते ॥ 19 ॥
कामिति-कुं जरा आननं - कुंजराननम् इति व्याससमासाभ्यां उत्तरम् अवधेयम् ।

का वा माता लोहिताङ्गस्य मोदात् के वा दत्ते राघवेणाऽङ्गदाय ।
कीदिक् जातस्तेन रामेण वाली मोहं प्राप्ता जानकी सा कुतश्च ॥ 20 ॥
का वेति-कुः, अङ्गदे-हतः इति व्यासेन । कुरङ्गदेहत इति समासेन । स्वर्णमृगरूपमारीचदेहत इत्यारण्यकाण्डकथा ज्ञेया । (अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः । केयूरमङ्गदं तुल्ये इत्यमरः । वैडूर्यमणिचित्रे च वज्ररत्नविभूषिते । वालिपुत्राय धृतिमान् अङ्गदायाङ्गदे ददौ । इति वालमीकिरामायणे)

का धीमतः कविमता कथमेणहूतिर्वासाय का कथय हृद्विकृतिः कुतास्स्यात् ।
कीदृक् सामज उचितो महतां क्रमेण धीरेण पूरित इतीह वदोत्तराणि ॥ 21 ॥
काधीति - धीः, एण, पूः, इतः - मन्मथादित्यर्थः इकारस्य मन्मथावाचकत्वात् । कीदृक् समाजः महतां उचितः धीरेण पूरितः विदुषा परिष्कृत इत्यर्थः। (हूतिराकारणाह्वानं इत्यमरः)

गात्रं मुख्यं किमथ तनये को हितार्थ्युग्रपत्नी का वा हृद्यं परभृतकुलं केन काले वसन्ते ।
प्रश्नानां त्वं कथय शकलैरूत्तरं कीदृशोऽगः पुष्पव्रातं वितरति वने कंपितो मारुतेन ॥ 22 ॥
गात्रमिति - कं, पिता, उमा, रुतेन इति पूर्वं पदच्छेदः । मारुतेन कंपितः अगः पुष्पव्रातं वितरति ।

मुनिन्त्रयाणां वर्णानां मेलने लेशमन्त्ययोः ।
प्रथमान्तिमयोर्ब्रूते पशून् पदमिदं वद ॥ 23 ॥
मुनिमिति - गालव इत्युत्तरम् । लवः, गावः, गालवः ।

रसन्त्रयाणां वर्णानां मेलने दन्तमन्त्ययोः ।
प्रथमान्तिमयोर्ब्रूते पदं पदमिदं वद ॥ 24 ॥
रसमिति - पारद इत्युत्तरम् । रदः, पादः, पारदः । (चपलो रसः सूतश्च पारदे इत्यमरः)

दैत्यवाचि त्रिभिर्वर्णैरन्त्याभ्यां नूत्नवाचकम् ।
आद्यान्त्याभ्यां वनाग्नेस्तु बोधकं तत्पदं वद ॥ 25 ॥
दैत्येति - दानव इत्युक्तरम् । नवः दावः दानवः ।



चतुर्णामपि वर्णानां मेलने हरिमाद्ययोः ।
दण्डमाद्यन्तयोर्ब्रूते करिणं तत्पदं वद ॥ 26 ॥
चतुर्णामिति - गदाग्रज इत्युत्तरम् । गदा-गजः गदाग्रजः ।

वर्णैश्चतुर्भिर्मधुजित्परं स्यात् अन्त्याक्षरद्वन्द्वत आह शंखम् ।
मध्यस्थवर्णद्वयतः प्रमोद - संबोधनं तत्पदमाशु वाच्यम् ॥ 27 ॥
वर्णैरिति - दामोदर इत्युत्तरम् । दरः मोद, दामोदरः ।

किञ्चिद्वर्णचतुष्टयात्मकपदं श्रीकण्ठवाच्यन्तिम - द्वन्द्वं चापि तमाह मध्ययुगळं चेत् प्रातिलोम्यादहो ।
तत्संबोधनमादिमान्त्यघटने मारं वदन्त्यादिमौ तत्संबोधनमाहतुः पदमिदं किं वा बुधैरूच्यताम् ॥ 28 ॥
किञ्चिदिति - स्मरहरः इत्युत्तरम् । अन्तिमद्वन्द्वं हर इति भागः । मध्ययुगळं रह इति भागः । सः प्रातिलोम्ये सति 'हर' संबोधनं वदति । आदिमान्त्यघटने स्मर इति भवति । आद्यद्वयं स्मर संबोधनं वदतीति ज्ञेयम् ।

निषेधवियदग्निधीजनकमक्षरैः केवलैः मुखान्तगतमेळने वदति मानवन्त्वन्त्ययोः ।
स्थितौ वदति रासभं वदत तत्पदं त्र्यक्षरं तृतीयसहितं न वा भवतु वाच्यभेदो न हि ॥ 29 ॥
निषेधेति - नखर इत्युत्तरम् । न-ख-र इति प्रत्येकाक्षरैः निषेध- आकाश-अग्निवाचक इत्यर्थः । मुखान्तगतमेळने आद्यन्त्ययोर्योगे नर इति भवति । अन्त्ययोः स्थितौ द्वितीयतृतीययोर्योगे खर इति भवति । तृतीयसहितमित्यादि - तृतीयाक्षररूपरेफाभावेऽपि 'नख' बोधकत्वात् वाच्यभेदो नास्तीति भावः ।

किञ्चिद्वर्णचतुष्टयात्मकपदं पङ्केरुहाक्षीं वदेत्
ब्रूते साक्षिणमादिमान्त्यघटने यद्वाऽन्त्ययोर्मेळने ।
मध्यस्ताक्षरयोस्तु मेलनवशात् भूमिं वदत्याद्ययोः
चेत्संबोधनकं बलस्य तु वदेत् किं तत्पदं पण्डिताः ॥ 30 ॥
किञ्चिदिति - सारसाक्षी इत्युत्तरम् । स्पष्टः अर्थः । (साक्षी, रसा, सार इति । भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरेत्यमरः)

भो भो यत्पदमादिमाक्षरयुगात् संख्यावतो वाचकं
द्वैतीयीक चतुर्थयोरपि पुनर्योगात्तमेवाह यत् ।
ब्रूते वर्णचतुष्टयादपि बुधश्रेष्ठं विनाद्येन चेत्
कैवर्तं प्रथमान्त्यमेलनवशात् दैवं हि तत् किं पदम् ॥ 31 ॥
भो भो इति - सुधीवर इत्युत्तरम् । अर्थः स्पष्टः ।



कं प्राप्ता कमला समाह्वय किटिं कस्मात् प्रदीपो लसन्
कस्माच्चक्रमरीह नाटककथाविच्छेदहेतुश्च कः ।
कोपघ्नं श्रयते भवेत्तु वदनं कस्मात् सुगन्धं फलं
कस्मात् बीजचयो ददात्यतिजवादंकोलतैलादरात् ॥ 32 ॥

कं प्राप्तेति - अंकोलतैलादरात् इति पदे । अम्, कोल, तैलात् अरात् (पुनः) अंकः, लता, एलादरात् इति पदच्छेदप्रकारो ज्ञेयः । बीजानामङ्कोलतैलसेके सति अतिशीघ्रमेव फलपर्यन्तविपाको जायत इति प्रसिद्धिः ।

चतुर्थप्रकरणम् अन्तर्लापि-बहिर्लापिक्रमः

अभाववाचकः कोऽयं उपसर्गो गुणत्रये मध्यमं किं दरिद्रस्य कथं सम्बोधनं मतम् ।
सुदृशां रमणीया का को रथाद्यङ्गमुच्यते नारायणः कथं भूतो नीरजोपमदृग्युगः ॥ 33 ॥

अभावेति - निः, रजः, अपम, दृक्, युगः इति पदच्छेदः । नीरजोपमदृग्युग इति श्लोक एव उक्तत्वात् अयं अन्तर्लापीत्युच्यते । एवमेव सर्वत्र ।

प्रातः कीदृशमम्बुजातमसुराः स्पर्धा हि यैः कुर्वते यैः कुम्भः क्रियते च यैस्सनियमैर्नित्यं तपश्चर्यते ।
यैर्द्धारं पिदधाति या रसगुणञ्जानाति तिक्तादिकं तत्प्रश्नोत्तरमध्यवर्णघटितो देवस्स पायात्प्रभुः ॥ 34 ॥

प्रातरिति - कमलानिवास इत्यर्थः । विकचं, अमरैः, कुलालैः, मुनिभिः, कवाटैः रसना । अयं बहिर्लापी ।

शम्भोस्सुन्दरनामकस्य मधुरापुर्यां प्रिया भाति का
को लक्ष्मीविषकामधेनुशशिनामुत्पत्तिभूरुच्यते ।
किं मुख्येन्द्रियमिन्द्रियेषु सकलेष्वाभाति चन्द्रेण का
यः प्रश्नोत्तरमध्यवर्णघटितः पायात्स नारायणः ॥ 35 ॥

शंभोरिति - मीनाक्षी, वाराशिः नयनं, क्षणदा । (नारायण इत्युत्तरः - अन्तर्लापी । निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपेत्यमरः)

सम्बुद्धिः कथमण्डजस्य दमवन्मर्त्यस्य चाधो दमं
तन्मूलं सकलं च सद्गुणचयं ह्युत्पादयत्यत्र का ।
अन्तेवासिजनाय तां सकरुणं दत्ते च कश्श्रीपतेः
घण्टाप्याप यदात्मतां स जयताद्वेदान्तविद्यागुरुः ॥ 36 ॥

सम्बुद्धिरिति - वे, दान्त, विद्या, गुरुः । वेदान्ताचार्यदेशिकस्य वेंङ्कटेशघण्टावतारत्वं इति प्रसिद्धिः ।



कामार्ता हि भजन्ति का विदुरथो किं वा वितर्केऽव्ययं
जम्भारिः कमवाप चैन्दवकला कं प्राप मोहाय का ।
आहुः कीदृशमोषधीशमुद्भूसम्बोधनं स्यात्कथं
योगी कीदृग पेक्षितं किमिहस्त्वाप्तोपदेशः कथम् ॥ 37 ॥

कामार्ता इति - रामानुजं भज यमीशम् इत्याप्तोपदेशः । पदच्छेदस्तु - रामाः, नु, जम्भजयं, ईशं इति प्रथमम् । मोहाय केत्यादि - राः स्वर्णं । मानुजं लक्ष्मीसहोदरम् इत्यर्थः । भज, यमी, शं - सुखम् इत्यर्थः । एवं द्वितीयावृत्तौ पदच्छेदोऽवगन्तव्यः ।

का बाणतनया को वा प्रसूनैर्जयति प्रजाः ।
प्रश्नोत्तराद्यवर्णाभ्यां घटिता पातु देवता ॥ 38 ॥

का बाणेति - उषा, मारः अनयोराद्यवर्णघटिता देवता उमा पात्वित्यर्थः ।

शब्दग्राहकमिन्द्रियं किमु भवेत् कः कुड्मळो भ्राजते
काभिर्वा शशलाञ्चनो जनमनस्तोषस्तु कस्मिन् सति ।
भक्तानां शरणं च कौ भगवतश्शिष्यो गुरौ कीदृशो
यः प्रश्नोत्तरमध्यवर्णघटितस्तं वै मुनीन्द्रं भजे ॥ 39 ॥

शब्देति - वकुळाभरण इति भावः । श्रवणं, मुकुळः, कळाभिः, पिभवे, चरणौ, प्रणतः । शठकोपमुनेः वकुळाभरण इति नामाऽवगन्तव्यम् ।

भोग्यं किं को विधत्ते कमलविकसनं वारि मुञ्चन्ति के वा
के कुर्वन्ति प्रजानामवनमवयवे किं प्रधानं वदन्ति ।
रामं का प्राप के वा विदधति च तपो याऽनुयोगोत्तराणां
आद्यैर्वर्णैर्भवेत् सा मम दिशतु शुभं क्षीरवाराशिजाता ॥ 40 ॥

भोग्यमिति - क्षीरं, रविः, वारिदा, राजानः, शिरः, जानकी, तापसाः - एतेषामाद्यक्षरघटने क्षीरवाराशिजाता इति भवति, सा शुभं दिशत्वित्यर्थः ।

कीदृग्भाति पयोनिधिः प्रतिदिनं कालत्रये ब्राह्मणै -
र्जप्या का महतां यशस्समुदयः कीदृग्बुधैः कथ्यते ।
मूले चास्त्यधिकाञ्चि कस्य स महान् कामाक्षिदेव्याः पति -
र्यः प्रश्नोत्तरपूर्ववर्णघटितः पायात् स गंगाधरः ॥ 41 ॥

कीदृगिति - गंगाधर इत्युत्तरम् । गंभीरः, गायत्री, धवलः, रसालस्य ।



पञ्चमप्रकरणम् - उत्तर प्रश्नक्रमः

राज्यमित्युत्तरं यत्र तत्र प्रश्नः कथं भवेत् ।
निधिजातञ्च कीदृक् स्यादिति प्रश्ने किमुत्तरम् ॥ 42 ॥
राज्यमिति-किन्नरेशगतम् ? इति प्रश्ने राज्यम् इत्युत्तरं स्यात् । स प्रश्न एव ''निधिजातं कीदृक् ?'' इति प्रश्नस्य उत्तरं भवेदिति अयम् उत्तर प्रश्नः । उत्तरं प्रश्नो भवतीति उत्तरप्रश्नः ।

गृध्रा इत्युत्तरं यत्र तत्र प्रश्नः कथं भवेत् ।
कीदृशाः पाण्डवाश्चेति प्रश्ने वा कीदृगुत्तरम् ॥ 43 ॥
गृध्रा इति-के शवप्रीतयः? इति प्रश्ने गृध्र इति उत्तरं स्यात् । स प्रश्न एव ''पाण्डवाः कीदृशाः ?'' इति प्रश्नस्य (केशव प्रीतयः) इति उत्तरम् ।

पूरुमित्युत्तरं यत्र तत्र प्रश्नस्तु कीदृशः ।
कस्मात् पुरा गजश्रेष्ठस्सरो नक्राकुलं ययौ ॥ 44 ॥
पूरुमिति - कञ्जरागात् (कं जरा अगात्?) इति प्रश्ने पूरुमित्युत्तरं भवेत् । कथमिति चेत् सर्वेषां जरा प्राप्तेः स्वाभाविकत्वेऽपि अकाले जरा प्राप्तिरत्रोच्यते । ययाति महराजस्य शुक्रशापप्राप्ता जरा तत्पुत्रेण पूरुणा अङ्गीकृतेति पौराणिकी कथा । तस्मात् कं जरा अगात् इति प्रश्ने पूरुमित्युत्तरं स्यात् । कञ्जरागात् इति स प्रश्न एव,''कस्मात् गजेन्द्रः नक्राक्रान्तं सरः प्राप इति प्रश्नस्य भगवदर्चनाय तामरसाशया ?'' प्रापेत्युत्तरं भवेत् ।

अङ्गमित्युत्तरं यत्र शरदाकाश इत्यपि ।
स्यात्प्रश्नस्स कथं को हि धिक्करोति गुरूनपि ॥ 45 ॥
अङ्गमिति - कोपघन (कः अपघनः ?) इति प्रश्ने - अपघनस्य शरीरवाचकत्वात् अङ्गमित्युत्तरं स्यात् । अपगताः घना यस्मात् इति व्युत्पत्या ''कोपघन'' इति प्रश्ने शरदाकाश इत्यप्युत्तरं स्यात् । स प्रश्न एव कोपेन घनः कोपघन इति व्युत्पत्या ''कः गुरूनपि धिक् करोति'' इति प्रश्नस्योत्तरं स्यात् ।

कस्स्रष्टा जगतां तस्य तातः कः कस्सुशीलवान् ।
कः कोद्रव इति प्रश्नोत्तरेणैवोत्तरं वद ॥ 46 ॥
कस्स्रष्टेति । कोद्रव इति - कोरदूषकनामकधान्यविशेषः - तस्मात् - ''कः कोद्रवः ?''इति पश्ने कोरदूषक इत्युत्तरं स्यात् । तदुत्तरं अन्यप्रश्नत्रयस्यापि, कः (ब्रह्मा),अः (विष्णुः) अदूषक इति पदच्छेदेन उत्तरत्रयात्मकं भवतीति भावः । (कोरदूषस्तु कोद्रव इत्यमरः)



खड्गः कमेति वृषभैर्भृशमूह्यते किं कीदृक् भवेत् कृपणजातमिति त्रयाणाम् ।
व्यासात् समासत इहोत्तरमस्तु सोऽयं प्रश्नस्सकोप इति यत्र सदुत्तरं स्यात् ॥ 47 ॥

खड्ग इति - कोशमिति प्रथमप्रश्नस्य । अन इति द्वितीय प्रश्नस्य । कोशे मनः यस्य तत् कोशमन इति समासेन तृतीय प्रश्नस्य उत्तरं भवेत् । तत् कोशमन इति पदमेव, कः अशमनः शान्तिरहितः इति व्युत्पत्या प्रश्नरूपं चेत् सकोप इति तत्रोत्तरं भवेदिति भावः । अनः शकटम् कोशः खड्गपिधानम् ।

षष्ठप्रकरणम् - प्रश्नोत्तरम्

का सारभूमिराभाति कोपेतस्साधुसंघतः ।
कोद्रवो धान्यभेदस्स्यात् कामार्तां बाधते शशी ॥ 48 ॥

कोपवादरतो लोके का व्याख्याता पदावलिः ।
पथि को याति वेगेन केन सृष्टमिदं जगत् ॥ 49 ॥

कासारेति - का सारभूमिरिति प्रश्नस्य कासारवती भूतिः कासारभूमिः इति । तदेवोत्तर स्यादिति प्रश्नोत्तरम् । साधुसङ्गात् कः अपेत इति प्रश्नस्य कोपेत इति तदेवोत्तरम् । एवमेवोत्तरत्रापि ज्ञेयम् । (मारुते वेधसि ब्रध्ने पुंसि कइ त्यमरः, केन चतुर्मुखेन)

सप्तमप्रकरणम् -चित्रोत्तरम्

कया सुधांशुराभाति केषु भाति च काळिमा ।
औदार्यं श्लाध्यते कस्य कयोः कङ्कणधारणम् ॥ 50 ॥

कयेति - कया इति प्रश्ने मध्ये लकारन्यासे कलया इति उत्तरम् । (एवमेव शे, र्ण, र अक्षरन्यासेन) केशेषु - कर्णस्य, करयोः इत्यवधेयम् ।

कामुकः कासु रमते कया वा राजते वरः ।
कञ्चिद्वर्णं निधायान्तः प्रश्नैरेवोत्तरं वद ॥ 51 ॥

कामुक इति-कासु - कान्तासु । कया-कन्यया । इत्थं प्रश्नवाचक-पदमध्ये कस्यचनाक्षरस्य निवेशे सति तदेवोत्तरं भवतीति चित्रोत्तरमिदमिति ज्ञेयम् ॥

अष्टमप्रकरणम् - भाषाद्वयोत्तरम्

किं तृष्णाशमनं स्त्रीभिः किं कृत्वा बध्यते कचः ।
गीर्वाणद्राविडोक्तिभ्यां एकमेवोत्तरं वद ॥ 52 ॥
किं तृष्णेति - वारि - गीर्वाणभाषया जलं । द्राविडभाषया वारि; (வாரி) कङ्कतादिना परिष्कृत्येत्यर्थः ।

सर्वप्राणिषु धीः कस्मिन् को वा मेषहरो मृगः ।
गीर्वाणद्राविडोक्तिभ्यां एकमेवोत्तरं वद ॥ 53 ॥
सर्वेति - भूमिस्थेषु नर-पशु-मृगादि-प्राणिषु विवेकरूपा धीः कुत्र ?
नरि-मनुष्य इत्यर्थः । द्राविड्या तु नरि (நரி) जम्बुक इत्यर्थः ।

आह्वयेत् यस्य पर्यायः कः कुत्र वलयस्थितिः ।
कर्नाटसंस्कृतोक्तिभ्यां एकमेवोत्तरं वद ॥ 54 ॥
आह्वयेति - कर्नाटभाषायां आह्वयेत्यर्थे करे इति शब्दः प्रयुज्यते । कङ्कणधारणं - करे -हस्ते ।

किमाचरति भृत्यः किं पञ्चमर्तौ तु बाधते ।
आन्ध्रद्राविडभाषाभ्यां एकमेवोत्तरं वद ॥ 55 ॥
किमिति-आन्ध्रभाषायां ''पनि'' कृत्यं इत्यर्थः । द्राविड्यान्तु ''पनि'' हिममित्यर्थः
एवं एकस्यैव पदस्य भाषाद्वयेन उत्तरद्वयरूपत्वात् इदं भाषाद्वयोत्तरम् ।

नवमप्रकरणम् - प्रतिलोमानुलोमोत्तरम्

कीदृशी विपिनाळिस्तु गायकाळिश्च कीदृशी ।
प्रतिलोमानुलोमाभ्याम् एकेनैव वदोत्तरम् ॥ 56 ॥
कीदृशीति-ताळरसा इत्युत्तरम् । प्रथम प्रश्नस्य सारलतेति प्रातिलोम्येन द्वितीयस्यानुलोमेन ।

मूर्ध्नि का धार्यते केशरम्यतां च ददति कः ।
प्रतिलोमानुलोमाभ्याम् एकेनैव वदोत्तरम् ॥ 57 ॥
मूर्ध्नीति - कालिमा इत्युत्तरम् । ळलयोरभेदः ज्ञेयः ।



केनाऽञ्जनातनयतामभजद्धनूमान् को मानवो युवतिसङ्गमपेक्षते कः ।
वक्तव्यमेकमनुलोमत उत्तरं स्यात् विद्वद्भिरुत्तरयुगं प्रतिलोमतस्तु ॥ 58 ॥
केनेति-वायुना इत्युत्तरम् । ना युवा प्रातिलोम्येन उत्तरद्वयं वाच्यम् ।

केकिसन्तोषहेतुः का रुद्रपत्न्यपि वाऽथ का ।
प्रतिलोमानुलोमाभ्यां एकरूपैवतां वद ॥ 59 ॥
केकीति-कालिका इत्युत्तरम् । प्रश्नद्वयस्याऽति प्रतिलोमानुलोमाभ्याम् एकरूपमेवेति बोध्यम् ।(मेघजाले च काळिका इत्यमरः)

वैवस्तपुरी सा तु कीदृशी पण्डितोत्तम ।
प्रतिलोमानुलोमाभ्याम् एकरूपं वदोत्तरम् ॥ 60 ॥
वैवस्वतेति-कालपालका इत्युत्तरं ज्ञेयम् ।

स्वासाधारणचिह्नस्य कथं सम्बोधनं हरेः ।
प्रतिलोमानुलोमाभ्याम् एकरूपं वदोत्तरम् ॥ 61 ॥
स्वासाधारणेति-कमलाललामक इत्युत्तरम् । कमला ललामं यस्य सः कमलाललामकः - भगवतः श्रीधरत्वस्यैवाऽसाधारणलक्षणत्वम् इति भावः (ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु इत्यमरः)

कविता कीदृशी रम्या पद्मसंबोधनं कथम् ।
प्रतिलोमानुलोमाभ्यां एकेनैव वदोत्तरे ॥ 62 ॥
कवितेति - सारसेति पदं प्रातिलोम्येन सरसा इति भूत्वा प्रथम प्रश्नस्य अत्तरम् । आनुलोम्येन तु सारसेति पद्मसंबोधनं वदतीत्यर्थः ।

दशमप्रकरणं - सूत्रप्रश्नः

भरतेन विनीतेन चित्रकूटाभिधे शुभे ।
पर्वते ०००००श्चरणे कमलारुणे
पाणिनीयेन सूत्रेण पूरणीयं बुधोत्तमैः ॥ 63 ॥
भरतेनेति - ''वन्दिते भ्रातुः'' इति सूत्रमभिप्रेतम् ।



सौदामिन्यां ००० भवेत् स्थैर्यमौष्ण्यञ्च तोये
शैत्यं तेजस्यतिमधुरता निम्बशाके कदाचित् ।
अम्भोजं खेप्यपि तु न घृणाघातुके जातुचित् स्यात्
पूर्णः कार्यः प्रथमचरणः पाणिनीयात्तु सूत्रात् ॥ 64 ॥
सौदामिन्यामिति - वयसि च इति सूत्रमभिप्रेतम् ।

०००००० यथा तथा वा पुरुषस्तिष्ठतु तावदुत्तमे चेत् ।
वयसित्वकृताघसाधुवृत्तः परमं पुरुषमेत्य मोदमीयात् ॥ 65 ॥
शून्यबिन्दुषट्कानन्तरं यथा तथेति । वयसि प्रथमे - इति सूत्रमभिप्रेतम् । उत्तमे चेत् वयसि साधुवृत्तः इति आप्त वाक्यमत्र प्रमाणतयाऽनुसन्धेयम् ।

कस्यां कवेः प्रथितता यमुनाग्रजः कः कस्मिन् नृणां तु विहिता नियमेन वृत्तिः ।
प्रश्नत्रयस्य विदुषोत्तरदानमेक - सूत्रेण पाणिनिमुनेः क्रमशस्तु कार्यम् ॥ 66 ॥
कस्यामिति - वाचियमोव्रते इति सूत्रम् । वाचि यमः व्रते इति पदच्छेदेन प्रश्नत्रयोत्तरं भवतीति अर्थः ।

नरकः कस्यास्सूनुः के वा कुर्वन्ति दानमर्थिभ्यः ।
पाणिनिसूत्रेणैकेनोत्तरयुग्मं सुधीभिरिह वाच्यम् ॥ 67 ॥
नरक इति - भुवः प्रभव इति सूत्रमभिप्रेतम् ।

यस्मिन् वर्णौ प्रथमचरमौ सङ्गतौ शासनार्थौ षष्ठं वर्णं यदि तु भजते यस्य वर्णस्तुरीयः ।
सम्पूर्णेन्दुं वदति महितं पर्वकालप्रभेदं तत् किं सूत्रं वदत तरसा पाणिनीयं बुधेन्द्राः ॥ 68 ॥
यस्मिन्निति - ''आकडारादेकासंज्ञा'' इति सूत्रम् । (आज्ञा-राका)

यस्मिन् पाणिनिकल्पिते तु चरमो वर्णो विरिञ्चिं वद - त्यर्थं पक्षिण इत्यमुं वदति यन्मध्याक्षरं तेन चेत् ।
आद्यं सङ्गतमक्षरं यदि खेरित्यर्थबोधो भवेत् तत्सूत्रं वदताऽऽशु भो बुधवरास्साहित्यपारङ्गताः ॥ 69 ॥
यस्मिन् पाणिनीति - अवेः क इति सूत्रमभिप्रेतम् ।

०००० अनुद्दिश्य ००००० यो द्विजः ।
०००० करुणया प्रसीदति न संशयः ।
पाणिनीयैस्त्रिभिस्सूत्रैः पूरणीयं स्थलत्रयम् ॥ 70 ॥
शून्यबिन्दुचतुष्कानन्तरं - अनुद्दिश्येति - प्रयोजनं -धर्मं चरति - तस्येश्वर इति सूत्रत्रयं क्रमशः स्थानत्रये निवेश्यम् । निवेशे श्लोकार्थः स्पष्टः ।



पशुहिंसैकफलकान्यागान् ००० योऽविधि ।
००००००००० यो व्याधः का तयोर्भिदा ।
सूत्राभ्यां पाणिनीयाभ्यां पूरणीयं स्थलद्वयम् ॥ 71 ॥
पश्विति-चरति, पक्षिमत्स्यमृगान् हन्ति-इति सूत्रद्वयं शून्यस्थानद्वये निवेशनीयम् ।

पशुमार्जारपञ्चास्यतुरगान् पाणिनिर्मुनिः ।
बबन्ध केन सूत्रेण तत्सूत्रं किं बुनोत्तमाः ॥ 72 ॥
पश्निवति-गोबिडालसिंहसैन्धवेषूपमान इति सूत्रमित्यर्थः ।

यथा लोके भूयो विरचितमहागस्यपि सुते
०००० भूत्वा गळितनिजकोपस्तमवति ।
तथैवाऽस्मान्नित्यं रचितबहुमन्तूनपि तथा
जगन्मात्रा लक्ष्म्या शमितरूडसौ ००० हरिः ॥ 73 ॥
यथा लोक इति । पिता मात्रा रक्षति इति सूत्रद्वयं स्थलद्वये निवेशितं चेत् श्लोकार्थः स्पष्टः ।

यस्याऽऽद्यवर्णोऽन्तिमवर्णभाक् चेत् पीनं वदन्त्यादिमवर्णभाक् चेत् ।
अन्त्याक्षरं वक्ति हि दीर्घिकां तत् सूत्रं चतुर्वणमरं वदन्तु ॥ 74 ॥
यस्येति-''पीलायावा'' इति सूत्रंम् अभिप्रेतम् । तत्र आद्याक्षरम् अन्त्याक्षरेण योजितश्चेत् - पीवा इति भवति । अन्त्याक्षरम् आद्याक्षरेण योजितंचेत् वापीति भवति ।

स हि श्रोत्रिय इत्येतत् वाक्यं चेद्यदपेक्षते ।
तद्वाक्यं पाणिनीयैकसूत्ररूपमिहोच्यताम् ॥ 75 ॥
स हीति - सोममर्हति य इति सूत्रमभिप्रेतम् । यस्सोमपानमर्हति स एव हि श्रोत्रिय इत्यर्थः ।

एकादशप्रकरणं - अव्यक्तवचनम् (புதிர்) (Riddle)

सिंहयुग्मान्तराळस्थं वस्तु लब्धुं विपश्चितः ।
यान्ति राजसभां ब्रूत किं तत् वस्तु बुधोत्तमाः ॥ 76 ॥
सिंहेति-तत् वस्तु कटकमित्यर्थः । मिथुनसिंहराशिमध्यस्थत्वात् कटकस्य - कटकशब्देनाऽत्र वलयम् उच्यते । वलयसन्मानार्थं विद्वांसः राजसभां यान्तीति अर्थः । सिंहद्वयमध्यस्थवस्तु लाभार्थं राजसभागमनं महासाहसम् असङ्गतं च पश्यतेत्यर्थान्तरमप्यवधेयम् ।



आद्याक्षरं भवेदाद्यं न पूर्वं मध्यमाक्षरम् ।
अन्तिमं भयमध्यस्थं स शब्दः कीदृशो वद ।
तन्न जानाति विद्वांश्चेत् अधमं तं वदाम्यहम् ॥ 77 ॥
आद्येति - आद्याक्षरम् अकारः । न पूर्वं - नकारपूर्वाक्षरं धकारः तत् मध्यमाक्षरम् । अन्तिमाक्षरं तु भयमध्यस्थं - भकारयकारमध्यस्थः मकार इत्यर्थः । एवं च अधम इति फलितम् । एवं यो जानाति स श्रेष्ठः । नो चेत् अधम इत्यर्थः । विद्वानपि एवं न जानाति चेत् तं शब्दं अधमं इति अहम् एव वदामि इति अर्थान्तरमपि अवधेयम् ।

काचिद्वेश्या निजे गेहे धनिकं कञ्चिदागतं स्वानुजैर्मर्दयित्वा च हृत्वा तत्स्वं समस्तकम् ।
बहिः क्षिपति तं कूपे पातयत्यथवा बलात् सा च का केऽनुजास्तस्याः धनिकस्स च को वद ॥ 78 ॥
काचिदिति-वेश्या-रसना, निजगेहं-वाक् धनिकः-रसवद्वस्तु, स्वानुजाः-दन्ताः । बहिः क्षिपति इक्षुखण्ड्यादिकं इति भावः । कूपे उदरे भक्ष्यादिकमित्यर्थः ।

यत्सनामाऽस्ति सेनाङ्गे भोग्यं स्यात्सकलं यतः ।
यन्नामास्त्यसुरः कश्चित् किं तत् वस्तु सखे वद ॥ 79 ॥
यदिति-लवणम् इत्यर्थः । सनामा सैन्धव इत्यर्थः । सैन्धवशब्दस्याऽश्ववाचकत्वात् यन्नामासुरः लवणासुरः । (सेनाङ्गे-रथगजतुरग)

अन्तस्थाद्यन्तयोगे किं वा धान्यं भवेत् वद । ?
यो वा ऊष्मान्तिमान्तस्थद्वितीयाभ्यां भवेत् स कः ॥ 80 ॥
अन्तस्थेति - यरलवाः अन्तस्थाः। तत्र आद्यन्ताक्षरयोगे यव इति धान्यभेदो भवतीत्यर्थः । शषसहाः ऊष्माणः । तदन्तिमहकारस्य अन्तस्थ - द्वितीयेन रेफेण योगे - हर इति भवतीत्यर्थः ।

पञ्चमप्रथमस्याऽपि तृतीयप्रथमस्य च ।
संयोगात् यत् भवेत् वस्तु तत् वस्तु त्वरितं वद ॥ 81 ॥
पञ्चमेति-पञ्चमवर्गः पवर्गः तृतीयवर्गः टवर्गः ट वर्णः । तयोः आद्यक्षरसंयोगे पट इति भवति ।

श्रूयतामवधानेन पाकेन व्यञ्जनं भवेत् ।
कान्तया वार्तया किं स्यान्नाऽवजानासि चेदितः ।
मूढत्वं तव निर्णेतुं बहुबीजं वदाम्यहम् ॥ 82 ॥
श्रूयतामिति-वार्ताकमित्यर्थः । तस्य पाकेन व्यञ्जनतया परिणामात् वार्तायाः कवर्णान्तत्वे वार्ताकेति पर्यवसानात् च इत्थमुक्तेऽति न जानासि चेत् तव मूढत्वं निश्चेतुं बहुकारणं वदामि इत्येकोर्थः । त्वं न जानासि चेत् तत् वस्तु बहुबीजमिति व्यक्तं वदामि इत्यर्थान्तरम् ।



कण्ठे गरस्य सम्बन्धे भवस्स्याद्युक्तमेव तत् ।
करेणोः करिसंयोगे कथं रावण इत्यहो ॥ 83 ॥
कण्ठ इति-कटपयादिसंख्यया कण्ठशब्दात् एकविंशति संख्या लब्धा । गरशब्दात् त्रयोविंशति संख्या तदुभयसम्बन्धे चतुश्चत्वारिंशत् संख्या (21+23=44) । सैव भव (44) शब्देनोच्यते । करेणु शब्दात् एकविंशत्युत्तरपञ्चशतं संख्या (521) करिशब्देन एकविंशति संख्या (21) उभयमेळने (521+21=542) द्विचत्वारिंशदुत्तरपञ्चशत संख्या भवति । सैव रावण शब्देनोच्यते । अयमेव श्लोकाभिप्रेतार्थः । कण्ठे विषसम्बन्धे रुद्र इति तु युक्तम् । करेणुकरि संयोगे रावणो जात इति तु आश्चर्यम् इत्यपातार्थ स्पष्ट एव ।

वासाद् दीपापहारे तु तमस्स्यादुचितं हि तत् ।
धरण्यान्दीपलोपेऽपि प्रकाशोभवदत्भुतम् ॥ 84 ॥
वासादिति-चतुस्सप्ततिसंख्यायाम् दीपापहारे अष्टादशापहारे षट् पञ्चाशत् तमश्शब्देनोच्यते (74-18=56) धरण्या-एकोनत्रिंशदुत्तर पञ्चशतसंख्यायां दीपलोपे - अष्टादशसंख्यालोपे एकादशोत्तर पञ्चशतसंख्या (529-18=511) सैव प्रकाशशब्देनोच्यत इत्यभिप्रेतार्थः । विरोधस्फोरकापातार्थस्तु स्पष्ट एव ।

मरुतां पाण्डवैर्योगे कथम् आदित्यसम्भवः ।
प्रजापतीनां प्रद्युम्नबाणैस्तु मनवोऽभवन् ॥ 85 ॥
मरुतामिति । मरूछब्देन सप्तसंख्या, पाण्डवशब्देन पञ्चत्व संख्या, तदुभयमेळने द्वादश-आदित्यशब्देनोच्यते । तादृशसंख्या प्रजापतिशब्देन नवत्वसंख्या, मन्मथबाणाः पञ्च तन्मेळने चतुर्दश-तत्संख्या मनुशब्देनोच्यते । मनूनां तत् संख्यात्वात् ।

पुरुषार्थप्रहाणेन रुद्राश्च कुलपर्वताः ।
प्रजापतीनां वेदापहारे युक्तं हि पातकम् ॥ 86 ॥
पुरुषेति - रुद्रशब्देन एकादशत्वसंख्या - तत्र
पुरुषार्थशब्दाभिप्रेतचतुष्टवसंख्यापहारे सप्तत्वतत्संख्या (11-4=7) कुलपर्वतशब्देनोच्यते । पातकशब्देन पञ्चत्वसंख्या शिष्टं स्पष्टम् । आपातप्रतीतोर्थः स्पष्टः ।

द्वितीयकुसुमं भाति पञ्चमेऽद्य तृतीयवत् ।
मन्दं मन्दं चतुर्थोऽति सञ्चरत्यन्तिके मम ।
लब्ध्वावकाशं यतते बाधितुं पञ्चमोपरः ।
नायको मे न चाऽयाति सखि किं करवाण्यहम् ॥ 87 ॥
द्वितीयेति - पञ्चभूतेषु द्वितीयं जलम् । तत्कुसुमं चन्द्र इत्यर्थः चन्द्रमा वा अपां पुष्पम् इति श्रुतेः । पञ्चमे-आकाशे । तृतीयवत् - अग्निवत् । चुतुर्थः वायुः अपरः पञ्चमः कोकिलशब्दः । शिष्टं स्पष्टं - विरहिणीवचनमेतत् ।



कस्मिंश्चिन्मण्टपे काचघटौ रक्तसितौ स्थितौ ।
तौ तु स्वकर्तृसामर्थ्यात् अन्तर्दीपं विनाऽपि च ॥
नितरां भवतस्तस्य मण्टपस्य प्रकाशकौ ॥ 88 ॥
कस्मिन्निति - रक्तसितौ काच घटौ - सूर्यचन्द्रौ । मण्टपशब्देन आकाश उच्यते । प्रसिद्धौ तु काचघटौ स्ववृत्तिदीपद्वारैव प्रकाशकौ - इमौ तु विलक्षणावित्यर्थः ।

श्रूयतां घातुकः कश्चित् मातृहस्ततलस्थितम् ।
आयुधं किञ्चिदादाय तेन हन्त्यखिलाः प्रजाः ॥ 89 ॥
श्रूयतामिति - मन्मथ इत्यर्थः । लक्ष्म्या अरविन्दहस्तत्वात् अरविन्दस्य मन्मथबाणत्वात् तेन सर्वान् हन्तीति अर्थः ।

अनेकवृषभा एकरज्जुबन्धाननूचितम् ।
किन्तु तेन चलन्त्येव रज्जुस्सरति विस्मयः ॥ 90 ॥
अनेकेति-कूश्माण्डवल्लीत्यर्थः । वृषभशब्देन कूश्माण्डफलानुच्यते । रज्जुशब्देन तद्वल्ली । शिष्टं स्पष्टम् ।

कांचित् बालां निजोत्सङ्गे शाययित्वा स्वपाणिना ।
काचित् लालयति प्रीत्या सा रोदिति सगत्गदम् ॥
कोपेन सा पुनः कर्णे तां पीडयति बालिकाम् ।
करोति कृपया भूयः पुनरप्युपलालनम् ॥
तथाऽति सात्मनस्त्वेककुचत्वादिव रोदिति ।
बालिका का कुचस्तस्याः कः कर्णश्च सखे वद ॥ 91 ॥
कर्णपीडनं-स्वरपरिष्कारः (பிரடையை முடுக்குவது ஸ்ருதி சேர்பதற்காக) स्तनशब्देन तुम्बिकाफलं (சுரக்காய் குடம்) उच्यते । रोदनं - गानं, सगद्गदरोदनं - असदृशस्वरः । शिष्टं स्पष्टम् ।
(Playing of Veena instrument described)

श्रूयतां पार्थिवः कश्चित् प्रत्यहं प्रातरादरात् ।
ददाति राजतं पिण्डं नारीहस्ते सखे वद ॥ 92 ॥
श्रूयतामिति - पर्थिवशब्देन मृण्मयी दधि पात्रमुच्यते । राजतपिण्ड-शब्देन नवनीतमुच्यते । प्रत्यहं प्रातः काले स्त्रियः दधिमथनेन नवनीतं गृह्यन्तीति अयमर्थः एवम् उच्यते ।

नीलाकारास्तु मणयः कस्मिंश्चित् तु समुद्गके ।
द्रष्टा मया समस्तास्ते वज्रशीर्षास्सखे वद ॥ 93 ॥
नीलेति - माषा इत्यर्थः । श्वेतशिरस्कत्वात् तेषां वज्रशीर्षत्त्वं, समुद्गकशब्देन माषपूर्णतत्फलमुच्यते ।



चतुराननयोर्मध्ये नकारो यस्य वर्तते ।
तत् किं वस्तु सखे तत्ते दास्यामि यदि वक्ष्यसि ॥ 94 ॥
चतुरिति-कनकं इत्यर्थः । ककारस्य चतुरानन वाचकत्वात् ।

हंसः कश्चिदपादस्सन् केनचित् पाणिना धृतः ।
मुहुस्तदधरं पीत्वा पुनरेति करं स कः ॥ 95 ॥
हंस इति-शङ्ख इत्यर्थः। अधरे कृत्वा शङ्खस्य वादनात् तदधरपानमिति उच्यते । पाण्डरत्वात् हंस इत्युक्तः ।

सुन्दरः पुरुषः कश्चित् आस्ते सर्वास्त्रियो वपुः ।
अलङ्कृत्य स्वकं तस्मै दर्शयित्वा पुनस्तु तम् ॥
तोषयित्वा ततो भर्तृसमीपं यान्त्य स कः ॥ 96 ॥
सुन्दर इति-दर्पण इत्यर्थः । श्लक्षणत्वात् सुन्दर इत्युक्तम् । स्त्रियः स्वदेहं अलंकृत्य दर्पणे आलोक्य अलङ्कारन्यूनतायांसत्यां पुनस्सम्यक् अलङ्कृत्य दर्पणे पुनरवलोकने मनस्समाधाने सति एव भर्तुसमीपगमनात् तत्सन्तोषणपूर्वकमेव भर्तुसमीपगमनमित्युक्तमिति ज्ञेयम् ।

कश्चिदस्ति हरस्तस्य शिखाशीर्षेस्ति नो जटा ।
गङ्गा न मस्तके किन्तु जठरेस्ति सखे स कः ॥ 97 ॥
कश्चिदिति - नाळिकेरफलमित्यर्थः । त्रिनयनत्वात् हर इति ।

काचिदस्त्यप्सरा भूमौ तस्या एकैव पुत्रिका ।
पुत्रिकायास्तु वेण्येका कुच एकस्तदग्रगः ॥
वृद्धिमेति सचित्रं सा का सखे त्वरितं वद ॥ 98 ॥
काचिदिति-मोचा इत्यर्थः । रम्भानामकत्वात् अप्सरा इत्युक्तम् । सकृदेव फलप्रदानात् एकपुत्रिकेति । वेणीशब्देन पुच्छाकार तद्व्रातम् । कुचशब्देन तत्कुसुममुच्यते ।

चित्रं कस्यचिदैन्द्रजालिकनरस्योद्योगतः पादपे
कस्मिंश्चित् कुसुमं फलत्यतिजवात् तच्चाऽति सद्यः क्षणात् ।
वृद्धिं प्राप्य बृहत्तरं भवगतः क्षिप्रञ्च पक्वं भवत्
तस्मात् भूमिरुहात् पतत्यपि सखे वृक्षस्स कः किं फलम् ॥ 99 ॥
चित्रमिति-कुलालेन मृतपिण्डश्चक्रे आरोप्य चीवरादिव्यापारेण शीघ्रं कपाल-घट-शरावादि परिणामं प्रापय्य चक्रात् अवरोप्यत इति अयमर्थमुच्यते ।

क्षेत्रे तु कुत्रचन बीजचयः प्रकीर्णः नादातुमीषदपि पाणितलेन शक्यः ।
वाचा तु यद्यपि भवेत् बहुशोप्यनेकैः नीतोऽपि तत्र स तु पूर्ववदक्षयस्स्यात् ॥ 100 ॥
क्षेत्र इति-पत्रिकायां लिखितः अक्षरगणःबीजचय इत्युच्यते । वाचा आदानन्मामपठनं * । शिष्टं स्पष्टम् । एवं तत्तत्द्वस्तूनां व्यक्ततया अनुक्त्वाप्रकारान्तरेण कथनात् अव्यक्तवचनं - इदं द्रविडभाषया पुदिर् (புதிர்) (इति भवति) [* आदानन् नाम पठनं]

द्वादशप्रकरणं - अक्षरविन्याससरसम्

केशो वराहवत् भाति तिलवत् भाति तेऽक्षिकम् ।
कटवत् करयोर्युग्मं कुचः कोलवदेधते ॥
वलग्नं त्वंशुवत् भाति बाले तेऽङ्गक्रमोऽद्भुतम् ।
तथाऽपि सर्वं रम्यं स्यात् कान्तता तत्रतत्र चेत् ॥ 101 ॥
केश इति-वलाहकवत् भाति । तिलकवत्-तिलकाश्रयम् इत्यर्थः । कटकवत् । कोरकवत् । अंशुकवत् । इत्थं ककारं अन्ते संयोज्य पठने सर्व सङ्गतं भवति । तदेवोक्तं कान्तता तत्र तत्र चेत् सर्वं रम्यं स्यादिति ।

बहुवाद्यलयै राजत्करा कान्तितिलानना ।
अनाद्याहारसंयुक्ता विपरीतकपिस्वरा ॥ 102 ॥
बह्विति - लयान्त्यवकाराद्यत्वे वलय इति भवति । तिलस्य कवर्णान्तित्वे तिलकमिति भवति । आहारशब्दस्य अनादित्वेआकार-रूपाद्यक्षरराहित्ये हार इति भवति । कपिशब्दस्य विपरीतत्वे पिक इति भवति । एवञ्च श्लोकार्थस्स्पष्टः ।

ऋजुबुद्धिस्सखे नारी काऽपि नाऽलक्ष्यते कथम् ।
मुख्याह्यलंकृतिस्स्त्रीणां अनादिः कपटः खलु ॥ 103 ॥
ऋज्विति-स्त्रीणां कपटः अनादिः- आजानसिद्ध इत्येकोर्थः । कपटशब्दस्य ककाररूपादिवर्ण - राहित्ये पट इति भवति । स मुख्यालङ्कार इति अन्यः अर्थः वस्त्रमुख्यत्वात् अलङ्कारस्य ।

विराटो गाणिकासङ्गी राक्षसप्रीतिरच्युतः ।
श्लाघ्यते दासता लोके भावं वद सखे द्रुतम् ॥
मध्ये राक्षससंसर्गात् अनर्थो हि सतामपि ।
राक्षसापगमस्स्यात् चेत् सुलभो ह्यर्थनिश्चयः ॥ 104 ॥
विराट इति - 'रा' इति मध्याक्षरापगमे विट इति भवति । राक्षस इत्यत्र 'क्ष' इति वर्णापगमे रास इति



भवति । रासप्रीतिः नाम रासक्रीडा-प्रीतिरित्यर्थ; । दासता इत्यत्र 'स' वर्णापगमे दाता इति भवति । एवञ्च श्लोकार्थः सम्यक् अन्वितो भवति । अत एवोक्तं मध्ये रा-क्ष-स संसर्गात् सतामप्यनर्थ इति । रा-क्ष-स अपगमः स्यात् चेत् अर्थनिश्चयः सुलभ इति च । अर्थान्तरन्तु स्पष्टमेव ।

कराळश्श्लाध्यतामेति धीवरा यान्ति पूज्यताम् ।
राजानः कुणपा लोके न लभेदर्थमार्जवात् ॥
मध्ये रावण सन्यासे कृतेऽर्थः प्राप्यते ध्रुवम् ॥ 105 ॥

कराळ इति-पूर्ववत् एव मध्याक्षरपरित्यागे-कळः, धीरः, कुपा इति भवति । एवं च श्लोकार्थः स्पष्टः । कळः मधुरस्वरः । आर्जवात् यथा श्रुतपदात् अर्थो न लभ्यते । किन्तु मध्ये रा-व-ण सन्यासे - त्यागे कृत एवेति प्रकृतार्थः । कालवैषम्यात् आर्जवेन धनलाभो न शक्यः । किन्तु वञ्चनायां सत्यामेवेत्यर्थान्तरम् अवधेयम् । रावणसन्यास शब्देन वञ्चनोच्यते । (कु-भूमिः, कुपाः-भूपाः- कुणपः शवमस्त्रियाम् इति अमरः)

चारं निहतवान् कृष्णः स्वरे राजा तु पूज्यते ।
नादो वीणां नादयति भावं वद सखे द्रुतम् ॥
पदान्तर्नूपुरन्यासे नारीवत् रम्यतां व्रजेत् ॥ 106 ॥

चारमिति-मध्ये 'णू' इत्यक्षरन्यासे चाणूर इति भवति । स्वरे इत्यत्र मध्ये 'पु' इति निवेशे स्वपुरे इति भवति । नाद इत्यत्र मध्ये 'र' इति निवेशे नारद इति भवति । अत एवोक्तं पदान्तर्नूपुरन्यासे नारीवत् रम्यतां व्रजेत् इति ।

न बद्धस्सेतुरम्भोधौ भरतो नैव मोक्षभाक् ।
नृषु कोपादरो नास्ति श्लोकार्थः कीदृशस्सखे ॥
अन्तर्लवण निक्षेप तक्रवद्रस्यतां व्रजेत् ॥ 107 ॥

नेति-मध्ये ल-व-ण इत्यक्षरत्रयस्य क्रमेण निवेशे सति नलबद्धः- भवरतः - कोणपादर इति भवति । यथा तक्रस्य लवणनिक्षेपे रस्यत्वं तद्वत् अत्रेति भावः । (कोणपः= कौणपः- राक्षसः कौणपः क्रव्यात् क्रव्यादोऽग्नप आशर इति अमरः)

कपिकाळिनादमधुरा वनावळिः कमलक्षयेन मधुरं सरोजलम् ।
कविराजमाप गमनार्थमच्युतः कविरामभद्ररचितं भवेदिदम् ॥ 108 ॥

कपीति - कविरामभद्ररचितं भवेत् - ककारविरामे सति भद्रत्वेन रचितं सङ्गतार्थमित्यर्थः । यथा पिकाळिनादमकधुरा, मलक्षयेन विराजं - गरूडं - इत्यर्थः । इदं चित्रं कवि रामभद्रेण रचितमित्यपि अवधेयम् ।

Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

नीहारे तरळो भाति श्वापदे भाति नूपुरः ।
द्रुमाश्च सवने युक्तं दीर्घनिश्वासवर्जनात् ॥ 109 ॥
नीहार इति - दीर्घनि (इत्युक्ते नी वर्णः) श्वा-स इति वर्णत्रयस्य क्रमेण वर्जने सति, हारे-पदे-वने इति भवति एवं च अर्थस्सङ्गतः (तरलो हार मध्यग इति अमरः)

वसुदेवसुतो दुरालयाशी वलयाद्वनिता विनष्टभोगा ।
रणतो हि रणं विभाति पूर्वं विधवागमनान्न कापि हानिः ॥ 110 ॥
वसुदेवेति-पूर्वं वि-ध-वा इत्यक्षरत्रयस्य प्राप्तौ विदुरालयाशी (वसुदेवसुतः) - धवलयात् (वनिता विनष्टभोगा) वारणतः (हि रणं विभाति) इति भवति । विधवः-गुरूडः तदागमनात्-गरूडदर्शने सति न कार्यक्षतिः इत्यर्थान्तरध्वनिरपि बोध्याम् ।

अजाकारोऽपि जामाता मातैव स्याद्यतस्ततः ।
जामाता ज्ञानशून्योऽपि पूजयते स्यालकादिभिः ॥ 111 ॥
अजेति-'जामाता' अपगतजाकारश्चेत् 'माता' भवति । तस्मात् पूज्यत इत्यर्थः । जामाता अजाकारोऽपि-ज्ञानयशून्योऽपि माता भवति । स्यालस्य स्वमातृप्रीतिविषयत्वेन मातृतुल्यो भवति । स्वमातृप्रीत्यर्थं स्यालः जामातरं पूजयतीत्यर्थः । जामातुः मूर्खत्वेऽपि तस्मिन् श्वश्रूप्रीतिः अधिकेति लोकसिद्धोऽयं अर्थे विशेषोऽपि ध्वन्यते ।

अतिप्रतिभया लसत्यनघ भूषणानां गणः विकारसहितद्रुमप्रतिभटोधरस्ते ध्रुवम् ।
अनन्तपुरुषादरस्तव विभाति लीलाविधा वतस्तवमनो मया विमुखहारसक्तं कुरु ॥ 112 ॥
अतीति-प्रतिभायाः अतित्वे-'ति' इति वर्ण शून्यत्वे प्रभा इति भवति ।
एवञ्च भूषणगणः प्रभया लसति । 'द्रुमस्य' विकार साहित्ये विद्रुम इति भवति । एवं च अधरः विद्रुमप्रतिभटः । 'पुरुष' शब्दस्य अनन्तत्वे-अन्त्याक्षर राहित्ये 'पुरु' इति भवति । लीलविधौ तव अधिकादरः (विभाति) (विमुखे) 'वि' इत्यक्षरं मुखे - मुखभागे यस्य स विमुखः स चाऽसौ हारः - विहार इत्यर्थः । एवञ्च मया सह विहरेति भावः । (पुरूहूः पुरू भूयिष्टं स्फारं भूयश्च भूरि च इति अमरः)

मायायाश्च पिशाचस्य नरकस्याऽपि च क्रमात् ।
अन्त्याक्षराणि संगृह्य याचकं विदधे विधिः ॥ 113 ॥

संतापात् सागराच्चाऽपि रक्षसश्च चतुर्मुखः ।
आद्याक्षराणि संगृह्य संसारं कृतवान् क्रमात् ॥ 114 ॥



अमध्यसारो मकरन्द आसीत् अत्येवमत्रातिरसं च जातम् ।
सुधैव जाताऽत्र सुधाऽपि बाले प्रकाश्यते चेत् तव वाग्रसेस्मिन् ॥ 115 ॥
अमध्येति - मकरन्द इत्यस्य अमध्यत्वे मध्यवर्णद्वयराहित्ये 'मन्द' इति भवति । एवं च मकरन्दः मन्दसार आसीत् । अतिरसं - तदाख्यं भक्ष्ययम् अतिजातं - 'ति' कारशून्यं जातं - (अतिरसं) अरसं जातं । सुधा-अमृतं सुधैव जाता - गृहादि लेपनार्था या सुधा सैव जातेत्यर्थः ।

मुखसदृशं तामरसं यदिह जगत्यान्तु वर्ण्यते कविभिः ।
मुखसयुतं भवति हि तत् सुमुखि मुखे ते विलोकिते सद्यः ॥ 116 ॥
मुखेति-स्त्रीमुखसदृशं यद्वर्ण्यते तत् तामरसं - तव मुखे विलोकिते सति, मुखसयुतं - मुखभागे 'स' युतं सकारयुक्तं भवति - सतामरसं भवति - विदुषां हेयं भवतीति भावः ।

बाले त्वदीयाऽऽस्यरुचीच्छयैष काले तु कस्मिंश्चिदचूचरत् ताम् ।
तदैव तस्मात् विपरीताकारा निशान्तमिन्दुर्विधिनैव नीतः ॥ 117 ॥
बाल इति - कस्मिंश्चित् काले सकलकलापूर्णत्वसमये, विपरीतकारा निशान्तम्-उपद्रवसहितकारागृहमित्यर्थः । चोरस्य कारागृहप्राप्तिः युक्तेति भावः । 'कारा' शब्दस्य विपरीतत्वे 'राका' इति भवति । पूर्णिमा दिनरात्रिमध्यभागं भजतीति वास्तवार्थः ।

सुगत्यगो भवत्यगो मुखे गजस्सुभाषिणि ध्रुवं शुकोऽपशुर्मुखे भवत्यवाप्तदीर्घकः ।
अगो भवत्यगोन्ततोनुगो वरस्तनि प्रिये गतिर्वचस्तनौ यदि प्रकाशिता मनोहरे ॥ 118 ॥
सुगतीति - तव गतिः गमनं प्रकाशितंचेत् गजः अगस्सन् - 'ग' कार शून्यस्सन् मुखे-मुखभागे अगो भवति - 'अकारं प्राप्तो भवति - गजः अजो भवतीत्यर्थः । तव वचः वाक् प्रकाशिता चेत्, शुकः अपशुस्सन्-अपगत 'शु' कारस्सन्, मुखे अवाप्त दीर्घककारो भवति - काको भवतीत्यर्थः । तव वचने श्रुते शुकवचनं काकरूततुल्यं भवतीति भावः । तव स्तनौ प्रकाशितौस्चेत्, अगः पर्वतः अगस्सन् 'ग' कारशून्यस्सन्, अन्ततः अन्तभागे णुगो भवति 'णु' इत्यक्षरं प्राप्तो भवति । 'अणु' भवतीत्यर्थः ।

आकारशून्यं आरामं अनन्तकुशलादरम् ।
भजामि भक्त्या विमुखराधोपद्रवकारणम् ॥ 119 ॥
आकारेति - अनन्तकुशलः अन्त्याक्षर शून्यकुशलः कुश इत्यर्थः तत्र सादरं 'वि' मुखराधः विराधः तदुपद्रवकारणं आकार शून्यं आरामं - राममित्यर्थः । (कुशादरं विराधोपद्रवकारणं रामं भजामि इति)

अतिप्रसूतिर्मातास्यात् अशान्तो गिरिशोऽचलः ।
नारदोऽपि ह्यदान्तश्चेत् मर्त्यसंबन्धितां भजेत् ॥ 120 ॥
अतीति -प्रसूतिपदस्य अतित्वे - 'ति' इति वर्ण शून्यत्वे प्रसूरिति भवति । तस्मात् मातेत्युक्तं (जनयित्री प्रसूर्माता जननी-इत्यमरः) गिरिशः अशान्तश्चेत् श इत्यन्त्यवर्णशून्यश्चेत् गिरिर्भवति । तस्मार्थ अचल इत्युक्तम् । नारद इत्यस्य 'द' इति अन्त्यवर्ण - शून्यत्वे नार इति भवति । नरसंबन्धी भवतीत्यर्थः - नरसम्बन्धित्वात् नारस्य ।

लोके मध्यस्थराहित्ये धीवरोपि च पण्डितः ।
प्रेषितो ह्यद्वितीयश्चेत् शवस्यान्नाऽत्र संशयः ॥ 121 ॥
लोक इति - धीवरशब्दस्य 'व' इति मध्यस्थाक्षर - राहित्ये 'धीर' इति भवति । तस्मात् पण्डित इति उक्तम् । प्रेषित इति शब्दः द्वितीयाक्षररहितश्चेत् 'प्रेत' इति भवति । तस्मात् 'शव' इत्युक्तम् । अयं प्रकृतार्थः । न्याय्यान्य्यवादिमध्यस्थजनाभावे धीवरः पामरः अपि पण्डितो भवति । सहायरहितो जनः प्रेषितश्चेत् चोरादिभिः हतस्सन् शवो भवतीत्यर्थान्तरध्वनिरपि बोध्या ।

मोदकश्चेदकान्तोऽति प्रीत्यर्थत्वन्न मुञ्चति ।
अर्भं वदत कान्तश्चेत् पृथुरप्यर्भको भवेत् ॥ 122 ॥
मोदक इति - (मोदकः) अकान्तश्चेत्-'क' इत्यन्त्यवर्णशून्यश्चेत् मोदो भवति । तस्मात् प्रीत्यर्थत्वं न मुञ्चतीत्युक्तम् । पृथुः कान्तश्चेत् - अन्ते 'क' कारं प्राप्नोति चेत् पृथुको भवति, तस्मात् अर्भक इत्युक्तम् । पृथुकशब्दस्य अर्भकवाचकत्वात् । मोदकरूप भक्ष्यविशेषस्य अकान्तत्वेऽपि-समीचीनाकृतिराहित्येऽपि रूचिहान्य भावात् प्रीतिविषयो भवत्येव । पृथुः स्थूलशरीरोऽपि कान्तश्चेत्-रम्यश्चेत् अर्भकवत् दर्शनीयरूपो भवतीति अर्थान्तरावगतिर्बोध्या ।
कस्यचनाक्षरविन्यासे सति संगतार्थकत्वात् इदं प्रकरणम् अक्षरविन्याससरसम् इत्युक्तम् ।

त्रयोदशप्रकरणं - साधर्म्यम्

मूषकस्य मुकुन्दस्य साधर्म्यं कीदृशं भवेत् ।
यद्विनायकवाहत्वं सखे भवतु तत्तयोः ॥ 123 ॥
मूषकस्येति-विनायकस्य वाहः विनायकवाहः तस्य भावः विनायकवाहत्वं । विनायकः गरुडः - सः वाहः यस्य स विनायकवाहः, तस्यभावः विनायकवाहत्वम् ।



मुकुन्दस्य मुमुक्षोश्च कीदृशी तु सधर्मता ।
अप्रतीकाशतायां तु सा तयोस्स्यात् सधर्मता ॥ 124 ॥
मुकुन्दस्येति-अप्रतीकाशता - अनुपमत्वम् । प्रतीके - शरीरे आशा यस्य नास्ति सः अप्रतीकाशः तस्य भावः तत्ता ।

मन्मथस्य च साधोश्च साधर्म्यं कीदृशं भवेत् ।
अविग्रहत्वं साधर्म्यं उभयोरुचितं सखे ॥ 125 ॥
मन्मथस्येति - अविग्रहत्वं - अशरीरित्वं, विरोधाभावश्च ।

हंसस्य पण्डितस्यापि साधर्म्यं वक्तुमर्हत ।
अभ्रान्तचित्ततायां तु तत्साधर्म्यं तयोर्भवेत् ॥ 126 ॥
हंसस्येति-अभ्रान्तचित्तता - मेघावसानमनस्कत्वम् ।हंसानां वर्षाकालविरोधात् शरत्कालैकचित्तत्वमिति भावः । भ्रान्तिरहितमनस्कत्वं च पण्डितस्य भ्रान्त्यभावात् ।

कवेर्ग्रहगणस्यापि विरक्तस्यापि संसृतौ ।
त्रयाणामपि साधर्म्यं वक्तुमर्हन्ति पण्डिताः ।
या त्वनन्तपदासक्तिस्सा त्रयाणां सधर्मता ॥ 127 ॥
कवेरिति-अनन्तेषु पदेषु प्रकृतिप्रत्ययघटितेषु आसक्तिः । अनन्तपदं-विष्णुपदं-आकाश इत्यर्थं तत्र आसक्तिः । अनन्तपदासक्तिः भगवत्चरणकमलासक्तिः । यद्वा-अनन्तपदं - परमपदं तदासक्तिरिति च ग्रहगणः सूर्यचन्द्रादि ग्रहगणः ।

चतुर्दशप्रकरणम् - भाषान्तरभ्रमः

अत्तानेकमनुष्याणां अम्माञ्जित्वाप्तुमैक्षत ।
मदिनीचपलाशस्स रावणो हरिणा हतः ॥ 128 ॥
अत्तेति-अनेकमनुष्यशरीरभक्षकः (अत्ता) रावणः अं भगवन्तं श्रीरामं, जित्वा, मां सीतारूपिणीं लक्ष्मीं आप्तुम् ऐच्छत् । मदिनीचपलाशः सः मदोन्मत्तो नीचस्वपलाशः स रावणः तस्य आशा मनोरथः व्यर्थोऽभवत् इष्टलाभेन प्रत्युतानिष्टप्राप्त्या च इति भावः । अत्र द्राविडभाषया अत्तान् (அத்தான்) अम्माञ्चि (அம்மாஞ்ஜி) मदिनी (மதினீ) इति बन्धुविशेषबोधोवधेयः ।

Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath



अप्प्रभुर्नाशमापोहा भजेयुरिति यच्छरात् ।
भीत आगत्य यं भेजे तन्नमामि रघूद्वहम् ॥ 129 ॥

अप्प्रभुरिति-अपां प्रभुः अप्प्रभुः समुद्रः, आपः स्वीयजलानि नाशं राघवशरात् शोषणं भजेयुः - हा! कष्टम् इति यच्छरात् भीतः प्रत्यक्षतां यातः । श्रीरामसन्निधिम् अवाप-तं रघूद्वहं नमामि इत्यर्थः । अत्र अप्प्रभुः नाशमापोहा (அப்ரபு நாசமாபோஹ) इति वाक्यात् द्रविडभाषया प्रभु व्यतिरिक्तः नाशं यात्वित्यर्थबोधो भवति ।

अरिशिक्षामतः कम्बु राहिशोळं रमापतिः ।
विश्वं पातुं ततोन्ये तु विरिञ्चाद्या न हि क्षमाः ॥ 130 ॥

अरीति-शत्रुशिक्षायां सर्वसम्मतः । कम्बुराहिशः-कम्बु शङ्खं, र आदाने शङ्खधर इत्यर्थः, अहौ सर्पे शेत इति अहिशः । कम्बुरश्चासौ अहिशश्च कम्बुराहिशः रमापतिः । विश्वं पातुम् अलं-समर्थः । शिष्टं स्पष्टम् । अरिशि (அரிசி) क्षामतः तण्डुल दारिद्रलात् कम्बु-राहि -शोलं (கம்பு, ராகி, சோளம்) इति द्राविडया धान्य विशेषबोधो भवति ।

एधो लक्ष्मी वियोगास्तु कथं वाच्यान्तरात् ।
अयुक्तसंशयो यत्र काष्ठमा विरहा इति ॥ 131 ॥

एध इति - काष्ठ - मा - विरहाः इति । एधो लक्ष्मी वियोगबोधः । वचोन्तरात् द्राविडभाषातः अयुक्तसंशयबोधो भवति घटो वा कलशो वेतिवत्-काष्ठमा विरहा (காஷ்டமா விறகா) इति संशयस्यायुक्तत्वात् । द्राविडाभाषाभ्रम जनकत्वात् एष श्लोकः अत्रोक्तः ।

काक्षमा भूषणं कुत्र धार्यते तारितः कया ।
समुद्रः कं गता लक्ष्मीः कुरङ्गे रामसेनयाम् ॥ 132 ॥

केति-कुः - अङ्गे - रामसेनया - अम् इति पदच्छेदेन प्रश्नचतुष्टयोत्तरोक्तिः । प्लवङ्गमा एव श्रीरामस्य सैन्यमिति (குரங்கே ராம சேனையாம்) द्राविड्या अर्थान्तरबोऽधोऽवगन्त्व्यः ।

नालसद्भिस्सुमैर्विष्णोः अञ्ज्साचां करोतु ताम् ।
आरुदन्तं गजं पातुं येळसास्तैरलं परैः ॥ 133 ॥

नेति-ना मनुष्यः, लसद्भिः सुमैः विष्णोरेवार्चां अञ्जसा करोतु । रूदन्तं नक्रपीडयेति भावः गजं पातुं - रक्षितुं ये अलसा; असमर्थाः तैः परैः इतरदेवैः अलं - तत्पूजा न कर्तव्येत्यर्थः । आ इत्यव्ययमाक्षेपे । कथन्तस्यैव पूजेत्याक्षेपे उत्तरार्धेन तत् परिहारे बोध्यः । अत्र नालु, अञ्जु आरू, एळु इति द्राविडसंख्याबोधो ज्ञेयः । यद्यपि ஏழு इत्येव सप्तसंख्या तथाऽपि पामरैः येळु (ஏளு) इत्यपि प्रयुज्यत इति तथोक्तम् इति अवगन्तव्यम् ।



चारु मोरु शिराश्शोरुः करिहा त्वं प्रभो कलिः ।
मामियान्मामनार्तङ्गेयगुणाच्युत चेत् क्रियाः ॥ 134 ॥

चार्विति-मोरुः (मा ऊरुः) लक्ष्मीसक्थि (सक्थि क्लीबे पुमानूरुः अमरः) सः चारुः तत्र शिरः यस्य स चारुमोरुशिराः - श्रीदेवी सक्थिस्थले शिरः निक्षिप्य शयनं करोति भगवानिति तथोक्तम् । शोरुः मङ्गळकरसक्थिद्वयः । अनेन ऊरुद्वारा दिव्यमंगळविग्रहस्य शुभाश्रयत्वम् उक्तं भवति । शकारस्य मङ्गळवाचकत्वात् । करिहा-कुवलयापीडहन्ता त्वं माम् अनार्तं क्रियाश्चेत्-करिष्यसि यदि । कलिः माम् इयात्-भजतु। त्वया मदार्तिहरणे कृते सति, कलिभयं मे नास्तीति भावः । प्रभो गेयगुण अच्युत ! इति भगवत्संबोधनं । हे प्रभो गेयगुण अच्युत । चारुमोरुशिराः शोरुः करिहा त्वं मामनार्तं क्रियाश्चेत् कलिः मामियात् इत्यन्वयः । चारु, मोरु, शोरु,करिहा, मामियार्, मामनार तङ्गे (சாரு, மோரு, சோறு, கரிஹா, மாமியார், மாமனார்) इति द्राविडशब्दबोधोऽत्र स्पष्टः ।

महानसं हरिं वाहमहिषञ्च दरिद्रताम् ।
कोपञ्च जालकं सूदो मायमोऽमोऽशमो विरैत् ॥ 135 ॥

महानसमिति - सूदः माहनसं मा हरिं यमः वाहमहिषं अमः (लक्ष्मीकटाक्षरहितः) दरिद्रः इत्यर्थः दरिद्रतां अशमः कोपं विः (पक्षी) जालकं ऐत् क्रमेणाऽन्वयः । अत्र सूदो मायमो मोशमो(சூதோ, மாயமோ, மோசமோ) इति द्राविड्या वञ्चनादिबोधो भवतीति ज्ञेयम् ।

नरि नायोऽपिशाशो वा कारणान्तरतोऽपि वा ।
वञ्चनां कुरुते हन्त तमाहुर्नरराक्षसम् ॥ 136 ॥

नरीति - यः ना-मनुष्यः शाशोऽपि वा स्वसुखेच्छो वा स्वसुखार्थं वा इति भावः । कारणान्तरतः अपि वा स्वसुख व्यतिरिक्तकारणात् वा, नरि मनुष्ये वञ्चनां कुरुते-तन्नरं सन्तः नरराक्षसम् आहुः इत्यर्थः । अत्र नरि, नाय् पिशाश् (நரி, நாய், பிசாசு) इति द्राविड्या जम्बुकश्वानपिशाचबोधः ।

वः काळोळिवदाभाति यस्य कण्ठो विषश्रिया ।
परमुण्डे विधुर्भाति स रुद्रः पातु सर्वदा ॥ 137 ॥

व इति - यस्य कण्ठः विषश्रिया कालः असितः सन् अळिवत् आभाति, यस्य परमुण्डे गंगातीर्थवत्वात् पुण्ये शिरसि विधुः (चन्द्रः) भाति । स रुद्रः वः सर्वदा पातु इत्यर्थः । अत्र वःकाळेळि, परमुण्डे इति द्रविड्या निन्दा प्रतीयते ।

भीतो यदि स्यादविशारिदण्डात् अम्मामियात्तिल्यमहीरुहाद्यैः ।
संशोभितं नित्यपदं स गच्छेत् मामात्र सन्देहलवो मदुक्तौ ॥ 138 ॥

भीत इति-अवौ शेत इत्यविशः रुद्रः (अविः गिरिः) सः अरिः शत्रुः यस्य सः अविशरिः यमः, तत्दण्डात्



तत्कर्तृकशिक्षातः, पुमान् भीतः स्यात् यदि, अं भगवन्तं मां-लक्ष्मीं च इयात् अनन्तरं स पुमान् तिल्योवृक्ष इत्यादिश्रुतिप्रसिद्धतिल्यवृक्षादिभिः संशोभितं परमपदं गच्छेत् । अत्र मदुक्तौ सन्देहलवोऽपि मा मा-मास्त्वित्यर्थः । यमदण्डनभयात् लक्ष्मीं पुरुषकारत्वेन भगवन्तम् उपायत्वेन प्रपद्येत चेत् मुक्तो भवत्येवेति भावः । अत्र अविशारि दण्डं अम्मामियात्तिल् मामा (அவிசாரி, தண்டம், அம்மாமியாத்தில், மாமா) इति द्राविडशब्दबोधः ।
(विरजा नदी तिल्यो वृक्षः सालज्यं संस्थानं इन्द्रप्रजापती द्वारगोपौ इति कौषितक्य उपनिषदि मुक्तिप्रदनिर्णये)

अप्पं मनोहरं तेङ्गासमश्रीर्जयति प्रभो ।
एनो करोद्दयातेनो सत्तुमा पच्चमावतु ॥ 139 ॥
अप्पमिति-प्रभो हे नारायण ! ते तव अङ्गासमश्रीः - शरीर निस्तुलश्रीः मनोहरं मनोज्ञम् । अपः पातीति अप्पः मेघः तं जयति । ते दया तु नः एनः - पापं - असत् तुच्छमकरोत् । तव पच्च चरणश्च (पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् - अमरः) मा-माम् अवतु-रक्षतु इत्यर्थः । अस्माभिः शरणत्वेन व्रतस्तव चरणः कालमेघाधिक्कसुन्दर त्वदीयदिव्यमङ्गळविग्रहसेवाप्रदानेन अस्मान् रक्षत्विति भावः । अत्र अप्पं-मनोहरं - तेङ्गा एनो तेनो सत्तुमा पच्चमा (அப்பம், மனோஹரம், தேங்கா, ஏனோ, தேனோ, ஸத்துமா, பச்சமா) इति द्राविडशब्दबोधः ।

पंञ्चदश प्रकरणं - शब्दगूढम्

करोतु मह्यं हन्ता चेदीशस्य दयया सुखम् ।
विद्वांसोऽपि विमुह्यान्ति व्यक्ते हननकर्मणि ॥ 140 ॥
करोत्विति - चेदीशस्य शिशुपालास्य हन्ता-कृष्णः अत्र, चेत् ईशस्य इति पदच्छेदभ्रमात् चेदीशस्येति शीघ्रमप्रतीत्या कर्मपदम् ।

आपदर्थं हि संख्यावान् गृहं क्षेत्रं च पार्थिवात् ।
विद्वानेव विजानाति गूढमत्र क्रियापदम् ॥ 141 ॥
आपदिति- विद्वान् भूपात् गृहं क्षेत्रं अर्थं च आपत् प्राप । अत्र आपदिति पदच्छेदस्य स्फुटम् अप्रतीतिरिति भावः ।

उदारास्तादृशाः पान्तु युष्मान्तत्भक्तिशालिनः ।
विशेषपदमत्रत्यं वक्तुं शक्तो न गीष्पतिः ॥ 142 ॥
उदारा इति । तादृशाः सर्वगुणपूर्णाः उदाराः उः शम्भुः तस्य दाराः पार्वतीत्यर्थः युष्मान् रक्षमु ।



विदुरस्य च कृष्णस्य रामस्य मुनिसत्तमाः ।
माहात्म्यं न विजानन्ति कवयोऽत्र क्रियापदम् ॥ 143 ॥
विदुरिति । अस्य कृष्णस्य रामस्य च माहात्म्यं मुनिसत्तमाः विदुः [विदुः + अस्य = विदुरस्य]

द्विजैरेव सखे बालो दशादिक्षु मनोगतम् ।
क्रियां कर्म च विद्वांसो न जानन्त्यत्र माहिताः ॥ 144 ॥
द्विजैरिति । बालः अनोगतं-शकटस्थं इक्षुं द्विजैरेव=दन्तैरेव अदशत् ।
(बालोऽदशादिक्षु=बालः अदशत्+इक्षु) (दन्तविप्राण्डजाः द्विजा इत्यमरः)

अस्त्रं पाशुपतं भक्त्या याचते सव्यसाचिने ।
रुद्रेण किं कृतं ब्रूहि दत्तमत्रैव चोत्तरम् ॥ 145 ॥
अस्त्रमिति । किं कृतं ? दत्तम् । अत्र उत्तरं दत्तं-दत्तमिति पदमेवोत्तरवाचकमित्यर्थः । सव्यसाची-अर्जुनः ।

दुर्लभं देवतानाञ्च भाग्यं लोके विराजते ।
यत्त्वं भगवतः पत्रमर्थं वदत पण्डिताः ॥ 146 ॥
दुर्लभमिति । हे विराजः ते भाग्यं देवानामपि दुर्लभं स्यात् यस्मात् त्वं भगवतो वाहनभूतः तस्मादित्यर्थः ।

मधुरावयमाघ्राणां पल्लवैः कोकिलस्य सः ।
पञ्चमो वञ्चयन् धैर्यं पान्थानां समुदञ्चति ॥ 147 ॥
मधुरिति । यं मधुः वसन्तकालः आघ्राणां मल्लवैः आव-ररक्ष, सः कोकिलस्य पञ्चमः पञ्चमस्वरं धैर्यं वञ्चयन् समुदञ्चति-मारपीडा जनकत्वात् ।

ज्ञानाधिका अपि प्रायो जीवन्ति क्लेशतो गृहे ।
वयोधिकाननम्यापयन्ति कालं सुखेन हि ॥ 148 ॥
ज्ञानेति । ज्ञानाधिका अपि - विद्वांसोऽपि क्लेशतः- जीवनोपाय संपादनक्लेशेन गृहे जीवन्ति । वयः पक्षिणस्तु अधिकाननं - वने, कालं सुखेन अनायासेन - यापयन्ति ।

भूयात् बाल सदाऽयुष्मत्तात इत्येव मे मतिः ।
अत्र कर्तृपदं वक्तुं अवधिब्रह्मणोवयः ॥ 149 ॥
भूयादिति । हे बाल ! ते आयुष्मत्ता भूयात् इति सदैव मे मतिः ।



साध्वसेनचकम्पेनरोगजेनावलोकितः ।
एतद्वाक्यस्य जानाति योऽर्थं स खलु पण्डितः ॥ 150 ॥
साध्वसेनेति। नरः गजेनावलोकितः सन् साध्वसेन चकम्पें । गजाक्रमण-शङ्कया भीत्या कम्पं प्रापेत्यर्थः ।

बाले वदनबिम्बं ते तमीनं धिक्करोति हि ।
त्वदक्षियुगळञ्चाऽपि तमेवाऽनादिमत्भुतम् ॥ 151 ॥
बालइति । ते वदनबिम्बं तमीनं - चन्द्रं धिक्करोति । त्वदक्षियुगळं चापि अनादिम् - आद्यक्षरशून्यं तमेव-तमीनमेव-मीनमित्यर्थः धिक्करोति। द्वयोः एकवस्तुधिक्कारात् आश्चर्यमिति भावः ।

भीमार्जुनवधः कार्यः कौरवाणां रणाङ्कणे ।
धर्मो यं नकुलं पश्येरित्याह हरिरर्जुनम् ॥ 152 ॥
भीमेति । हे अर्जुन कौरवाणां वधः कार्यः कर्तव्यः । भीः - पापं भवेदिति भयं मास्तु । अयं शत्रुवधः धर्मः क्षत्रियाणाम् अवश्यानुष्ठेय धर्मः, कुलं न पश्येः । अस्मत्कुलीनानां पितामह पितृ-भ्रातृ-पुत्रादि-रूपाणां वधं कथं कुर्याम् इति न मन्वीथा इति भावः ।

विश्वामित्रो वसिष्ठश्च वेदव्यासः पराशरः ।
विदुरः परमात्मेति गूढमत्र क्रियापदम् ॥ 153 ॥
विश्वेति । (विदुः+अः = विदुरः) अः विष्णुरेव परमात्मा - परदैवतमिति विश्वामित्रः वसिष्ठश्च वेदव्यासः पराशरश्च एते विदुः ।

विपिने वटवृक्षस्य फलव्रातो विनाशितः ।
अत्र कर्तृपदं जानन् प्रोच्यते पण्डितोत्तमः ॥ 154 ॥
विपिन इति । वटवृक्षस्य फलव्रातः विना-पक्षिणा, विपिने-वने अशितः भक्षितः । कर्ता तु विः - पक्षि ।

पनसादिफलव्रातो नदत्भिर्विहगैर्वने ।
खाद्यते कठिनत्वात्तु किमत्र करणं वद ॥ 155 ॥
पनसैति । पनसादिफलगणः कठिनत्वात् जम्बवादिफलवत् मार्दवा-भावात् विहगैः दत्भिः = दन्तैः न, खाद्यते । अत्र दत्भिरिति पदं करण- वाचकम् ।

कावार्ता मनुजादिव्यादित्यादित्याधिपादयः ।
देवा दशाननेनेति जातो दाशरथिर्हरिः ॥ 156 ॥
कोवेति । कौ-भूमौ (कावार्ता = कौ आर्ताः) मनुजाः, दिवि - आदित्याधिपादयः = सूर्येन्द्रादयो देवाः दशाननेन आर्ताः पीडिताः इत्यालोच्य हरिः दाशरथिः जातः - दशरथात् जज्ञे ।



आप्तोपदेशात् कुशिकस्य सूनोः अस्त्राणि राजन् ! तव सूनुरित्थम् ।
उक्तेऽप्ययं पङ्क्तिरथो हि भावि-क्रिया विमूढात्मतयाप मोहम् ॥ 157 ॥
आप्तेति । हे राजन् ! तव सूनुः राघवः कुशिकस्य सूनो; विश्वामित्रस्य उपदेशात्, अस्त्राणि - अस्त्रमन्त्रान् आप्ता - प्राप्स्यति इति वसिष्टादिभिः उक्तेऽपि, पङ्क्तिरथः भविष्यत्क्रियाविमूढात्मतया - विश्वामित्रलब्धास्त्रादिबलात् रामकर्तृकताटकारिक्षोवध - धनुर्भङ्गादि रूपभाविक्रियाज्ञानाभावात् मोहमाप । बालं रामं कथं प्रेषयिष्य इति मोहं दशरथः प्रापेति भावः । भविष्यत्क्रिया विमूढेत्यनेन -भविष्यदर्थवाचकस्य आप्तेति क्रियापदस्य शीघ्रमप्रतीतिरपि ।

वने बहूनान्जन्तूनां आशयाङ्गान्यनेकशः ।
ताटका सा हता विद्वन् गूढमत्र क्रियापदम् ॥ 158 ॥
वन इति । बहूनां जन्तूनां अङ्गान्यनेकशः या आश-जघास, सा ताटकाऽपि हता रामेण इति शेषः ।

पितुराज्ञावशाद्रामः सुग्रीवोरावणाशयः ।
अङ्गदादिकमुज्झित्वा सीतान्नीत्वा ययौ द्रुतम् ॥ 159 ॥
पितुरिति । सुग्रीवोराः - शोभनग्रीववक्षःस्थलः रामः, पितुः आज्ञावशात्, वनाशय = वनं जिगमिषुः अङ्गादिकं - भूषणजातं त्यक्त्वा सीतया सह वनं ययौ इत्यर्थः ।

पादचारी माहरण्ये सीतया लक्ष्मणेन च ।
बहुपादो जटीक्षीरात् राघवोऽभूत् सवल्कलः ॥ 160 ॥
पादेति । महारण्ये सीतालक्ष्मणाभ्यां सह पादचारी सवल्कलः राघवः बहुपादः = वटवृक्षस्य क्षीरात् जटी कृतजटः अभूत् । अत्र बहुपाद इत्यनेन पदेन वटरूपार्थं स्फुटं न प्रतीरयत (?) इति भावः । न्यग्रोदो बहुपाद वट इत्यमरः ।

रामलक्ष्मणयोर्दिव्यसौन्दर्यस्य विलोकनात् ।
वैदेहीं दुस्सहावस्थां पुनश्शूर्पणखी गता ॥ 161 ॥
रामेति । वैदेहीं = विदेहजातां - मन्मथजातां इत्यर्थः । दुस्सहावस्थां शूर्पनखी गता - प्राप ।

रक्षोहृतां विना सीतां जानन् रामो न केवलम् ।
पर्यतप्यत शोकेन विदेहञ्च ददाह सः ॥ 162 ॥
रक्ष इति । रामः सीतां रक्षोहृतां - रावणेन हृतां, विना = जटायुना जानन्, स्वयं न केवलं पर्यतप्यत । किन्तु विदेहमपि (वि+देहं) रावणहत जटायुदेहमपि अदहत् ।

साऽपि दाशरथेर्योषालोकादेव सचापला ।
वैदेही दुस्सहावस्था दशाननमगात् तदा ॥ 163 ॥

सेति । दाशरथेर्योषालोकादेव - सीतासौन्दर्यदर्शनमात्रेण, चापलसहिता सा-तथाविधा वैदेही = मन्मथजाता -दुस्सहावस्था - दशाननं अगात् । सीतादेवीसौन्दर्यदर्शनात् रावणः चापलम् अतीव मन्मथपीडाञ्च अवाप इति भावः ।

केशान् निबध्य वसनं सुदृढञ्च कट्याम् उल्लङ्घयेत् भुविजनः कतिचित्पदानि ।
रामस्त्वलङ्घयदहो ननुकेश बन्ध- मात्रेण योजनशतं कपिभिस्सलीलम् ॥ 164 ॥

केशानिति । द्यूतार्थं कतिचित् पदानि लिलङ्घयिषुः जनः केशबन्ध-वस्त्रबन्ध्यादिपरिकरपूर्णो भवति । रामस्तु केशबन्धमात्रेण योजनशत्म अलङ्घयत् इत्याश्चर्यत् । (केशबन्धमात्रेण) कस्य = जलस्य इशः (केशः) समुद्रः तत् बन्धमात्रेण - सेतुनिर्माणेन योजनशतं - लङ्कावधिं समुद्रम् अलङ्घयत् इति वास्तवार्थः . (कं शिरोऽम्बुनोः इत्यमरः)

यः कबन्धं जघानाऽऽदौ दण्डकायां स राघवः ।
पुन : कबन्धमुत्पाद्य लंकामेत्यावधीदरिम् ॥ 165 ॥

य इति । दण्डकावने यः कबन्धं - तन्नामकं राक्षसं जघान-हतवान् सः रामः पुनः कबन्धम् उत्पाद्य - कबन्धं - जलबन्धं सेतुं कृत्वेत्यर्थः । शिष्टं स्पष्टम् ।

सवानरगणो रामः कटाक्षेण विराजते ।
कदनादप्रयुक्ताक्षकर्णपाशाद्विमोचितः ॥ 166 ॥

स इति । हे विराज-गरुड ! ते कटाक्षेण सवानरगणः रामः । कदेत्यादि - कं ददातीति कदः = मेघः कदनादः - मेघनादः तत्प्रयुक्तः यः अक्षकर्ण पाशः नागपाशः तस्मात् विमोचितः ।

नागपाशावबद्धास्ते मेघनादेन वानराः ।
विनाशं प्राप्य युद्धाय पुनरुत्तस्थुरद्भुतम् ॥ 167 ॥

नागेति । विना-गरुडेन, शं - नागपाशमोचनरुपसुखं, प्राप्य युद्धाय पुनः उत्तस्थुः ।

दशग्रीवे तु सैन्येन सह युद्धाय निर्गते ।
परीतं विपरीतेहविपरीतं विलोक्य च ॥
विपरीतं धवस्यैव तत्पत्नी निश्चिकाय सा ॥ 168 ॥

दशेति । परीतं दिवा। विपरीतेहविपरीतं - विपरीतं = शर्वरी, तत्र ईहा - इच्छा येषां ते च ते, वयः = पक्षिणः

घूकादयः तैः परीतं व्याप्तं विलोक्य । धवस्य - रावणस्य विपरीतं 'धव' शब्दस्य - वैपरीत्ये वध इति भवति । रावणे युद्धाय निर्गते सति । दिवाऽपि घूकादि सञ्चारात् दुष्शकुनमालोक्य मन्दोदरी रावणो रामेण हतो भविष्यतीति निश्चिकायेत्यर्थः । परीतन्तु दिवा प्रोक्तं विपरीतन्तु शर्वरी इति कोशः । (दिवान्धः कौशिको घूको दिवाभीतो निशाटनः इति अमरः)

राक्षसेशं निहत्यैव शान्तमाशामुखं ततः ।
विमुखं भीषणं राज्ञे ह्यभ्यषिञ्चत् कथं प्रभुः ॥ 169 ॥

राक्षसेशं इति । राक्षसेशं शकारान्तत्वात् - शान्तम् - आशामुखं = दशास्यं हत्वा । विमुखं -'वि' इत्यक्षर - मुख भागकं भीषणं = विभीषणं इत्यर्थः । शिष्टं स्पष्टम् । राज्ये सलिप्सं शान्तं निहत्य, राज्ये विमुखं भयंकरं (भीषणं) कथमभ्यषिञ्चत् इति विरोधार्थः ।

असितो राक्षसान् हत्वा राघवो यशसासितः ।
हरितश्च तथा कुर्वन् रक्तो नगरदर्शने ॥ 170 ॥

असित इति । असितः = खड्गात् - तथा सितः इत्यर्थः । एक एव रामः । सितः असितः हरितः रक्त इति चतुरोक्तिः अत्र ज्ञेया ।

बहुरूपकपीतस्सन् जटावानपि मस्तके ।
सपुष्पकस्सदाराति हर्षोऽयोध्यां जगाम ह ॥ 171 ॥

बहुविति । बहुरूपैः कपिभिः इतः (सन्) मस्तके जटावान् पुष्पकविमानसहितः सदारश्चासावति हर्षश्च - सदारातिहर्षः अयोध्यां जगाम । राम इत्यर्थः । अत्र बहुरूपकत्वेपि पीतत्वं, जटावत्वेपि सपुष्पकत्वं, सदा अरातिहर्षः एते विरुद्धाः इति विरोध रूपापातार्थेः अपि शब्द सूच्यः ।

असीता रावणं हत्वा ससीता रघुनन्दनः ।
अयोध्याधिपतिश्चाऽपि पुनाराज्यमवाप्तवान् ॥ 172 ॥

असीत इति । असिना इतः खड्गेन रावणं हत्वा, सीताविशिष्टः अयोध्याधिपतिः रघुनन्दनः राज्यं पुनरवाप्येत्यर्थः । असीतः ससीतः पुनः इति विसर्गाणां रेफपरत्वाद्दीर्घत्वम् । 'पुना' इत्याधुनिको नगरविशेषः । अयोध्याधिपतिरपि पुनाराज्यं प्रापेत्यापातप्रतीतविरोधः अपि चाऽऽभ्यां सूचितः ।

निश्शङ्कोऽपि कपिव्रातः सत्कृतो राघवादहो ।
शङ्कामनन्तां प्राप्याऽगात् अयोध्यायास्स्वकं पुरम् ॥ 173 ॥

निरिति । अनन्तां शंकां - अन्त्याक्षरशून्यां शंकां शं इत्यर्थः ।

अमर्त्यमुखतश्शुद्धां ज्ञात्वा सीतां सुराग्रतः ।
श्रुत्वामर्त्यमुखाद्वार्तां रामस्तत्याजतां बत ॥ 174 ॥
अमर्त्येति । सीतां सुराग्रतः लंकायां ब्रह्मरुद्रादि सन्निधौ । अमर्त्य मुखतः । अग्नेः अग्निमुखा वै देवाः इति श्रुतेः - शुद्धां ज्ञात्वापि, मर्त्यमुखात् - अयोध्यायां कस्यचन नरस्य वचनात् - वार्तां, संवत्सरं रावणवशं गतां पत्नीं रामः कथम् अङ्गीचकारेति वचनं श्रुत्वा तां सीतां तत्याज । बतेति खेदे । अमर्त्यमुखतश्शुद्धायाः मर्त्यमुखात् अशुद्धत्वं श्रुत्वा तत्परित्यागः अत्यन्तविरुद्ध इति च भाति ।

त्यक्तगोत्रादरोऽपीशः सानुगो लक्ष्मणाग्रजः ।
उत्सृज्य स्वपुरीं भूयोऽप्ययोध्यामद्भुतं ययौ ॥ 175 ॥
त्यक्तेति । लक्ष्मणाग्रजः सानुगः स्वपुरीं त्यक्त्वा - परित्यक्त - भूम्याशोऽपि पुनः अयोध्यां प्रापेत्याश्चर्यम् । अयोध्येति परमपदस्य नाम - तदवापेति भावः । एतत् श्लोकद्वयमुत्तरकाण्डकथार्थकम् ।
अस्मिन् गूढशब्दप्रकरणे कावार्ता इति श्लोकमारभ्य एतत् श्लोकपर्यन्तं किञ्चित्गूढशब्दप्रयोगद्वारा रामायणकथा संग्रहेण क्रमशः उक्ता ।

षोडशप्रकरणम् - अर्थगूढम्

उदारत्वं अपर्णायाः कविप्रीतिस्सुराद्विषाम् ।
क्षुधि भक्तादरस्त्वेते न हि राज्ञः कलौ युगे ॥ 176 ॥
उदारत्वमिति । कलौ राज्ञः उदारत्वं नास्ति किन्तु पार्वत्या एव - (उः शम्भुः) उदारत्वं शम्भुपत्नीत्वम् इत्यर्थः । कविप्रीतिः - विद्वत्प्रीतिः शुक्रप्रीतिश्च भक्तादरः - आश्रितादरः अन्नादरश्च ।

अबन्धुसन्निधौ पान्थो बध्दान्नं बुभुजे स च ।
विषं ददौ स तत्पीत्वा सुहितोऽभवदद्भुतम् ॥ 177 ॥
अबन्धिति । अबन्धुः - जलकूपः । सः विषं जलं ददौ । (विषमप्सु च इत्यमरः) सुहितः - तृप्तः । पुंस्येवाऽन्धुः प्रहिः कूप इत्यमरः ।

सदास्वानिष्टमध्यस्थम् इति मत्वेव दातृभिः ।
त्यज्यते कनकं नित्यं कान्तत्वेऽप्यर्थिनां गणे ॥ 178 ॥
सदेति । दातृणां नकारस्यानिष्टत्वात् तन्मध्यकं कनकं त्यज्यते । अर्थिभ्यो। दियूयते । कान्तत्वं = रम्यत्वं, कवर्णान्त्यत्वञ्च ।



जेतुस्सनाद इति किम् इन्द्रेणाऽधः कृतोऽम्बुधः ।
दुर्बलानां बलिष्ठेऽरौ तत्पक्षे हि पराक्रमः ॥ 179 ॥
जेतुरिति। मेघः स्वजेतुः - इन्द्रजितः सनादः इति मत्वा इन्द्रेण अधः कृतः वाहनीकृत इत्यर्थः । इन्द्रजितो मेघनाद नामकत्वात् । अरौ बलिष्ठे सति दुर्बलानां - तत्सम्बन्धिनि पराक्रमः ।

माजानिपत्कविलसत्ककुमारतात मारप्रतीकहविलोचन मानितांग ।
अम्भोजबन्धुसुतगर्वहरान्धकारे शम्भो शमत्रिनयनोद्भवशीर्ष देहि ॥ 180 ॥
माजानीति । रुद्रविषयोऽयं श्लोकः । माजानिः - विष्णुः तस्य पत्कं - पदसम्बन्धि जलं = गंगेत्यर्थः तया विलसत् कं - शीर्षं यस्य - तथाभूत मारस्य प्रतीकह - शरीर दाहकं विलोचनं यस्य तथाभूत, अम्भोजबन्धु (सूर्य) सुतः - यमः तस्य गर्वहरः । अत्रिनयनोद्भवशीर्ष - (चन्द्रशेखरः) चन्द्रस्य अत्रिनेत्र समुद्भवत्वं पुराणप्रसिद्धं । शं देहि - सुखं दद । शिष्टं स्पष्टम् ।

स्वसमानाख्य वस्त्वेष बाधते नित्यमित्ययम् ।
स्वारादिवर्णसंयुक्तभानुर्भानुं ग्रसत्यहो ॥ 181 ॥
स्वेति । 'स्वर' इति आदि वर्ण युक्तः भानुः = स्वर्भानुः राहुरित्यर्थः । स्वसमानाख्य वस्तु - तम इत्यर्थः तमश्शब्दस्यापि राहु वाचकत्वात् ।

बाले तव गळन्दृष्ट्वा क्रमुकग्रीवया समम् ।
अदरप्रीतिमानासीत् जनस्सर्वोऽपि तत् प्रिया ॥ 182 ॥
बाल इति । सर्वोऽपि जनः- अदरप्रीतिः - गळे अधिकप्रीतिमान् - (दर) शंखप्रीतिरहितश्च तव गळेन शंखो जित इति भावः ।

मध्ययोधे च वह्न्यन्ते नाद्यक्षर मुखे च ये ।
दृढे दुर्गे तयोर्लाभात् सर्वं जयति चाऽबला ॥ 183 ॥
मध्य इति । मध्य यो धे - 'यो ध' इत्यक्षरद्वयमध्यके, वह्न्यन्ते - वह्निवाचक - 'र' इत्यन्त्याक्षरे, नाद्यक्षरमुखे - 'न' वर्णः आद्यक्षरं यस्य सः पकार इत्यर्थः सः मुखभागे ययोः ते (पयोधर शब्दं भवति) दृढे कठिने एवं भूते ये दुर्गे - पयोधरयोरेव दुर्गत्वेनोक्तिः । तयोः लाभात् अबलाऽपि सर्वं जयति । दुर्गपरत्वे तु - सैन्यविशिष्ट मध्यभागे वह्निविशिष्टपार्श्वभागके अनादीति पदच्छेदः - अनादिः अक्षरश्च मुखभागो ययोः ते एवं भूतयोः दुर्गयोः प्राकारयोः इत्यर्थः ।



अपघन सारावेतावपघनसारावपि स्तनौ तस्याः ।
भजतो हि शीतलत्वं प्रकृतित एवेह शीतलाकारौ ॥ 184 ॥
अपेति ते स्तनौ अपघनसारौ = शरीरसारभूतौ । अपघनसारावपि = घनसारेण कर्पूरलेपेन-शून्यावपि, शीतलत्वं भजतः ग्रीष्मकाले इति शेषः । कथमिति अत्राह-प्रकृतित इति । स्वभावत एव शीतलस्वरूपत्वात् इत्यर्थः । शीत-लाकारौ-शि इत्यक्षरसहिता 'ला' = शिला - तदाकारौ काठिन्यात् इति तु हृदयम् । उष्णकाले स्त्रीस्तनयोः शीतलत्वं स्वाभाविकम् ।

बाले तव मुखपझं मन्ये कान्त्या न केवलम् ।
विराजिताळिकत्वेनाऽपाङ्गप्रहरणत्वतः ॥ 185 ॥
बाल इति ।तव मुखं कान्त्या केवलं पझमिति न मन्ये । किन्तु विराजिताळिकत्वेन विराजिताः अळयः यस्मिन् इति पझपक्षे । विराजितं अळिकं - ललाटं यस्मिन् इति मुखपक्षे । (ललाटमलिकं गोधिः अमरः)

तत्सौन्दर्यं चकाराद्यां महिषीषु रमां हरेः ।
कान्ते तवाऽपि सौन्दर्यं ताश्चकारादिमामहो ॥ 186 ॥
तदिति । हरेः महिषीषु - भगवत्पत्नीषु रमां तत्सौन्दर्यं - लक्ष्मी सौन्दर्यं कर्तुं आद्याञ्चकार । सर्वाधिकसौन्दर्यात् सर्वमहिषी श्रेष्टेत्यर्थः । हे कान्ते तव सौन्दर्यमपि तां-रमां, आदिमाञ्चकार अन्यसौन्दर्यं अन्यश्रैष्ठ्य हेतुः इत्याश्चर्यम् । वस्तुतस्तु तव सौन्दर्यं तां रमां चकारादिमां चरमां इत्यर्थः । चकार इत्यनुषज्यन्ते । लक्ष्मी सौन्दर्यादपि तव सौन्दर्य तां रमां चकारादिमां चरमां इत्यर्थः । चकार इत्यनुषज्यन्ते । लक्ष्मी सौन्दर्यादपि तव सौन्दर्यं अधिकमिति भावः ।

बाले तव कुचावाद्यं वर्णं कञ्चन कांक्षतः ।
साम्याय वरमध्ये तं वर्णमाख्याहि शीघ्रतः ॥ 187 ॥
बाल इति । तव कुचौ-स्वसाम्याय आदौ कञ्चन वर्णं कांक्षतः - स्वयोः किञ्चित् वर्णपूर्वकत्वे यौ भवतः तावेव स्वसदृशाविति भावः । तं वर्णं आख्याहि- 'लि' इति वर्णः स इत्यर्थः लिकुच सदृशौ तव कुचौ इति हृदयम् ।

पृथिवीमेखलाजातशीर्षवस्त्रेश्वरार्चितम् ।
जलमुक्सुमनसः पित्तमित्राशारिध्वजं भजे ॥ 188 ॥
पृथिवीति । पृथिवीमेखला = अब्धिः, तज्जातः - चन्द्रः, स शीर्षं यस्य सः रुद्रः तद्वस्त्र दिशः, तस्य दिग्वसनत्वात्-तदीश्वराः = इन्द्रादयः तैः अर्चितम् । जलमुगित्यदि - जलमुक्सुमनसः = मेघपुष्पं - जलमित्यर्थः, तत्पित्तम् = अग्निः - शुचिरप्पित्तमिति कोशात्-तन्मित्रं - वायुः, तम् अश्नन्तीति तदशाः = सर्पाः, तदरिः गरुडः, तद्धवजं - भगवन्तं विष्णुमित्यर्थः ।



वलजित्तनयस्य शत्रुः अत्रोज्वलवैश्वानरमित्रपुत्रनाथः ।
रणधूर्मुनिसत्रशत्रुशत्रू रघुनाथोऽवतु मित्रपुत्रमित्रम् ॥ 189 ॥
वलेति । वालिशत्रुः । अग्निमित्रभूत-वायुपुत्र - हनुमत्स्वामी - रणधुरन्धरः । मुनीनां सत्रशात्रवः = मारीच सुबाहु प्रभृतयः तच्छत्रुः (रघुनाथः) मित्रपुत्रस्य - सूर्यात्मजसुग्रीवस्य मित्रम् ।

मित्रपुत्रशत्रुपुत्रपत्रशत्रुराट्शयम् सत्रशत्रुपुत्रपत्रशत्रुशत्रुपत्रकम् ।
पत्रिकुत्रवृत्रशत्रुशक्रशत्रुपुत्रक भ्रातृमित्रमुग्रचापभञ्जकं समाश्रये ॥ 190 ॥
मित्रेति । मित्रपुत्र; यमः तच्छत्रुः रुद्रः- तत्पुत्रः गजाननः तत्पत्रं - मुषिकः, तत्शत्रवः - सर्पाः, तद्राट् = आदिशेषः, तच्छयम् । सत्र शत्रुः = रुद्रः, तत्पुत्रः सुब्रह्मण्यः तत्पत्रं मयूरः, सः शत्रुः येषां ते - सर्पाः । तत्शत्रुः गरुडः (पत्रकम्) तद्वाहकम् । पक्षिणश्च ते ये कुत्राः - पर्वताः तेषां वृत्रस्य च शत्रुभूतो यः शक्रः तच्छत्रुः - मेघनादः, स पुत्रः यस्य सः - रावणः तत्भ्राता - विभीषणः तन्मित्रभूतम् । उग्रचापभञ्जकं - विदेहराजस्थितरुद्रचापभञ्जकं सीताविवाहार्थं इत्यर्थः । अस्मिन् प्रकरणे अर्थस्याऽस्फुटत्वम् ।

सप्तदश प्रकरणं - भावगूढम्

कान्ते पाणियुगं बिभेति वदनात् तच्चाति वक्षोभवात्
सोऽपि श्रीकचतस्स च स्मितभराद्रोमाळितस्सोऽपि च ।
नासाया भयमेति रोमलतिकाप्येवं मिथो मोहकान् -
यङ्गान्येव हि तावकानि यदिचेदस्मासु कावा कथा ॥ 191 ॥
कान्त इति । पाणि युगस्य कमलरूपणात् चन्द्रत्वेन रूपित वदनात् भयमित्यर्थः । तच्चापि - वदनमपि विन्ध्यत्वेनाभिप्रेत वक्षोभवात् ! बिभेति । तस्य चन्द्रसूर्यगति विरोधित्वादित्यर्थः । सोऽपि चक्रवाकत्वेनाभिप्रेत वक्षो भवोपि अन्धकारत्वेन अभिप्रेत कचात् बिभेति । सच कचश्च चन्द्रिकात्वेनाभिप्रेत स्मितादित्यर्थः । सोऽपि रोमाळितः राहु ग्रास्येति भावः । रोमलतिका भ्रमरत्वेनाभिप्रेता चम्पकधिया नासाया भयमेति ।

कचात् ! भीतौ रोमावळि कुच भरौ ते गमनतः करद्वन्द्वात् दृष्टौ तरुणिनयने मध्य सभये ।
प्रहृष्टे तत्रैव स्फुटतरसरो दर्शनवशात् कुचत्रस्तं हारादभयमपि वक्त्रं समभवत् ॥ 192 ॥
कचादिति । कचं दृष्ट्वा मेघ इति भ्रान्त्या मयूर - सञ्चारमाशङ्क्य रोमावली सर्पः पूर्वं भयं प्राप्य, तव गमनात् त्वां हंस इति निश्चित्य हंस सञ्चारात् वर्षाकालो नायं इति हर्षं प्राप्तः । तव कचं तम इति ज्ञात्वा विरहकाल इति भीतः कुचरूपचक्रवाकः तव करद्वन्द्वरूपं विकचकमलं आलोक्य हर्षं प्राप्तः । मध्य सभये - मध्यरूपादा - काशात् भीतौ नयन मत्स्यौ तत्रैव मध्य एव नाभिरूपं सर आलोक्य नायं आकाश इति निश्चक्रतुः । सरस आकाशवृत्तित्वाभावात् । वक्त्ररूपचन्द्रः कुचं विन्ध्यपर्वत इत्यापाततो ज्ञात्वा त्रस्तस्म-



तत्र मुक्ताहार रूपां गंगामालोक्य नायं विन्ध्यः अपितु हिमवत् गिरिरिति निश्चित्य भयं तत्याजेति भावः ।

शशिकरपरितापात् शान्तिमप्राप्य दीर्घात् सुरगणमथराहुं सागरञ्चात्रिनेत्रम् ।
मलयगिरिज वातात् एत्य बाधान्धुशीतात् कपिकुलमथ शक्रं कामिनी काप्यनिन्दत् ॥ 193 ॥

शशीति । काऽषि विरहिणीत्यर्थः । चन्द्रस्य निश्शेष - कबलीकाराकारणात ! सुरगणं । चन्द्रं ग्रसित्वा पुनर्मोचनात् राहुं । चन्द्रोत्पत्तिहेतुत्वात् सागरम् अत्रिनेत्रं च अनिन्दत् । मलय पर्वतस्य समुद्रे अपातनात् कपिकुलं, तस्य पक्षमात्रच्छेदनेन निश्शेष नाशाकरणात् इन्द्रं च अनिन्दत् ।

देवान् पृथूञ्च शक्रञ्च कर्णं कपिकुलं तथा ।
विष्णुचक्रं विशेषेण चक्रवाकीहि निन्दति ॥ 194 ॥

देवानिति । महामेरुणा सूर्यतिरोधनात् स्वविरोधि रात्र्यागमनात् मेरुः चक्रवाक विरोधीत्यर्थः । स्वविरोधिनस्तस्य विहारस्थानत्वेन अङ्गीकरणात् देवान् निन्दति । पृथुचक्रवर्तिना निम्नोन्नतरुपां भूमिं समीकृत्य तत्र तत्र पर्वतस्यापनात् स्वस्याः पर्वतविरोधित्वात् च मृथुं निन्दति । पर्वत पक्षमात्रच्छेदकत्वात् शक्रम् । अर्थिभ्यो महामेरुं छित्वा दानाकरणात् कर्णम् । मेरोः समुद्रे अपातनात् कपिकुलं निन्दति । कालप्राप्त रात्रिव्यतिरेकेण ज्याद्रथ वधार्थम् अकालेऽपि रात्रि उत्पादनात् विष्णु चक्रं विशेषण निन्दतीति भावः ।

निशामुखे विधुं दृष्ट्वा दक्षिणञ्चापि मारुतम् ।
निजवेर्णी पुरस्कृत्य शेते स्त्री विरहातुरा ॥ 195 ॥

निशेति । निजवेण्याः राहुरूपत्वेन तत् पुरस्कारे चन्द्रोपसर्पेत् । सर्परूपत्वेन दक्षिणमारुतोपसर्पेत् । सर्पस्य वायुभक्षकत्वात् इति भावः ।

श्रृण्वन्नादरतस्तत्र सीतावृत्तं हनूमतः ।
उद्यन्तं भास्करं दृष्ट्वा भीतोऽभूद्रघुनायकः ॥ 196 ॥

श्रुण्वन्निति । उद्यत् भानुदर्शने फलभ्रान्त्या हनुमान् तत् ग्रहणाय गच्छेत् यदि सीतावृत्तान्त श्रवणविच्छेदो जायेतेति भीत इति भावः । बाल्ये उद्यन्तं सूर्यम् आलोक्य हनूमान् फलभ्रान्त्या तत् ग्रहणायागच्छदिति पुराणकथा ज्ञेया ।

स्नायन्त्याः पयसि स्वीये कस्याश्चित् तरुणस्त्रियः ।
कुचमापततो दृष्ट्वा भीतोभवदपांपतिः ॥ 197 ॥

स्नायन्त्या इति । कुचमापततो दृष्ट्वा - कलश इति ज्ञात्वा । स्वभक्षकस्य अगस्त्यमुनेः कलशसम्भवत्वेन तत्र प्राप्ति शङ्कया समुद्रः भयमवाप इति भावः ।



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

सन्ध्याकाले रघुपतिं दर्भपाणिं विदेहजा ।
दृष्ट्वावशात् तु सम्भ्रान्ता ददर्शात्मकुचस्थलीम् ॥ 198 ॥
सन्ध्येति । काकासुरम् आस्तरणदर्भात् जघान भगवान् रघुनाथः । तस्मात् तेन दभ्रग्रहणे कृते - किमिदानीमपि स काकः मत् कुचस्थलम् अखण्डयत् इति ससम्भ्रमं सीता (आत्मकुचस्थलीं) ददर्श इति भावः ।

विपिने चरतो भर्तुः पथि याश्शर्करा स्थिताः ।
ताश्च दूरीकृता भीत्या प्रणयेन च सीतया ॥ 199 ॥
विपिन इति । शर्करायाः दृषद्विशेषरूपायाः भक्तः श्रीरामस्य पादमलसम्बन्धे सति तत्राति अहल्यावत् काचन स्त्री जायेत किमिति सीतया शर्करा दूरीकृता इत्यर्थः । नारी जननशङ्कया भीतिः । शर्कराभिः भगवत् पादकमलयोः सुकुमारयोः वेदना भवेत् इति प्रेम प्रकर्षञ्चेति भावः ।

कोको दृष्ट्वा तु कस्याश्चित् तरुण्याः पृथुलं कुचम् ।
अवाप लज्जां भीतिञ्च भीतिकारणमत्र किम् ॥ 200 ॥
कोको इति । तरुणीकुच जितत्वात् कोकस्य लज्जा प्राप्तिः । कुचं महामेरुं ज्ञात्वा स्वविरोधि रात्र्यागमनहेतोः तस्य दर्शनेन भयप्राप्तिः । भयहेतोः अस्फटत्वेन भीति कारणं किम् इत्युक्तिः । अस्मिन् प्रकरणे शब्दार्थयोः स्फुटत्वेऽपि भावस्यास्फुटत्वम् ।

अष्टादशप्रकरणं - शास्त्रप्रमेयम्

कान्ते चूडामणि रवि कचध्वान्तसंघौ त्वदीयौ यस्मादेताववविदित मिथो द्वेषलेशौ हि दृष्टौ ।
तस्मात् तेषां नयनपदवीं नाभजः क्वापि नूनं तेजोभावस्तम इति वदन्त्यद्य ये तार्किकाद्याः ॥ 201 ॥
कान्तेति । चूडामणिरूप रवेः कचरूप ध्वान्तस्य च सामानाधिकरण्य दर्शनात् तेजस्तमसोः विरोधम् अभिप्रेत्य तेजोभावस्तम इति तार्किकवचनं त्वत् दर्शनमूलकमित्यर्थः ।

सखि मम कुचकुम्भद्वन्द्वमेतत् यतो मत् प्रियतम भुजदण्डाश्लेषतो वृद्धिमेति ।
तत इह घटहेतुर्दण्ड इत्याह यो वै रसिकवदवभाति प्रायशस्तार्किकोऽपि ॥ 202 ॥
सखीति । तार्किकस्यारसिकत्वेऽपि एतादृशसरसार्थाङ्गीकारात् रसिकत्वमिति भावः ।

त्वदीय कुचकुम्भयोरुपरि चित्तचक्रं मम भ्रमत्यविरतं प्रिये तरुणि दण्डशून्यन्ततः ।
विलक्षणतया विधेरिह विलक्षणव्यापृतेः विभाति तव पीवरस्तनघटस्य सृष्टिक्रमः ॥ 203 ॥
त्वदीयेति । कस्मिंश्चित् पीठे कुलालचक्रं दण्डेन भ्राम्यते चेत् चक्रस्थो मृत्पिण्डः कुलालेन घटाकारतया क्रियते । एवं च घटजनने दण्डजन्य चक्रभ्रमणंव्यापारः तत् जन्यत्वेसतितत् जन्यजनकस्य व्यापारत्व

कारात् । एवं हि लोके घटोत्पत्तिः दृश्यते । घटोपरि चक्रभ्रमणं तदपि दण्डशून्यमिति विलक्षणः तव कुचकुम्भसृष्टिक्रमः ।

दृष्ट्वा यत् तव मध्यमम्बरमिति भ्रान्तो जनस्तत्र चेत्
वापीन्तामवलोक्य कामपि पुनर्नाकाशमेतत्विति ।
बुद्धिं याति हि तद्वलग्नमपि ते शून्यं प्रिये यत् ततो
जीयान् माध्यमिकः परं स निरधिष्ठान भ्रमं वक्ति यः ॥ 204 ॥

दृष्ट्वेति । भ्रमाधिष्ठान भूतं ब्रह्ममात्रं पारमार्थिकत्वेन अङ्गीकृत्य तत्र प्रपञ्चभ्रमः अद्वैतिभिरुच्यते । निराधिष्ठानभ्रमासंभवादिति । माध्यमिकेन तु भ्रम भ्रमकारणादीनाम् अपारमार्थ्येऽपि भ्रमः सम्भवतीति मत्वा अधिष्ठान भूत ब्रह्मणोऽपि अपारमार्थ्यम् उक्तमम् । इह तव वलग्ने आकाश भ्रमो जातः पश्चात् तत्र नाभिरूपवापी दर्शनात् स बाधितः - वलग्नमपि शून्यम् । तस्मात् निरधिष्ठान भ्रम सम्भवात् माध्यपिकपक्ष एव समीचीन इति भावः माध्यमिकश्शून्यवादी ।

एतत् त्वत् कुच काञ्चनाद्रियुगळं निर्हेतुकं मे प्रिये
पक्षीभूतमतोत्र तार्किं कजनैर्यत् दुष्टतोत्घाटनम् ।
हेतोरेतदसिद्धितो न खलु सा हेत्वाश्रया सिद्धता
किञ्च त्वद्वपुषोतिलाघवतया पक्षाश्रया सिद्धता ॥ 205 ॥

एतदिति । काञ्चनमय पर्वतपक्षकस्थले आश्रयासिद्धत्व रूपं दृष्टत्वं हेतोः तार्किकैः उच्यते । इह तावत् तव कुचरूप काञ्चनपर्वतः मे हेतुं विना कारणं विना लिङ्गं विना च पक्षीभूतः प्रीतिविषयो भूतः साध्याश्रयभूतः च । अत्र हेतोः यत् तार्किकैः दुष्टत्वम् उक्तं तत् हेत्वसिद्धिरूपंदुष्टत्वमितिवक्तव्यम् । अत्रहेतोरेवाभावात् स्वरूपासिद्धरूप दोषस्यैव अत्र सत्वात् । परन्तु तार्किकैः तथा न उच्यते । आश्रयासिद्धिरूपदोषस्य सम्बन्ध विशेषेण हेतौ सत्वन्तैरुच्यते । तदसङ्गतम् । आश्रयस्य त्वत् कुचकाञ्चनाद्रियुगळरूप - पक्षस्य प्रत्यक्षसिद्धत्वेनात्राश्रयासिद्धेरभावात् । अत्राश्रया - सिद्धत्वेनात्रा श्रयासिद्धेरभावात् । अत्रश्रयासिद्धरूपदोष एव वक्तव्य इति यदि तेषामाशयः तर्हि हेतोपक्षस्यैवाश्रयासिद्धिःवक्तव्या । कुचाश्रयभूत-त्वदङ्गस्य अतिकृशत्वात् अस्मत्पक्षभूत त्वत् कुचकाञ्चनाद्रि युगळस्यअतिबृहावात् तस्यैवाश्रयासिद्धेः वक्तव्यत्वात् इति भावः ।

आस्ते व्योम्नि सरस्तमोऽपि शशिना त्वय्यस्ति कान्ते तमः
तेजोभावमथाम्बरस्थ सरसः पक्षीकृतौ दुष्टताम् ।
यद्वक्त्येष हि तार्किकस्तदपि तद्रासिक्यहानेरतः
सिद्धं सार्वजनीनमप्यपलपत्यालोक्य चित्रं रसम् ॥ 206 ॥

आस्ते इति । यस्मात् तार्किकः चित्रं रसं - विचित्र रसं श्रृङ्गार रसमित्यर्थः । अपलपति । तस्मात् तस्य



रासिक्यहानिः निश्चयः । रासिक्य हानेः व्योम-सरसः पक्षीकृतौ । दुष्टत्वं-तमश्शशिविरोधं च आहेत्यर्थः । वस्तुतस्तु नीलपीतादि समुदायं चित्ररूपत्वेन यथा सोऽगीचकार । तत्वत् लवणाम्लादि समुदायं चित्र रसत्वेन न अङ्गीचकार इति भावः ।

प्रिये पूर्णश्चन्द्रो नभसि विलसत्यङ्करहितो हिमांशो तस्मिंस्तु स्फुरति परमर्धेन्दुरपरः ।
अहो तत्रैवास्ते तिमिर विहृतिः नाक्षिणि मम द्विचन्द्रज्ञानं मे भवति कथमन्यादृशमिदम् ॥ 207 ॥

प्रियेति । नयनयोः तिमिराख्य दोषे सति नभसि यथावस्थितः चन्द्र एकः तत् समीपे तत् सदृशः अन्यः चन्द्रश्च भासेत इतीदं द्विचन्द्रज्ञानं लोकप्रसिद्धम् । इदं द्विचन्द्रज्ञानं तु विलक्षणं श्रृणु । अकलङ्कः पूर्णचन्द्र एको भासते । तस्मिन् एव अर्धेन्दुरपरः भासते तिमिर सङ्गोऽपि तत्रैवास्ते ममाक्षिणि नास्ति । कथमिदं अन्यादृशं द्विचन्द्रज्ञानं मम जातं कथयेतित्यर्थः । पूर्णचन्द्रशब्देन कान्तामुखं अर्धेन्दु शब्देन तल्लाटं - तिमिर शब्देन तदळकभारः च उच्यते । न भसि इत्यनेन तिमिरविहृतिरित्यनेन च पुरुषायितं सूच्यते ।

बाले काञ्चन पर्वतौ तव कुचौ पक्षावभूतां हि मे
लिङ्ग तत्र च मानसं मम भवेत् तन्मां विहायाश्रयम् ।
तौ गत्वापि न कुत्रचित् स्थितिमगात् प्रत्येकमाकर्षणात्
युक्तं काञ्चन पर्वत पक्षकस्थले लिङ्गाश्रया सिद्धता ॥ 208 ॥

बाल इति । काञ्चनपर्वत पक्षकस्थले लिङ्गस्याश्रयासिद्धत्वं यत् तार्किकोक्तं तत् युक्तमेव । तव कुचरूप काञ्चनपर्वतौ पक्षावभूतां प्रीतिविषयाविति तात्पर्यम् । तत्र निरतिशय प्रीतिविषयत्वे तादृशं नुमेतौ च मम मानसमेव लिंङ्गं - चिह्नं हेतुश्च तत् मां विहाय तौ प्राप्य ताभ्यामपि प्रत्येकमाकृष्टं सत् कुत्राप्याश्रयं नाभजत् - तस्मात् लिङ्गस्याश्रयसिद्धत्वं युक्तमेव इति भावः ।

तरुणि त्वदीयमवलग्नमम्बरं तदुपाश्रितस्तु रशनात्मको गुणः ।
मणिभिस्सशब्दमधिकं भजत्यतो गगनं सशब्दगुणमूचिरे बुधाः ॥ 209 ॥

तरुणीति । शब्दगुणकत्वं आकाशस्य बुधैरुक्तं युक्तमेवेति ।

रोमाळि धूमाळि गृहीत वक्षोरुहाद्रि पाति पृथु बाष्प दृष्ट्या ।
कामाश्रयाशं विलसन्तमस्यां वियोगजं ज्ञानु मिनोति युक्तम् ॥ 210 ॥

रोमाळीति । धूमाळिरेव रोमाळिः । रोमाळि धूमाळिः तया गृहीतः तत् सम्बन्धः । वक्षोरुहाद्रि पाति च यः पृथुबाष्पः अधिकाश्रुजलं - तद् दृष्ट्या तद्वन्नयनेन-लिङ्गेन अस्यां स्त्रियां - ज्ञः बुधः वियोगजं कामाश्रयाशं कामाग्निमनुमिनोतीति प्रकृतार्थः । तार्किकैः पर्वते धूमात ! यथा वाहन्यनुमितिः भवति- एवं धूम ुल्या गृहीत बाष्पादपि तदनुमितिः भवतीति उच्यते । पर्वते उन्नतस्थलात् निर्झरपतने यत् जलकणजालम् ऊर्ध्वं गच्छति तत्दूरातवलोकनवतां धूमवत् भाति । तत् बाष्प इत्युच्यते । यद्वा बाष्पः । ऊष्मा-धूमाळित्वेन गृहीतः



अद्रिपाती । अद्रिसम्बन्धि यः पृथुबाष्पः तत् दृष्ट्वा तत् ज्ञानेन आश्रयाशमनुमिनोतीति तदर्थाभिप्रायेण अत्र युक्तम् इत्युक्तम् ।

धूमाळिरास्ते हि यतस्समीपे सुश्रोणि रोमाळ्यपदेशतस्तत् ।
तनून पातस्थलमेष पुंसो वक्षोरुहाद्रिस्तव पक्ष आसीत् ॥ 211 ॥

धूमेति । पर्वतसमीपे धूमदर्शने सति तेन वह्नि अनुमितौ पर्वतस्य पक्षत्वं युक्तमेव इत्याह । तव वक्षोरुहाद्रेस्समीपे रोमाळयपदेशेन धूमाळिः आस्ते स चाद्रिः तनूजपातः अग्नेस्थलम् आश्रयः तन्वादौ नः तनूनः मन्मथः । तस्य पातस्थलं यथा कुत्रचित् स्थले दृढपतने ततः तस्मात् गळन्न शक्यते तत्वत् मन्मथस्य सर्वदा निवासस्थलमित्यर्थः । तस्मात् पक्ष आसीत् । अनुमिति पक्ष आसीत् । अस्मत् प्रीति विषयश्च आसीदित्यर्थः ।

अप्रत्यक्षं तावकं तन्वि मध्यं तस्मान्मिथ्याभूतमेतत् हि नूनम् ।
विश्वं मिथ्या दृश्यतारूप हेतो : इत्यद्वैती यत् प्रयुङ्क्ते कथन्तत् ॥ 212 ॥

अप्रत्यक्ष इति । तव मध्यं मिथ्याभूतं - शून्यं, तस्मात् अप्रत्यक्षम् - अदृष्यं भवति । अदृष्यत्वात् मिथ्याभूतम् इत्यर्थः । एवं स्थिते विमतं मिथ्या दृष्यत्वात् इति दृश्यत्व हेतुना अद्वैतिनः प्रपञ्चमिथ्यात्वानुमानं कथम् इत्यर्थः ।

भक्त्या ध्यायति यस्तमोपहमलं सत्वावहं केशवं तस्य स्यात् परदेवात्मक महा पुन्निश्चयो चञ्चलः ।
रुद्रं ध्यायतिचेत् तमोगुणनिधिं नस्यादसौ निश्चयो
युक्तं पुरुषनिश्चयो नहि भवेत् स्थाणोः परामर्शतः ॥ 213 ॥

भक्तेति । शुद्धभावंगतो भक्त्या शास्त्रात् वेदि जनार्दनम् इति सञ्चयवचनात् भगवत् भक्तिरेव सम्यक् शास्त्र जन्य ज्ञानकारणं तेनैव परदेवता पारमार्थ्य निश्चयः रुद्रध्यानात् तन्निश्चयो न भवेत् । जायमानं हि पुरुषं यं पश्येत् मधुसूदनः सात्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः । जायमानं हि पुरुषं ब्रह्मा रुद्रोऽथवा पुनः रजसा तमसा चैव मानसं समभिप्लुतम् इत्यादि प्रमाणत् । तस्मात् विष्णुध्यानात् एव महापुरुष निश्चयो भवति ननु रुद्रध्यानात् इति भावः । इममेवार्थं चातुर्याद्युक्त्यन्तेरेण दृढयति युक्तम् इत्यादिना । स्थाणुर्वा पुरुषोवा इति संशयेपुरुषत्व व्याप्यकरादिमानिति परामर्शात् पुरुष निश्चयो भवति । स्थाणुत्व व्याप्य-वक्र कोटरादिमानिति परामर्शात् स्थाणुत्व निश्चयो भवति । स्थाणु परामर्शात् पुरुषनिश्चयो न भवत्येवेति सर्वमतसिद्धोर्थः तदर्थाभिप्रायेण आह स्थाणोः परामर्शात् पुरुषनिश्चयो न भवेदिति । स्थाणोः रुद्रस्य शुष्कवृक्षस्य च ।

यस्मिन्नास्ते कार्यसिद्धिः स भक्तेष्वत्यासक्त्या साधनेच्छापि यत्र ।
सो भूत् कृष्णः पाण्डवानां हि पक्ष साधूनां तत्पक्ष भावो न चित्रम् ॥ 214 ॥

यस्मिन्निति । यस्मिन् कृष्णे कार्यसिद्धिः वर्तते भक्ताभिप्रेतकार्य साधनेच्छापि तत्र वर्तते । सिषाधयिषा



विशिष्ट कार्यसिद्धि सत्वात् स कृष्णः पाण्डवानां पक्षोभूत् इत्यर्थः । साधूनां सात्विकानां तत्पक्षभावः - कृष्ण पक्षभावः न चित्रं नाश्चर्यम् । तार्किकै सिषाधयिषा विरह विशिष्ट सिध्यभावः पक्षतेति पक्षतालक्षणमुच्यते । तदर्थाप्यत्राभिप्रेतः । साधूनां - शास्त्रज्ञानाम् । तत्पक्षभावः सिषाधयिषा विरह विशष्ट सिद्धभावरूप पक्षत्वं न चित्रं युक्तमित्यर्थः ।

सुव्याप्त तत् गैरिक मुख्य हेतु निर्धारितालपेतर चित्रभानोः ।
षड्क्तेर्गिरीणां सुमनो वरस्स सपक्षतान् चित्रमखण्डयत्ताम् ॥ 215 ॥

सुव्यापेति । सुक्ष्याप्ता - सम्यक् व्याप्ताः तथा विधाञ्च से गैरिकाः धातवः त एव मुख्य हेतवः तैः निर्धारिताः निश्चिताः । अल्पेतराः चित्रश्च भानवः दीधितयः यस्यां तस्याः गिरीणां पक्षेत्यर्थः । अधिकैः गैरिकधातुभिः विचित्र कान्तिमतः । पर्वत [illegible] र्थः । तां सपक्षतां - तथाविधं पक्ष (पत्र) वैशिष्ट्यं सुमनोवरः देवेन्द्र अखण्डयत् । पक्षच्छेदं चकार इत्यर्थः । अर्थान्तरन्तु इदमरण्यं वनहिमत् कुतः धूमात् यो धूमवान् स वह्निमान् यथापूर्वं मया दृष्टाः पर्वताः तस्मादिदं वह्निमत् इत्यवयव मूलानुमितिः जायते । तत्र सन्दिग्ध साध्यवतोरण्यस्यपक्षत्वं निश्चित साध्यवतां पर्वतानां सपक्षत्वञ्च सर्वैः पण्डितैः अङ्गीक्रियते । तदिदमुच्यते । सुव्याप्तेति । अव्यभिचरित व्याप्ति विशिष्ट तत् गिरिनिष्टः यो मुख्य हेतुः धूम इत्यर्थः । तेन निर्धारितः निश्चितः अल्पेतर चित्रभानुः भूयिष्टा निर्यस्यां गिरिपदेतः सुमनोवरः शास्त्रज्ञश्रेष्टः सपक्ष **** खण्डयदित्युक्तं तत् चित्रम् इत्यर्थः ।

कलयति बहुकंपं वृष्टि कालेषु को वा विलसति कचभारः कीदृशो येषितां हि ।
रघुपति सुखमैच्छत् व्याधराजोऽपि कस्मात् कथय शिशिरवायुः गन्धवान् स्नेहवत्वात् ॥ 216 ॥

कलयतीति । प्रश्नत्रयस्यापि, शिशिरवायुः गन्धवान् स्नेहात् इति क्रमेणोत्तरत्रयं बोध्यम् । वायुः गन्धवान् स्नेहत्वात् इत्यत्र हेतोः व्यभिचारविरोधा सिद्धिपाध सत्प्रतिपक्षरुपयन् च हेत्वाभासरूप दोषदुष्टत्वात् तत्प्रयोगस्यासाधुत्वं न्यायशास्त्रोक्तम् । तत् प्रयोगस्य प्रकारान्तरेण साधुन्वार्थं चातुर्यात् एवं प्रेरितम । अस्य श्लोकस्य अन्तर्लापि बहुर्लापि प्रकरणे वक्तव्यत्वेपि अस्य वाक्यप्रयोगस्य त्याज्यत्वेनापि शास्त्रोक्तत्वात् अत्रोक्तिरिति बोध्यम् ।

त्वद्दर्शनाशा मम पार्थिवाभूत् आशा परं मेहृदि सुप्रतिष्ठा ।
तत् सिद्धिरद्यापि न मे बभूव हृदाश्रयाशस्य कथं हि सिद्धिः ॥ 217 ॥

त्वदिति । राजदर्शनाभावात् विषण्णः कश्चन कवि राज्ञे लिखति इमं श्लोकम् । हृत्चित्तं - आश्रयः आशा यस्य सर्वदा मनोरथ पूरितहृदयस्येत्यर्थः । कथम् अभीष्टसिद्धिः - त्वदीय दर्यैव मदभीष्टं सिद्धयेत् न तु मन्मनोरथमात्रत् इति भावः । हृदयाश्रयस्य हृतं संबन्धि वह्नेः कथं शिद्धि । अतः हृदो वह्निमानिति प्रयोगि हेतोः माधितत्वं शास्त्रोक्तमिति च भावः । ?



गन्तासि किंनाथ मया विना त्वय्यत्यन्त संयोगधियां हि सत्याम् ।
कथं त्वदध्वानमहं द्वितीया न प्राप्नुयान्नार्हसि मां विमोक्तुम् ॥ 218 ॥

त्वं प्रोषितो नाथ सुखेन तिष्टन् नद्यापि नागच्छसि बाधते माम् ।
मन्युस्तु वैयाकरणाः कथं वा स्त्रीपुंस साधारणमाहरेतम् ॥ 219 ॥

दृष्टादहं कुतिरभूदधिका महान्तं सा प्राप चेद्यतिलयं भजते हि तस्मात् ।
उक्तिर्ह्यहंकृतिलयो महतीति युक्तं यत् कारणे लयवचस्तदसत्यमेव ॥ 220 ॥

कल्पस्य भाग्यवशतो यदि चार्थलाभः स्याद्राजराजमधमं मनुतेन्यता चेत् ।
दैन्यं भजत्युभयताऽपि महान् न तादृक् उक्तं महान् प्रकृतिमेति निजां तटस्थाम् ॥ 221 ॥
कल्प इति । महान् धीरोदत्तः उभयतापि अर्थलाभालाभयोः तादृक् न । गर्वदैन्यभाक् न भवति । तत् युक्तं - निजां सवासाधारणां तटस्थामेव प्रकृतिं निर्विकार चित्तत्वमेव महान् यस्मादेति तस्मात् इत्यर्थः । शास्त्रार्थस्तु महान् महत् तत्वं प्रकृतिमेति । लयकाले स्वकारणभूतां प्रकृतिमेति इति युक्तमेवेति ।

अवमन्येत चेदन्यं परिहास्य स्वयं भवेत् ।
वृद्धाद्यधः कृते रूक्षाप्यदन्तत्वं भजत्यहो ॥ 222 ॥
अव इति । अन्यं - अङ्गविकलमित्यर्थः । उक्षा-वृषभः वृद्धाद्यधः कृते - दन्तशून्यत्वात् अङ्गवैकल्य - विशिष्ट वृद्धादि परिहासकारणात् - स्वयमपि अदन्तत्वं भजति । अत् परिहासो भवति इति भावः । कः उक्षाकान् वृद्धाधिकान् अधः कृत्वो अ द दन्तो भवति इत्याकाङ्क्षायां । अत्र व्याकरण शास्त्रार्थः । उक्षा-उक्षन् शब्दः नकारान्तः वृद्धमहदाद्यतः कृते तत्पूर्वकत्वे सति इत्यर्थः - अदन्तत्वं - अकारान्तत्वं भवतीति अर्थः । वृद्धश्चासौ उक्षा च वृद्धोक्षः महांश्च उक्षाच महोक्ष इति ।

मां दृष्ट्वा फलमाख्याहि मौहूर्तिक न जातकम् ।
एकादश गुरुत्वात् स्यात् बाले सर्वत्र ते जयः ॥ 223 ॥
मां इति । काचन स्त्री ज्यातिष्कं पृच्छतिब मौहूर्तिक ! मम जातकं नास्ति । मां दृष्ट्वा 'फलं वद' इति । सोऽति चातुर्यात् उत्तरयति हे बाले त्वाम् अपश्यम् । तव एकादशगुरूत्वात् एकादशस्थाने गुरोस्थित्या सर्वत्र जयो भवेत् इत्यर्थः । लग्नात् एकादश स्थाने बृहस्पति सत्व शुभ फलमिति मौहूर्तकाः । एकादश शब्देन लक्षितलक्षणया राश्येकादशकाव बोधद्वारा तत् सदृशौ स्तनं उच्ये । तव स्तनयोः बृहत्वात् त्वं सर्वमोहकरीति भावः ।



मत्तो लब्ध धना त्वं मां मा मुञ्च गणिके जड ।
पुनर्वसुस्थितिर्यावत् तावन्मिथुन शालिता ॥ 224 ॥
मत्तेति । काचन वेश्या स्वसंभोगार्थमागतः कामुको-धन हस्तश्चेत् तेन सह रमते । नो चेत् उपेक्षते । तस्यै धनमप्यदत्वा रिक्तहस्तः कश्चित् विटः तां प्रत्याह । साऽपि स्वाभिप्रायानुगुणमेव उत्तरमाह - हे जड ! मिथुनशालिता मत्संभोगः पुनः पुनरपि यावत् ! धनं अस्ति तव हस्ते - धनं यावत् तावत् एवेत्यर्थः । पुनर्वसु त्रिपादपर्यन्तस्येव मिथुनराशित्वेन यावत् पुनर्वसुनक्षत्रं तावदेव मिथुनराशि सत्वमित्यर्थः ।

नक्रेल्पेपि गुरूर्हस्ती दुर्बलो भवदत्भुतम् ।
नक्रावाप्तिर्गुरोस्याच्चेत् तद् दौर्बल्ये किमत्भुतम् ॥ 225 ॥
नक्रेति । हस्ती-गजेन्द्रः । उत्तरार्धेन तत् न अद्भुतपित्यर्थः । तरकल्पनेनाह । गुरोः बृहस्पतेः नक्रावाप्तिः मकरराशिप्राप्तिः तस्य तद्राशिः नीचस्थानमिति ज्योषशास्त्रम् । ?

मयि रक्तस्सखि प्रेयान् प्रणयात् मदुपेक्षितः
प्रापावस्थां तुरीयान्तत् स्थितिरद्य हि कीदृशी ।
रक्तः प्राप्त तुरीयश्चेत् तेन ते किं फलं भवेत् ॥ 226 ॥
मयीति । तुरीयामवस्थां - मूच्छर्यां विरह वेदनातिशयात् इति भावः । तत् स्थितिः कीदृशीति काचन कलहान्तरिता । सखी पृच्छति - रक्त इत्यर्धेन सखी वचनमाह । रक्तः रागविशिष्टोऽपि प्राप्त तुरीयश्चेत् मूर्च्छां प्राप्तः चेत् - तेन तव किं फलम् । न किमितीत्यर्थः । रक्तः अङ्गारकः प्राप्ततुरीयश्चेत् कर्कटराशेः तस्य नीचस्थानत्वेन तेन किं फलमित्यर्थः ।

कान्त त्वं रसिकः प्रौढ नारीमन्यां किमेष्यसि ।
त्वद्योगादेव कन्ये मे बुधस्यापि हि तुङ्गता ॥ 227 ॥
कान्तेति । हे कान्त ! त्वं रसिकः रसज्ञः । मां मुग्धां विहाय अन्यां प्रौढनारीं प्राप्यसि किम्? स आह मुग्धे ! बुधस्यापि - पण्डितस्यापि मम त्वद्योगोदेव तुङ्गता - श्रैष्ठयं, न तु प्रौढनारीयोगादित्यर्थः । बुधस्य कन्याराशि उच्चस्थानत्वात् तद्योगोदेव श्रैष्ठचमित्यर्थान्तरम् ।

शूरस्य पङ्तिवदनः परिशोभिहस्तः प्रीत्याऽतुलस्समरभूमिमवाप युक्तम् ।
दृष्ट्वैव दाशरथिमस्य भयाद्य दुच्चहस्तादरेऽपि धनुषश्च्यवनं तु चित्रम् ॥ 228 ॥
शूरेति । श्लोकार्थः स्पष्टः । अर्थान्तन्तु - परिशोभि हस्तः - हस्ताख्यनक्षत्रवान्, अतुल इति युक्तं - अप्राप्त तुलाराशिरित्युचितम् । तन्नक्षत्रस्य कन्याराशिकत्वमिति भावः । उच्च हस्तादरेऽपि - हस्ताख्यनक्षत्रस्य उच्चत्वेऽपि धनुषश्च्यवनं - धनुर्लग्न पिगमस्तु चित्रं - तदुच्च समये धनुर्लग्न सत्वादिति भावः । ?



रजतगिरिनिवास स्वर्णदीप्तं शिरस्ते तदपिशिव कथं त्वं निष्पटो यासि भिक्षुः ।
अपगतमहहार्द्रातारकस्त्वं हि जाता तव गुरूवृषभत्वादीदृशी दुष्टबाधा ॥ 229 ॥

रजत इति । ते शिरः स्वर्णेन दीप्तं - स्वर्णदीप्तं । स्वर्णदी - गंगा प्रायं जटायां यस्य तत् इति च । 'अथ त्रिषु जटायां पूरणे प्राक्षी इति' नानार्थमाला । त्वम् आद्रतारकः - तदाख्यनक्षत्रवानिति । जाता । ? गुरूवृषभत्वात् - वृषभराशौ बृहस्पति सत्वात् तव दुष्टबाधा तव मिथुन राशिकत्वादपेक्षया वृषभस्य द्वादशत्वेन - द्वादशाष्टमे जन्मस्य * * * * * * * निरंगारको गुरूः करोति पीडां इत्यादि ज्योतिषवचनादिति भावः । गुरूः महावृषभः । वाह वृषभ यस्य तत्वादि च ।

विद्वाद्भर्घनपाठिनः प्रबलता या प्रोच्यते सोचिता (?)
तस्माद्यच्च जटाधिकारिपुरुषस्याल्पत्वमुक्तं क्षमम् ।
यस्मादेति ननूच्यतां स धनपाठीनाश्रयश्चेत् कविः
जातोल्पस्स जटावदाश्रयतया चन्द्रः कलावानपि ॥ 230 ॥

विद्वद्भिरिति । छान्दसेषु क्रमपाठक जटावल्लभ घनपाठीषु उक्तरोक्तरं श्रैष्ठयं सर्वसिद्धम् । अल्पसादल्पत्वं महत्सात् महत्वञ्च जायत इत्यपि सर्वप्रसिद्धम् । अतः जटावदाश्रयतया-जटावल्लभसम्बन्धात् कलावानपि चन्द्रः अल्पो भवत् । कविः - विद्वान् घनपाठीनाश्रयश्चेत् - घनपाठिश्रेष्ठसङ्गतस्चेत्, उच्चतां - विद्वत् श्रैष्ठयं याति इति भावः । जटावदाश्रयतया - रुद्रसम्बन्धात् पाठीन शब्देन मीन राशिरूच्यते । सः आश्रयः यस्य सः । शुक्रस्य मीनराशिः उच्चस्थानमिति तु हृदयम् ।

व्यापकेनापि संसर्गं छान्दसेन नचारेत् ।
घनपाठीनसंसर्गात् बुधो नीचत्वमेति हि ॥ 231 ॥

व्यापीति । बुधस्य मीनराशिः नीचस्थानमिति अवधेयम् ।

न कृषौ न च शास्त्रेत्थों वाणिज्यन्तु समाचर ।
तुलासंसर्गमात्रेण मन्दोप्युच्चत्वमेति हि ॥ 232 ॥

नेति । वाणिज्यं - वैश्यवृत्तिं । तुलासंसर्गः घटाग्रहणं, तुलाराशि सम्बन्धश्च । मन्दः जडः शनिश्च, तस्य तुलाराशिः उच्चस्थानमिति अर्थः ।

विद्वांसमेत्यैव महान् सपर्यां लभेत मन्दस्तु समेत्य नैच्यम् ।
कलावतस्थानंदतो महत्वं यातो गुरुर्मन्दगृहे हि नीचः ॥ 233 ॥ (गतो ?)

विद्वांसंमिति । अर्थान्तरे, कलावतस्थानं कटकराशिः तस्य गुरूच्चस्थानत्वात् । मन्दगृहं कटकराशि (कन्याराशिः) तस्य तन्नीचस्थानत्वात् ।



वस्तुस्थितिः निर्हेतुस्यात् पुंसां पुण्यं यशस्करम् । (नहेतुस्स्यात्)
सूर्याह्वयत्वमभजत् काव्यद्वेषेऽपि भानुमान् ॥ 234 ॥
वस्त्विति । भानुमान् सूर्यः काव्यद्वेषेऽपि व्युत्पादक काव्यज्ञानाभावेऽपि, सूरिः विद्वानिति अह्वयो यस्य तत् भावमित्यर्थः ।

अव्युत्पन्न इति प्रसिद्धमभजत् सूर्यस्तथाप्यस्य चेत्
सहित्ये तु तिरस्कृतस्वककळो जातः कलावानपि ।
मूढावेवबभूवतुः कविगुरू किञ्चायमत्यद्भूतं
ह्यप्याख्योप्यरुणाधिकार किरणावल्योरिति ख्यातिमान् ॥ 235 ॥
अविति । अव्युत्पन्नः व्युत्पत्तिशून्यः अस्य सूर्यस्य सहित्ये-सहित्यविषये, कलावान् - विद्वान् । तिरस्कृत स्वककळः - धिक्कृत स्वसाहित्य ज्ञानः जातः - ज्ञानेनेतिभावः । किञ्च * * * * * * * * विनापीत्यर्थः ।

एकोनविंशप्रकरणं - अन्यापदेशः

माकन्दे पिक वायसैस्सह भवानास्ते कठोरं रट-
न्त्येते मे समयो न चायमिति किं तूष्णीं भवान् तिष्ठति ।
लोकोयं तव भावमेवमविदन्नज्ञोथवा मूक इत्-
येवावैति ततो स्युदञ्चयशनैः त्वं च स्वरं पञ्चमः ॥ 236 ॥
माकन्देति । राजसभायां अल्पज्ञाः केचन असङ्गत प्रसङ्गाडम्बरेण जनान् मोहयन्ति । तन्मध्यस्ती कश्चन पण्डितोत्तमः इदानीमात्मप्रसङ्गस्य समयो नेति तूष्णीं तिष्ठति । तमुद्दिश्य तत् स्नेहितस्य कस्यचित् उक्तिम् अन्यापदेशेनाह । श्लोकार्थः उभयत्राऽपि स्पष्ठः ।

गुरुदारसङ्गकारी स्वभावतस्त्वं कलङ्कवानिन्दो
श्लाघ्यस्तथाऽपि सर्वैः कारणमेतत् कलाधिकत्वन्ते ॥ 237 ॥
गुर्वित्यादि । कस्यचन विदुषः आचारलेशोऽपि नास्ति । दुराचारपूर्णत्वमप्यस्ति । तथाऽपि वैदुष्येन सः सर्वश्लाघ्यो भवति । तं प्रत्युक्तिः ।

कृष्णाङ्गता सदृश भावमवाप्य मूढ मातङ्गमेषि कुतुकात् बत कोकिलेन ।
तस्मिन्नुदञ्चयति पञ्चममञ्चितं ज्ञैः किं वा करिष्यसि तदा वद वायस त्वम् ॥ 238 ॥
कृष्णेति । पण्डितेन सह कश्चन अज्ञोऽपि वस्त्रादि आडम्बर पूर्वस्सन् राजसभां याति । तमुद्दिश्य कस्यचन उक्तिः । श्लोकार्थः स्पष्टः ।



शाखाञ्चूततरोस्समेत्य च पिकव्रातस्य सङ्कूजतो मध्ये तिष्ठसि वायसाति वपुषं त्वां कोकिलाधीश्वर ।
मत्वा केचन तावकं च निनदं श्रोतुं किलाशासते जोषं भावमुपेत्य गौरवमिदं रक्ष प्रहासोन्यथा ॥ 239 ॥

शाखामिति । राजसभायां पण्डितानां प्रसङ्ग कुर्वतां मध्ये कश्चन अज्ञः बृहत् बपुः वस्त्रादिभूषितो वर्तते । तं महापण्डितं तस्य प्रसङ्गचातुरीं केचन श्रोतुमिच्छन्ति । तमुद्दिश्य कस्यचनोक्तिः ।

यो दाता पयसामपान्निधिरसौ तूष्णीं स आस्ते महान् ।
दास्यामीति पयोभराणि जगते तस्मात्गृहीत्वा बहु ।
सर्ववाचि विनिक्षिपन्नपकृपा भीतिः कणान् पञ्चषा -
त्वन्नो दास्यसिवा न वा भ्र बहुधा किन्ते वृथा गर्जनम् ॥ 240 ॥

य इत्यादि । कश्चन महोदारो महाराजः मन्त्रिमुखेनार्थिभ्यो न धनादिकं ददाति । सचदुष्टो मन्त्रि तत् सर्वं स्वसात्कृत्वा तत्र यत् किञ्चिदंशं अर्थिभ्यो ददन् तान् भर्त्सयति धिक्कुरूते च । तमुद्दिश्य कस्यचनोक्तिः । श्लोकार्थः उभयत्र स्पष्टः ।

यस्मादभ्रात् सुभीतो भजदतिरभसं मानसं राजहंसः
तेन भ्रान्तेन केकां रचयसि बहुधा मानितस्त्वं मयूर ।
तुल्यो हंसेन किंस्या मधुरनिनदता देवतावाहता च स्यात्
आन्तेऽथाति किंस्याद्वद जलपयसोः कौशलन्ते विभागे ॥ 241 ॥

यस्मादिति । कस्याञ्चित् सभायां प्राधान्येत स्थापितः कश्चन सर्वशास्त्रज्ञः पण्डितोत्तमः मूर्खेणारसिकेन सभाध्यक्षेणाधिक्षिप्तः सभान्तरं जगाम । तत् स्थाने अल्पज्ञः कश्चन पण्डितः तेनाध्यक्षेण स्थापितस्सन् स्वपक्षपातिनं तेनारसिकेन श्लाघितः मुहुर्मुहुः अट्टहासं करोति । तमसहमानस्य कस्यचन तं प्रत्युक्तिः ।

मत्तो नास्यगतिस्ततो जलकणा देया विधेयायहे -
त्यल्पं वाप्यविचिन्त्ययात्यकणो मेघस्समोध ध्वनिः ।
त्वं चेच्चातक तं प्रतीक्ष्य बहुधा स्विन्नोतिखिन्नोस्यतः
तस्मात् जीवनतो वरं हि मरणंमन्ये तदन्ये न ते ॥ 242 ॥

मत्त इति । कश्चन याचकः कश्चित् प्रभुं नित्यं अनुवर्तते । स च प्रभुः तस्मिन् निर्दयः तस्मै किञ्चिदपि दातुं बहु विलम्बते । सच याचकः क्लिश्यति । तत् क्लेशम् असहमानस्य * * * * (स स्य) कस्यचित् वैराग्येन याचकं प्रत्युक्तिः ।

विद्युत्सङ्गोऽपि तावत् शिखिनटनमहो चातकप्रार्थनं वा
शालिस्तोमप्रतीक्षा रतिपरमिथुनश्लाघनं तावदेव ।
मेघोमेघोयमित्थं प्रथितिरपि भवान् यावदास्ते ससारः
तस्माच्छैलादिषु त्वं विसृज निजरसं मा घन व्यर्थमेवम् ॥ 243 ॥



विद्युदिति । कश्चन महोदारः पात्रापात्र विवेकमन्तेरण अतिव्ययं करोति । तमुद्दिश्य तत् संज्ञस्य कस्यचन हितोक्तिरियम् । तव हस्ते धनं तावत् एव त्वयि बन्धवः पत्नी पुत्रादयश्च प्रीतिं कुर्वन्ति । याचक जनोऽपि श्लाघते । धनाभावे सर्वाप्युपेक्षामेव कुर्युः । तस्मात् अपात्रे धनं व्ययं अकुर्वन् धनं रक्षेति । उभयत्राप्यर्थः स्पष्टः ।

त्वत्तो मेघ पुराप्तजीवनमुखा ये चातकाद्या जनाः
ते मृत्युं न गता हि सन्ति भुवने सर्वे कृतघ्नायतः ।
दत्त्वा सारमशेषमत्र भवति क्षैण्यं गते कुत्र वा
मेघः किं कुरूते बतेति मनुते नत्वां स्मरन् कश्चन ॥ 244 ॥

त्वत्तइति । सर्वं धनव्रातं अर्थिभ्यो बन्धुभ्यश्च दत्त्वा दरिद्रं कञ्चन * * * * पूर्वं तस्मात् लब्धधनाः सर्वेऽपि कृतघ्नतया उपेक्षन्ते । तमुद्दियोक्तिः ।

निश्चेष्टं कलयन् वपुस्तत इतो पश्यन्न किञ्चिद्वदन्
एकोनीरतटे विशुद्धमुनिवत् ध्यायन् किमास्से बक ।
मत्स्यं कञ्चन कुक्षिपूरणकृते पर्याप्तमालक्ष्ययन्
क्षुद्रान् तान् समुपेक्षसे निकटगान् विस्रम्भहेतोर्ननु ॥ 245 ॥

निश्शेष्ट इति । कश्चन डांबिक वैदिकः धनाशया कञ्चन ग्राम - विशेषं गत्वा तत्र महावैदिकनटनं कुर्वन्नास्ते । तं प्रामाणिकं मत्वा तत्रस्थैः समर्पितं यत् किञ्चित् धनादिकं वैराग्य भावनां कुर्वन् स नाङ्गीकरोति । एवं स्ववैराग्य विश्वस्तेन केनाऽपि स्वस्मिन्नधिक धन्यादि न्यासे सति तत् कबळीकुर्यामिति तदाशयः । तं डांबिकं प्रति * * * * तन्मर्मज्ञस्य * * * * नोक्तिः ।

वायो वह्निस्समस्तं यदि दहति दहत्वाश्रयाशस्य यस्मात्
प्राणापानादिरूपादुपकृतिरधिका त्वत्त एवेह सिद्धा ।
भूत्यै च त्वां यजन्ते जगति तव जगत्प्राण इत्येव संज्ञा
तत् भूत्वाग्नेस्सहायोऽनल वद पयशो भाजनं मास्म भूस्त्वम् ॥ 246 ॥

वायो इति । आजान दुष्टस्य निर्घृणस्य कस्यचन सहवासदोषात् साधुस्वभावः कश्चित् स्वयमपि तत् साहाय्यकरणे न जानन् बधतेयाचते । तमुद्दिश्य तन्मित्रस्य कस्यचन हितवचनमेतत् । मृत्यैसत्यां भजन्त याचन्त इति । वायव्यं श्वेतमालभेत भूतिकाम इति श्रुतेः इति भावः ।

भो केतकी कुसुम ते सुभगच्छगन्धः रूपं सुवर्णसममाकृतिरङ्गहृद्या ।
यत्कण्ठकावरण कल्पनमेष दोषो नो चेत् तवास्ति कुसुमं न समं धरण्याम् ॥ 247 ॥

भो इति । उदारस्वभावः साधुशीलः कश्चित् प्रभुरस्ति । स च अतिदुष्ट - स्वपरिजनोपद्रवात् अर्थिनां सुगमो न भवति । तमद्दिश्योक्तिः ।



गोरोचना मृगमदादिम वस्तुजातं जातं कुतः कुत इदं सकलोपभोग्यम् ।
इत्थं विचिन्तयसि किं रसिका हि सारं गृह्णन्ति तज्जनिभुनं न परामृशन्ति ॥ 248 ॥
गोरोचनेति । किञ्चित् अनभिजातः कश्चित वैदिकत्व प्रामाणिकत्व शास्त्रतत्वादिभ्यनदिष्ट गुणपूर्णस्सन् सर्वैः प्रामाणिकैः पूजितो वर्तते । तत् दुष्ट्वा कश्चन कुलाभिमान मातृमूढः कथं सर्वेप्येनं पूजयन्त इति शंसते । * ।

निम्बस्य रूक्षपत्रं भक्षयकामं न मेत्यहं वच्मि ।
माकन्दकन्दळं यत् द्वेष्टि भवानुष्ट्र तत् परं मास्तु ॥ 249 ॥
निम्बस्येति । कश्चन अरसिकः निरक्षरकुक्षिं स्वभावतो मूर्खं च कश्चन पुरूष स्तौति । सर्वशास्त्रज्ञं सकलगुणपूर्णं पण्डितवरं निन्दति । तमुद्दिश्य कस्यचन वचनमेतत् । एवं च श्लोकार्थः स्फष्टः ।

भो भो संशृणु शाल्मलिद्रुम तव त्वच्छाकसंघस्य च
प्रानलयं समवेक्ष्य तत् परिणते कालं प्रतीक्ष्यासते ।
एते कीरगणाः द्रुमान्तरफलं त्यक्त्वाऽपि भूयाशया
तान्श्चेत्त्वं द्रुतमेव पक्व फलको भूत्वा निराशान् कुरू ॥ 250 ॥
भो इति । कश्चन लुब्ध धनिकं तत् स्वभावं अजातमानाः केचनार्थिन तदीय गृहादिसमृद्धिम् अयं महाप्रभुः कालविलम्बेनाऽपि अस्मभ्यं बहु दास्यतीति क्रमेण तमनुवर्तन्ते । सच लुब्धोऽपि शीघ्रं नास्तीद्यपि न वदति । तेन अन्यत्रार्जनमपि तद्वार्येण क्लिश्यन्ति । तत् क्लेशम सहमानः कश्चित् तटस्थः तं लुब्धं वदति ।

विंश प्रकरणम् - सामान्य चाटुश्लोकाः

यस्सूर्यायुतकान्तिरिन्दुवदनो भूषा प्रभालोहितः
सौम्यात्मा गुरूवर्यसेवितपदश्शुक्रैकचक्षुर्हरः ।
शैनेयाधिहरो नृणामहिशयः पक्षीशकेतुर्हरिः
सोऽयं श्रीवसुधादि नित्यपरिषत् संसेवितोऽव्यात् प्रभुः ॥ 251 ॥
य इति । गुरुवर्यैः आचार्य पादैः सेवितपदः । श्रीत्यादिलक्ष्मी प्रभृति महिषी जनेन नित्यसूरिसंसद सेवितः । अस्मिन् श्लोके क्रमेण सूर्यादि नवग्रहोक्तिः इति बोद्धयम् ।

भास्वान् त्वं करुणानिधे विधुरसि श्रीमन् क्षमाभूर्भवान्
सौम्यो देव गुरुर्भवान् दितिभुवां शास्तेति सन्मैत्रकः ।
चक्री त्वं विलसत् ध्वजोसि भगवन् किं वच्मि ते चातुरीं
इत्थं त्वेप्यनवग्रहात्मकतया यत् भासि तद्यद्भुतम् ॥ 252 ॥



भास्वानिति । कान्तिमान् । क्षमाया: - क्षान्ते: भू: वासस्थानं अत एव सौम्य: शान्त इत्यर्थ: । देवगरु: - देवश्रेष्ठ: यद्वा वेद - तदर्थ प्रदानेन आचार्य: । दितिभुवां शास्ता निगृहीता । सत् निर्हेतुकं मैत्रं - मित्रभावो यस्य स: । चुकी - सुदर्शनवान् । ग्रह परत्वे तु क्षमा भू: अङ्गारक: दितीत्यादि दैत्यानां शास्ता आज्ञापक: शुक्र इत्यर्थ: । मित्रस्यापत्यं (सौरि:) * * * * । राहुरित्यर्थ: । ध्वजशब्देन लक्ष्णतया केतुरूच्यते । इत्थं नवग्रहात्मक इत्याश्चर्यं इत्यर्थ: । अनवग्रहात्मकत्वम् - अग्रति * * * * स्वभावत्वम् इति तात्पर्यम् ।

संराड्शुचिस्त्वं समवर्ति पुण्यजन प्रचेता असि चक्रपाणे ।
चित्रं जगत्प्राणकुबेर सर्वज्ञोप्येवमास्से यदनष्टमूर्ति: ॥ 253 ॥

संराड् इति । संराट् - स्वतन्त्र: । शुचि: परिशुद्ध: हेयप्रत्यनीक इत्यर्थ: । समवर्तिन: - निष्पक्षपाता ये पुण्यजना: - साधव: तेषु प्रकृष्टं सदयमित्यर्थ: चेत: यस्य स: । जगत्प्राण - जगत्प्राण भूत सर्वान्तर्यामी इत्यर्थ: । कुबेरे - पृथिवी शरीरक । सर्वज्ञश्च आस्से । दिक्पालपरत्वे तु संराट् - इन्द्र: । शुचि: अग्नि: । समवर्ती यम: । पुण्यजन शब्देन नैऋतिं उच्यते । (यातुधान: पुण्यजनो नैऋतो यातु रक्षसी - अमर:) । प्रचेता: - वरूण: । जगत्प्राण: वायु: । सर्वज्ञ: ईशान: । इत्थं दिक्पालाष्टमूर्तित्वेऽपि - अनष्टमूर्तित्वम् - आश्चर्यम् इत्यर्थ । अनर्था- स्थिरा: यस्य स: इति भाव: ।

नाथ त्वं हि विरोधि सर्वजिदसि क्रोधिस्वरूपोसतां
शिष्टानाञ्च रमानिवास शुभकृत् सौम्योऽसि साधारण: ।
संसृत्यब्धिजुषां प्लवेश्वर भवानुक्तोक्षयानन्दको -
प्येवं चेदसमात्मतां भजसि यत् स्वामिन् तदत्यद्भुतम् ॥ 254 ॥

नाथेति । विरोधिन: सर्वान् जेत्तीति विरोधिसर्वजित् । असतां क्रोधिस्वरूप: कोपवानित्यर्थ: । साधारण: - सुलभ इत्यर्थ: । प्लव - उत्तारक इत्यर्थ:। भवान् अक्षयानन्दक: नित्यानन्द इति श्रुत्युक्त: । इत्थं समात्मतां - वर्षात्मत्वं (संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा: - अमर:)भजन् अपि, असमात्मतां - तदभावं भजसीति यत् तदाश्चर्यम् इत्यर्थ: । असमात्मतां-निस्समात्मत्वम् इति भाव: ।

षष्ठी वक्षसि यस्य भाति स वपुर्भागे द्वितीय ध्वज:
पुत्रस्यात् दशमध्वजोऽपि नवमं हस्ते च शाङ्गाभिधम् ।
यो वा द्वादशतुल्यनेत्रयुगळ: स्यात् पञ्चमो विक्रमे
सप्तं या रहितश्च सोयमधुना कुर्यात् शुभं केशव: ॥ 255 ॥

षष्ठीति । राशिगण इत्यर्थ: । (षष्ठी) कन्या लक्ष्मीत्यर्थ: । द्वितीयध्वज: - वृषभध्वज: रूद्र: इत्यर्थ: यस्य पार्श्वं भगवत् देहपार्श्वस्थले रूद्राधिष्ठानं बोध्यम् । दशमध्वज: (मकरध्वज:) मन्मथ: । शिष्टं स्फष्टम् । (नवमं-धनु: । द्वादशतुल्य-मीन सदृश । पञ्चम: - सिंह: । सप्तं तुला - तुलारहित: असमान:)



यो ध्याति तद्विष्णु पदारविन्दं तत्तस्य जन्म स्वसमं करोति । (ध्ययति - ?)
चित्रं सखे मैवमतिप्रसिद्धो लोके हि कीटभ्रमरक्रमोऽयम् ॥ 256 ॥
य इति । तत् विष्णुपदारविन्दं । तस्य पुरूषस्य जन्म संसारमित्यर्थः । स्वसमं विष्णुपदारविन्दसमं - गगनारविन्दसदृशं - शून्यमिति भावः । भ्रमरध्यानात् कीटोऽपि भ्रमरत्वं भजतीति प्रसिद्धम् । जन्म - जननम् ।

कान्ते तवक्षि मां हन्ति निर्मर्यादं कथं सदा । (ताक्षि)
मर्यादाप्यस्ति किं लोके कान्त श्रुत्यतिलङ्घिनः ॥ 257 ॥
कान्त इति । श्रुत्यतिलाङ्घिनः कर्णातिलङ्घिनः वेदातिलंघिनः च ।

कान्तेक्षण झषौ कुत्र श्रुतिमुल्लंघ्य गच्छतः ।
तत् कचं शैवलं दृष्ट्वा जल भ्रान्त्या हि गच्छतः ॥ 258 ॥
कान्तेति । कान्तायाः ईक्षण झषौ - नयन मत्स्यौ ।

विधवे त्वत् कुचद्वन्द्वं क्षैण्यं याति कथं जड ।
असत्यायान्तु करप्राप्तौ राजाऽपि क्षीणतां व्रजेत् ॥ 259 ॥
विधव इति । विध्वाकुचयोः पुरूषकरस्स्पर्शाभावेन क्षैण्यं इति भावः । (करः - राज्ञा ग्राह्यभागः बलिहस्तांशवः करा: । भागधेयः करो बलिः - अमरः)

बाले विन्ध्यगिरिस्तव स्तनयुगेत्वेको हिमाद्रिः परः
तन्मध्ये खिल पुण्य भूमिरुदिता तत्रैव वासो मम ।
भूयादित्यभिलाषतो मम मनस्तां प्राप्य तत्रान्तरा
भावात् तत् धरयोर्भ्रमत्ययि कथं विश्वा ऐतिह्यतः ॥ 260 ॥
बालइति । तन्मध्य इत्यादि-आर्यावर्तः पुण्यभूमिः । मध्यं विन्ध्यहिमाद्रियोः इति वाक्यादिति भावः । तत्रान्तरा भावात् - कुचयोः प्राचुळयेन नैरन्तर्यं - तयोः मध्य प्रदेशस्याभावेन प्राचीन वाक्येषु कथं विश्वास इति भावः ।

बाले त्वत् कुचयोरित्थं अविवेको महान् कथम् ।
क्ष्माभृद्विरोधिनः को वा विवेकः कुमुखस्य च ॥ 261 ॥
बाल इति । अविवेकः विवेकाभावः, नैरन्तर्यं च । क्ष्माभृत् विरोधिनः राजविरोधिनः, पर्वतविरोधिनं च । कुमुखस्य कुत्सित मुखस्य, कु इत्यक्षरं मुखे यस्य तस्य च । न विरोधो बलवतेत्युक्तत्वादविवेक इति भावः ।



बाले तव कथन्नष्टो मध्यकायश्शृणु प्रिय ।
सन्देह इति स प्रोक्तः संशयात्मा विनश्यति ॥ 262 ॥
बाल इति । मद्यकायः मद्यात्मक कायः । सन्देह इत्यादिः सन्देहो मद्यकायः इत्युक्तत्वात् - अस्ति वा न वा इति * * * * इति सन्देहः । यद्वा-अयं मद्यभागः । * इति वा सन्देहः ।

सक्थि श्रिया केवलमत्र रम्भा जिता भवत्याः करभोरु बाले ।
एकैक भावात्क वपुश्रियाऽपि जिता दिविष्ठा खलु सा बभूव ॥ 263 ॥
सक्थि इति । अ रम्भा मोचेत्यर्थः । दिविष्ठा सा अप्सरा इति भावः । (सक्थि क्लेबे मुमानूरूः अमरः)

प्रत्येक मस्माभिरसौ न जय्या सौन्दर्यतस्संघश एव ही माम् ।
जेष्याम इत्यप्सरसस्समीयुः सर्वास्ततो नित्यबहुत्वमासाम् ॥ 264 ॥
प्रत्येकम् इति । आसाम् - अप्सरसां - नित्य बहुत्वं तज्जयार्थं नित्यं संघश एव स्थितत्वात् नित्य बहुत्वम् इत्यर्थः । अप्सर शब्दस्य नित्यबहुवचनं व्याकरण शास्त्रोक्तं - तदत्रोच्यत इत्यवधेयम् ।

रम्भां त्वदूरु च विलोक्य लोको बाले त्वदीयोरू युगेन तस्याः ।
तिरस्कृतत्वात् बहुशस्स मेने रम्भां भुवस्तु प्रतिलोमभूताम् ॥ 265 ॥
रम्भामिति । रम्भां - मोचां । प्रतिलोमभूतां 'रम्भा' शब्द प्रतिलोम्ये 'भारं' इति भवति । श्लक्ष्णत्व सौकुमार्य शीतळादि गुणविशेषेण जनः रम्भां पूर्वं मेने । इदानीं त्वत् ऊरूशोभाजितत्वेन स एव जनः किमर्थम् एषा रम्भा भुवि आस्ते ? भुवोभार एवेति मनुत इति भावः ।

एकैकतस्तवाङ्गेषु चन्द्राद्या बिभ्यति प्रिये ।
कुचोरू गमनेभ्यस्ते भिया वनमगात् गजः ॥ 266 ॥
एकैक इति । कुचश्रिया मस्तकजयः ऊरूश्रिया शुण्डा जयः - त्वत् गमनात् स्वगमन जयः । जितवतां वनवासो हि युक्त इति भावः ।

पुण्यक्षेत्रनदी विलोकनधिया काञ्चीं समेत्याथ चेन् -
नन्वा विष्णुपदं कळिन्दतनयां दृष्ट्वा प्रमोदं गतम् ।
स्नात्वा तत्र वियन्नदीतटपथा तज्जन्मभू दर्शनं
काङ्क्षन् हैमगिरिं समेत्य वलते तत्रैव चित्तं मम ॥ 267 ॥
पुण्येति । पुण्यानि क्षेत्राणि - पुण्याः नद्यश्च । काञ्चीं - तन्नामक पुरं, मेखलां च । उपरि सर्वत्र निगीर्याद्यवसानं बोध्यम् । उत्तरात् - उत्तरमार्गात् विष्णुपदं - गयास्थं हरिपदम् वलग्नं च । कळिन्दतनयात्



रोमावळी तत्र स्नानमवगाहनम् । वियन्नदीतटपथा - मुक्ताहारम् अनुसृत्य, तज्जन्म भू दर्शनं हिमाद्रि दर्शनं - मुक्तोत्पत्तिस्थल शङ्ख दर्शनं - कण्ठं द्रष्टुमिति भावः । हैमगिरि शब्देन कुचमण्डलमुच्यते । तत्रैव वलत इति अनेन तद्विस्तारः ।

मध्ये काञ्ची तव तु मधुरा वागपि श्रीशजात व्यक्ति भ्राजत् गिरिवरयुगं तावकोरोज युग्मम् ।
मध्यं माया तरुणि वदनं पुष्करं निष्क कण्ठि श्रीरङ्गश्रीस्तव तनुरतस्सङ्ग आनन्ददस्ते ॥ 268 ॥

मध्ये इति । काञ्चीं - मेखला । वागपि मधुरा - तन्नाम पुरद्वयं च । तावक उरोजयुग्मं । श्रीशेत्यादि श्रीशस्य भगवतः जाताया व्यक्तिः स्वयं व्यक्तिः तया भ्राजत् गिरिवरयुगं - वेंकटाचलः तोताद्रिश्च मध्यं माया - शून्यम् इत्यर्थः पुरविशेषश्च । वदनं पुष्करं पद्मं तन्नामक्षेत्रं च । तव तनुश्चेत् श्रीरङ्गः - शोभायाः नर्तनस्थानं, तन्नाम क्षेत्रं च । इत्थं तव स्वयंव्यक्तक्षेत्र मुक्तिदायि पुरात्मकत्वात् इत्यर्थः ।

गंगाहार लता कळिन्दतनया रोमावलिर्नमदा
मूर्तिर्नाभिसरस्वती कुचयुगी सा तुङ्ग भद्राकृतिः ।
कान्तिस्तेऽपि कवेरभूः कचततिर्गोदा वरिश्रीः कथं
कान्ते त्वामपहाय मूढधिषणाः तीर्थाटनं कुर्वते ॥ 269 ॥

गंगेति । तव मूर्तिः - नर्मदा - केळिप्रदा । नाभिरूपसरः शोभमाना च । तुङ्गा - उन्नता, भद्रा - मङ्गळरूपा च आकृतिः यस्या सा । कवेरभूः कवेः वर्णयितुम् अशक्या । गोदान निधानां आवलिः तस्याः श्रीरिव श्रीः यस्यास्सा - रलयोरभेदात् गोदावरि श्रीः इत्यपि बोद्यम् । तव पुण्यनदीरूपत्वादिति भावः ।

श्रुत्युल्लंधि प्रिये ते नयन युगमभूत् दुष्टसङ्गात् तदेतत्
युक्तं यस्माददूरं वसति तदशुचिः श्रीधनः केशभारः ।
चित्रंत्वेतन्महात्मा कुचयुगळभरो धिक्करोति प्रमाणं
मैवं तस्याप्यदूरे प्रिय किमुभवता शून्यवादी न दृष्टः ॥ 270 ॥

श्रुतीति । अशुचिः अशुद्धः नीलश्च केशभारः । श्रीधनः सुगतः बौद्धसामीप्यात् श्रुत्युल्लङ्घनं उचितम् इति भावः । श्रीघनः शोभा पूर्णः केशभार इति अन्वयाश्च बोध्यः । महात्मा - अस्तिकाग्रेसरः महान्श्च । प्रमाणं - वेदादिकं - इयत्तारूपं मानं च । अतिबृहत्वादिति भावः । शून्यमिति वादोस्यास्तीति शून्यवादी - मध्यप्रदेशमित्यर्थः ।

मध्यं क्षीणं तावकं तन्वि कस्मात् श्रेणीभारः पृष्ठतः पूर्वतश्चेत् ।
वक्षोजातद्वन्द्वभारः प्रकृत्या सूक्ष्मं मध्यं तत्क्षये को विचारः ॥ 271 ॥

मध्यमिति । स्पष्टः अर्थः ।

लोके मत्कुचतुल्यमाह कलशं मिथ्यैव निर्मत्सरं
श्लिष्टौ तावबलोकयत्विति बलात् कण्ठे गृहीत्वा घटः ।
कट्यन्तर्निहितस्तया जिततया तोयध्वनि व्याजतो
मुञ्चेति स्त्रियमात्तशोक इव संरोदित्यसौ गद्गदम् ॥ 272 ॥

पीयूषवत् कथितमेव तु चन्द्रबिम्बं चन्द्रस्य बिम्बमिति तावदहं ब्रवीमि ।
यस्मात् प्रिये तव मुखात्मक चन्द्रवृत्ति बिम्बात्मकाधरगता हि सुधा विभाति ॥ 273 ॥

किं कर्णमप्यतिक्रम्य गच्छेत्त्वन्नेत्र मार्गणः ।
आकर्णमेव सञ्चारो मार्गणानां शृणु प्रिय ॥ 274 ॥
किमिति । त्वन्नेत्रं मार्गण इव-त्वन्नेत्रमार्गण इत्युपमिति समासः । सा तु रूपक समासमाश्रित्य चातुर्यात् उत्तरं वक्ति । मार्गणानां - बाणानां आकर्णमेव सञ्चारः । प्रयोग समये धनुगुणेन सह कर्णावध्ये वाकर्षणम् इत्यर्थः । यद्वा मार्गणानां - याचकानां, आकर्णमेव सञ्चारः - कर्णाख्य अङ्गदेशराजपर्यन्तमेव अटनं, तेनैव तेषां दारिद्रयनाशात् इति भावः । नयनयोः कर्णपर्यन्तमेव दैर्ध्यं तदतिक्रमणं न द्रष्टमिति च भावः ।

मध्यायास्सुदृशो मनोभवकला लास्यं मनोहृत् त्रपा
नेपथ्यान्तरबिंबितं भवति यन्मन्ये तदर्धोदयम् ।
प्रौढायास्सुदृशस्तु निस्त्रपतया भाति स्फुटं यत्सखे
मन्ये तच्च महोदयं तदितरं जानन्ति हिच्छान्दसाः ॥ 275 ॥
मध्या इति । मनोभवकला - श्रृङ्गारचेष्टा - तत् लास्यं । तन्नर्तनं सैव लास्यम् इति वा । मनोहृत् - मनोहारिणी । यात्रपालङ्कृता - सैव नेपथ्यं यवनिका । छान्दसाः वैदिकाः । तदितरं * * * * इत्यर्थः ।

बाले रोमलतां विलोक्य गिरिशो मत्वा स्मरज्यां ततः
कोपं प्राप्य पुनर्विलोक्य विमृशन्नायं हि मौर्वी पुनः ।
सर्पोऽयं वलयो ममस्त्विति सतामादातुमिच्छत्यहो
धारावाहिक तत् भ्रमाधिकरणे सर्वज्ञताप्यस्ति हि ॥ 276 ॥
बालेति । बाले रोमलतायाः भ्रमरावळिरूपत्वेन भ्रमरावळेः- मन्मथमौर्वीत्वेन - रुद्रस्य मन्मथविरोधित्वात्, त्वदीय रोमलतादर्शनेन रुद्रस्य कोप प्राप्तिः इति भावः । कस्यचन भ्रमस्यानन्तरं पुनश्च भ्रमः इत्येवं नित्याजायमानो भ्रमो धारावाहिक भ्रम इत्युच्यते । तदधिकरणे रुद्रे सर्वज्ञत्वम् अस्तीत्याश्चर्यम् इत्यर्थः ।

वियत्यास्ते मेघस्तटिदपि च तत्रैव लसति क्रमोऽयं प्रत्यक्षस्स इह विपरीतश्श्रृणु सखे ।
तटिद्यास्ते मेघो वियदपि तटिद्यस्ति हि पुनः घनस्याधश्चन्द्रो लसति धनुरैन्द्रं हिमरूचौ ॥ 277 ॥
वियतिति । तटिदिति- तटिच्छब्देन स्त्रीणाम् अङ्गयष्टिरूच्यते । मेघ शब्देन कचभारः । वियत् शब्देन



वलग्नं । चन्द्र शब्देन वदनं, धनुश्शब्देन भ्रूश्च ।

लोके खरजयमध्ये नन्दन विजयाप्तिरुच्यते सर्वैः ।
प्रोवाच युद्धकाण्डे मकराक्षवधं कथं सवाल्मीकिः ॥ 278 ॥
लोके इति । खरजयमध्ये खरयुद्धमारभ्य तन्नाशमध्ये नन्दनविजयाप्तिः तन्नन्दन जयाप्तिः सर्वैरूच्यते । वाल्मीकिना तु खरपुत्र मकराक्षवधः युद्धकाण्डे कथमुक्तमित्यर्थः । स वस्तुतस्तु खर, नन्दन, विजय, जय इति वर्षपाठे खरजय मध्ये नन्दन विजयाप्तिः सर्वैरूच्यते ।

यं ते माधव निस्तुलाधररसं श्रीभूमिनीला मुदा
पीत्वा हृष्टतरा भवन्ति नितरां तंत्वत् करस्थो दरः ।
पीत्वा नित्यममन्दमोद भरतः पीनाकृतिर्भात्यतो
दाराणाञ्च दरस्यचापि तवचेदाकारमात्रात् भिदा ॥ 279 ॥
यमिति । दरः शंखः शंख ध्वानकाले तस्याधरदळे निक्षेपात् अधररससंपातीत्युक्तम् । आकारमात्रात् रूपमात्रात् । भिदा-भेदः । न तु कृत्यात् । दर शब्दस्य दार शब्दस्य च आ कारमात्रं हि भेदकम् इत्यर्थः ।

अनिष्कपालस्य कथं शिवस्य महेश्वरत्वं कवयो वदन्ति ।
तथैव शक्रोप्यविपक्षघाती भेजे कथं जिष्णुरिति प्रसिद्धम् ॥ 280 ॥
अनिष्केति । निष्कं - पादपलमितं कनकं - तत् पालयतीति- निष्कपालः स न भवतीति अनिष्कपालः तस्य महेश्वरत्वं - महाराजत्वं कथं - स्वल्पकनक शून्यस्य तत् कथमिति भावः । नास्ति कपालः यस्य सः निष्कपालः स न भवतीति अनिष्कपाल रूद्रस्य ब्रह्मकपालहस्तत्वात् अनिष्कपालत्वम् इति भावः । विपक्षघ्राती न भवतीति अविपक्षघाती । अवीनां पर्वतानां पक्षघाति च ।

विरूपनेत्रो भवतां गिरीशो रमापतिर्न स्त्वविरूपनेत्रः ।
विराजमानस्थितिरच्युतो नः स चाविराजस्थितिरीश्वरो वः ॥ 281 ॥
विरूपेति । विरूपनेत्रः । विकृतनेत्रः । रमापतिस्तु अविरूपनेत्रः अविकृतनेत्रः रम्यनेत्रः इत्यर्थः । विराजमाना प्रकाशमाना स्थितिः यस्य सः वः ईश्वरः - रूद्रस्तु अविराजस्थितिः - अप्रकाश स्थितिरित्यर्थः । वास्तवार्थस्तु - विरूपाणि रविचन्द्राग्निरूपत्वेन विषमा हि नेत्राणि यस्य सः । अविरूपं सूर्यात्मकं नेत्रं यस्य सः । विराजमानस्थितिः विः पक्षी गरूड इत्यर्थः तस्मिन् राजमाना - प्रकाशमाना स्थितिः यस्य सः । यद्वा विराजः गरूडः, सः मानं-प्रमाणं यस्य स्थितेः - आसनस्य - स तथा भूतः - गरुडस्य वाहनत्वा दिति भावः । यद्वा विराज - गरुडः श्रुतिशरीरकः मानं प्रमाणं यस्य स्थितेः सद्भावस्य स इत्यर्थः । गरुडस्य श्रुतिशरीरत्वेन प्रमाण सत्वात् भगवत् सद्भावे श्रुतय एव प्रमाणमिति भावः । अविराजस्थितिः अवौ-पर्वते राजत् स्थितिः विलसत् स्थितिः इत्यर्थः । गरुडस्य श्रुतिशरीरकत्व 'सुपर्णोऽसि गरूत्मान् त्रिवृत्ते शिरो गायत्रि चक्षुरित्यादि' यजुर्वेद प्रमाणं बोध्यम् ।

सत्गोत्रजातामुपयेम ईशो गदाधरो वः प्रथितः कुभार्य ।
किञ्चाम्बिका सा प्रथिता हि कान्ता लक्ष्मीर्जडोत्पन्नतया प्रसिद्धा ॥ 282 ॥
सदिति । (सत्गोत्रजातां) महाकुलीना इत्यर्थः । कुभार्यः कुत्सित भार्यः । शेषः प्रातीति कार्य स्पष्टः । वास्तवार्थस्तु सत्गोत्रजाता शुद्धपर्वतजातां कुः भूमिः यस्य सः । कान्ता अंबिका शब्दस्य 'क' इत्यक्षरान्तत्वात् जडोत्पन्नतया लडयोरभेदात् जलोत्पन्नतया समुद्रजैनेत्यर्थ इति ।

दुर्गेते गृहिणी स्वभावकठिनात् जाता ततो दुर्मुखी
पुत्रस्सोऽपि विनायको हि विमुखो जातः कुमारोपरः ।
प्रख्यातः कुमुखस्समीक्ष्य तदिदं पीत्वाऽपि हालाहलं
यन्मुत्युं न गतस्त्वमीश तव चेत् दुर्जातमन्यादृशम् ॥ 283 ॥
दुर्गेति । स्वभावकठिनात् - क्रूरस्वभावादित्यर्थः । स्वभावतः कठिनात् - पर्वतात् । दुर्मुखी-दुर्गा शब्दस्य दुरित्यक्षर मुखत्वादिति भावः । विमुखः - पित्रोः विमुखः । विनायक शब्दस्य वि इत्यक्षर मुखकत्वाच्च । एवमेव कुमुख इत्यत्राधि । इदं - एवं रूप गृहच्छिद्रादिकम् । हालहल पानेऽपि मरणाप्राप्त्या तव दौर्भागयम् अन्यत्र न दृष्टमिति भावः ।

वृषपूर्वो हि भगवान् हरोधः कुरुते वृषम् ।
दोषाकरं हरोमूर्ध्नि विष्णुस्तु स्वपदेऽकरोत् ॥ 284 ॥
वृषेति । भगवान् विष्णु वृषपूर्वः पुण्यप्रधानः । (श्रेष्ठे सुकृते वृषभे वृषः - अमरः) । हरः वृषं - पुण्यम् अधः कुरूते । दोषाकरं - दोषाश्रयजनं हरः मूध्नि करोति, विष्णुस्तु तं स्वपदे अकरोत् अधश्चकार इत्यर्थः । वस्तुतस्तु वृषः इन्द्रः पूर्वः अग्रजः यस्य सः विष्णोः इन्द्रानुजत्वात् । वृषं - वृषभं अधः कुरूते - वाहनत्वात् । दोषाकरः चन्द्रः तं चन्द्रं विष्णुः स्वपदे - विष्णुपदे - आकाशे (इति अर्थः)

सुधां विधिरपाययत् सुरगणान् भवन्तं विषं सुमेषु बहुळेषु ते परमदान्नरास्थ्यावळिम् ।
गिरीश वरभूषणेष्वहह सत्स्वदात् भोगिनः किमत्र बहुनाकृता विषमदृष्टिरेव त्वयि ॥ 285 ॥
सुधामिति । विषमदृष्टिरिति - त्वत् विषये विधेः वैषम्य एवेति भावः । वस्तुतस्तु त्वयि रविचन्द्राग्नि रूप विषमदृष्टिरेव विधिना कृतेत्यर्थः ।

आद्रापराध सुरनायकपुत्रदत्त दिव्यास्त्रके पशुपतौ प्रथिता क्षमा किम् ।
आद्रापराध सुरनायक पुत्र दत्त चक्षुर्व्रणे रघुपतौ प्रथिता क्षमा किम् ॥ 286 ॥
अद्रेति । सुरनायक पुत्रः अर्जुनः । पूर्वार्धे अर्जुनस्य पाशुपतास्त्रं ग्रहणोद्योग कथावगन्तव्या । सुरनायकपुत्रः काकासुरश्च (जयन्तः) उत्तरार्धे रामायणोक्त * इति ज्ञेयम् ।



कथं गिरीशस्सुमनो व्रजेषु विरोधि भावं भजते हि शान्तः ।
धर्मद्विषश्शान्ति कथा कुतस्स्यात् शंभुस्स नाम्नैव शमादिशाली ॥ 287 ॥

कथमिति । शान्तः शमवान् गिरिश शब्दस्य शान्तत्वात्व शान्तः । सुमनो व्रजेषु विद्वत् * * * * * अर्थान्तरे समस्तपदं सुमनो व्रजः पुष्पसंघः । इषवः यस्य सः सुमनो व्रजेषु तद्विधीति कथमिति पृच्छति । तत् तस्योचितमेवेत्युत्तरमाह । धर्मेति-यमद्विष इति भावः । शंभुरित्यादि - शान्त इति यत् तस्य शमत्वमुक्तम् । तु नाम्नैव नाममात्रेण न तु वस्तुस्थित्येत्यर्थः । शंभु शब्दस्य शं इति आद्यक्षरशालित्वात् नाशमादि शालीति च भावः ।

अम्बरस्थानिनो भूताः तववासस्थलं गिरिः ।
तथाऽपि रुद्रजातोऽसि चित्रमेतत् दिगम्बरः ॥ 288 ॥

अम्बरेति । तव भूताः भूतवर्गाः अम्बरस्थानिनः । वस्त्रस्थानाधिकारिणः वस्त्र वणिज इत्यर्थः । अम्बरं आकाशरूपस्थानिनः तेषां आकाश चारित्वात् इति भावः । तव गिरिः वासस्थलं वस्त्राणां आश्रय इत्यर्थः तव वासस्थलं कैलास इति भावः । तथाऽपि दिगम्बरो जातोसीतियत् तत् चित्रमित्यर्थः ।

चन्द्रचूड भवान् सप्ततन्तु ध्वंसकरः खलु ।
तन्तुध्वंसस्वभावस्य नग्नत्वमुचितं तव ॥ 289 ॥

चन्द्रेति । सप्तन्तु ध्वंसकरः वस्त्रहेतू भूतानां सप्तविध तन्तूनां नाशक इत्यर्थः । सप्ततन्तुः क्रतुः तत् ध्वंसकरः दक्षकर्तुक यज्ञनाशक इत्यर्थः

आत्मानं रसिकं वदेदिति जनस्संश्लाघनं शंकरो
मूर्ध्ना स्वेन कलावतो वितनुते व्यर्थो हि तस्याशयः ।
श्लाघातोल्प कलावतो रसिकता नैवास्य चेत् कल्पितं
रासिक्यं कविभिस्तु तत्र कवने हेतुस्सुराप भ्रमः ॥ 290 ॥

आत्मानमिति । कलावतः विदुषः चन्द्रश्च । विद्वत् श्लाघनं रसिकत्वज्ञापकमिति भावः । तत् रसिकयं तस्य रूद्रस्यानसिद्धे * * * * * इत्यादिना । अल्पकलवतः किञ्चित् ज्ञस्य, एक कलस्य - चन्द्रकलस्य च । अस्य चेदित्यादि-अस्य रासिक्यं कविकल्पितं चेत् कविभिः तत् कल्पने कारणं । सुराप भ्रमः सुरापस्येव भ्रमः सुरापो समा असंगतं प्रलपति-तद्वत् असंगत-जल्पनमेवेति भावः । यद्वा-सुरापभ्रमः - अपां समूहः आपं, सुराणां आपं - (गंगाजलमित्यर्थः) - तत् भ्रमः तत् भ्रमणेमेव हेतुः । एतदुक्तं भवति । रसः जलं, अत्रास्तीति रसि, कं शिरः, रसिकं यस्य सः रसिकः । तत् भावः रसिक्यम् एतदर्थाभिप्रायेणैव तस्य रासिक्यं अत्युक्तं भवेत् - न रसज्ञत्वादिति ।



गाङ्गेय सत्वेपि गृहेत्वमेषि दुर्वर्ण पृथ्वीभृत मीशलोभात् ।
लुब्धत्वमेतत्त्यज लुब्धताहि पुरार्जुनात् ताडनहेनुरासीत् ॥ 291 ॥

त्वं साधु पटल सत्वेपि अगतलवासीदिगंबरोयासि ।
एतत् चित्रं शंभो वदतबुधा अत्र चित्रतां बहुधा ॥ 292 ॥

पुष्पाङ्कुराद्याढ्य महीरुहाणि फलं जनेभ्यः ददतीहयुक्तम् ।
स्थाणुः समस्तान्यपिकांक्षितानि फलानि भक्ताय ददाति चित्रम् ॥ 293 ॥

पतितेन नजातुसुधीः सह वसतिं कलयेत बुद्धि मोहात ।
पतितद्विजसहवासात् सकलकलानाशमेति यंच्चन्द्रः ॥ 294 ॥

कलावत्प्रकाशासहो योस्ति लोके सदन्तालि नाशं द्रुतं यातिदैवात् ।
कलावन्त माच्छाद्य चन्द्रं तटित्वान् यतो नीरदत्वं भजत्येषपश्य ॥ 295 ॥

समन्तुरप्यब्धि सुतांप्रपन्नः स्याच्चेन्तमीशो वतिमाधवस्सः ।
न कस्यवादारजनाभिमानः छायाश्रितस्यास्ति किमर्कतापः ॥ 296 ॥

चित्तेवाच्यधरेऽमृतं वितनुषे विष्णु प्रिये त्वं तथा
जीवं जीवपतंधिया गुणगणैः ग्म्यामतिक्रामसि । ?
क्षान्त्या कुंभवरं मुखेन समयस्यंब स्तन द्वन्द्वतः
संपत्बुद्धिधरार्थिनां वसुमति संधायदत्सेरमे ॥ 297 ॥

लेभेधन्यं वलयनिकरं शंकरः शैलकन्यां, विष्णुं कान्तां कमलतनयां माधवः सस्वजेहि ।
भेजेमत्स्यो मधुरिपुकरः कन्दरं सिंहराजः वाणीगृध्रो जलधितनया केशवे प्रीतिमाप ॥ 298 ॥

बलेनास्येन सत्येन हरिश्चन्द्रो जितस्त्वया ।
वाचा स्थैर्येण दानेन प्रभुश्रेष्ठ पयोधरः ॥ 299 ॥

राजन् शरस्य तवलाघव मद्भुतंहि सामन्त राजनिवहेषु भवत्प्रयुक्तः ।
चिछेद तत्तदवरोध वधूजनानां सूत्राणि तानि युगपत् गलदेशगानि ॥ 300 ॥

राजन् वनौकसोऽभूवन् भवतः शत्रवोयथा ।
वनौकसोपिहि तथा बभूवुस्तत्पुरौकसः ॥ 301 ॥

युद्धे प्रयुक्तमरिणानिखिलास्त्र जालं प्रत्यस्त्रतः क्षितिप खण्डयसि क्षणेन ।
किन्त्वद्भुतं धृत तृणास्त्र करेचतस्मिन् न ज्ञात तत्प्रनिविधिः समरादपेषि ॥ 302 ॥

तृणमत्युपकारकं भवेत् इति वार्ता नमृषैव भूपते ।
भक्तारचितापदः द्विषः तृणमासीत्खलु रक्षकं युधि ॥ 303 ॥

दानोन्मुखो महाराज यदा भूस्त्वं तदैवहि ।
अनादित्वमवाप्याभूत् अपूर्वः कल्पकोद्भुतम् ॥ 304 ॥

दुर्गे तैलाद्रवस्त्रं दद दकमितः कस्यहेतोश्शिरोर्थे
किंस्यात् तत्रारुडेषा बत कथमपतं सैरभात्तत्कृतोवा ।
मामारुढं हि वन्यो मम वृषभधिया पातयत्सैर भेन्द्रः
श्रीमन्नित्यं विचारः समजनि शिवयोः त्वद्यशोव्याप्ति भूम्ना ॥ 305 ॥

इन्द्रात्पृष्टो गिरीशः निजहयमथ मद्वाह युक्तोहियातः
द्रष्टुं यास्याव एही त्यविदितहयगुः तेन चान्विष्य दूरम् ।
ब्रह्माणं प्राप्य चाहत्वभिमत मथतौ सोपि मत् हंसयुक्तौ
युष्मद्वाहौहि यातौ क्वचनवयमितो त्वेषणात्कान् भजेम ॥ (?)

आदिश्येत्थं समन्विष्य च सशिवहरिः तानलब्ध्वा विषण्णः
विश्णुं नत्वाह सर्वं सचपुनरथ तानाह वो वाहवर्याः।
संति क्षीराब्धि तीरे कथमपिसपुनः ज्ञेय इत्येव मुक्ताः
तद्धेतु न्यायवित्वात् निजसदनमगात् नाथ ते कीर्ति भासा ॥ 306 ॥

इन्द्रोप्यन्विष्य वाहं यम महिष मवाप्यात्म मातङ्ग बुध्या
स्वारुढस्तं कथञ्चित् निजपुरमनयत् दक्षिणा ध्वैक चित्तम् ।
सोपिक्रोधाच्चरन्तं सुरहय महनत् श्रृंगतः सोवरुहय
त्यक्तवा तं प्राप दैवान्निजहयं अहिहेदं भवत्कीर्ति भासा ॥ 307 ॥



सर्वा नद्योपि गङ्गास्सकलशिरवरिणः शैवशैलास्समस्ताः
नागा ऐरावतास्ते सकलजलधयः क्षीर पाथोदयश्च ।
सर्वेप्यश्वास्सुराश्वास्सकल सुनयना ब्रह्मपत्न्यः पुमांसः
सर्वे रुदा अभूवन् अहहगुणनिधे नाथ ते कीर्ति भासा ॥ 308 ॥

कतिपय दिवसैः क्षयं प्रयायात् जलनिधिरेष कृताद्रि संघरक्षः ।
इति मुदमुपयाति शक्रपाणिः वितरण चेतसि तादृशि त्वयीश ॥ 309 ॥

कस्त्वं जिष्णोर्भटोहं किमिति घटकरोयामि तोयाय गङ्गां
कस्मैतत् नन्दनस्थामरविटपिकृते तोयसेकः किमर्थः ।
म्यानत्वं यातिनिर्हेतुक महह भयादिन्द्रत स्तान् जलैर्वा
सिंचामीत्येवमादिर्जगति कलकलो नाथते दान भूम्ना ॥ 310 ॥

अचिन्तितैरप्यधिकैरभीष्टैः सन्तोषयत्यर्थि जनान् त्वयीश ।
चिन्तां दुरन्तां समवाप्य जातः चिन्तामणिस्सार्थक नाम धेयः ॥ 311 ॥

कर्णादप्यतिशयितं विलोक्यचत्वां वैयर्थ्यं वदितुमसौ विधिस्तु तस्य ।
आधत्ते बत तदभावतोधुना तत्तुल्याख्य श्रवणयुगस्य कुण्डलित्वम् ॥ 312 ॥

शाट्याद्या मम वञ्चिता प्रियवधूः तत्कोपशान्त्यै मया
गत्वा तत्कर कन्तुकेत्वपसृते मामास्पृशेदम्मम ।
द्रष्ट्वा त्वामिह तास्त्यजेयु रपि हायासांत्व मित्यन्ततः
तन्वंग्यायदुदीरितं क्रकचवत्तन्मे मनः कृन्तति ॥ 313 ॥

रक्षोहस्तगतेति ते मयिकृपा भावात् अशक्त्याथवा
स्वामिन् मासमुपेक्षसे मम पुनर्गत्यन्तरा भावतः ।
स्मृत्वा त्वां मरणं भजेयमिति मां शोकात्वन मन्मुखात्
तन्वंग्या यदुदीरितं कृकचवत् तन्मे मनः कृन्तति ॥ 314 ॥

वसिष्ठो नार्त्विज्यं हविरथच नैच्छन् सुरगणाः स्वयं चेद्राजर्षिः तदपिमहसा गाधितनयः ।
त्रिशंङ्कुं चण्डालं सुरपदमनैषीत्सवपुषं क्रियासिद्धिः सत्वे भवति महतां नोपकरणे ॥ 315 ॥



तप्तोहं तरणेः कठोर किरणैः बालेतदस्यां महा -
नदयांस्नातुमसौ मया हृदवरः शक्यः प्रवेष्टुं किमु ।
मामापान्थहृदेद्यसन्ति बहवः दुर्जन्तवो केंस्तगे
गच्छेयुः तइति स्त्रियानिगदितं कालंप्रतीक्ष्यस्थितः ॥ 316 ॥

बाले कोवा प्रपायां नहिमदिह परः पान्थते पेक्षितं किं
बाले जाता पिपासा षथिक तवतुषा कुत्रशीतामृते मे ।
आस्ते कान्त द्विधातत् घटपट गतयोः कुत्र कान्ते पटेपि
स्याच्चेत् केषां द्विजानां इति कलवचनैः सूचयन्ती मचुंबत् ॥ 317 ॥

बाले विप्रकिमत्रवस्तु मधुनायुक्तं किमंभोरुहं
नैतत्पृष्टमिह क्षपेशवदने वासो मम प्रश्नभूः ।
तर्हयस्ति द्विज वाससो मधुकि मित्युक्तः सचातुर्यतः
तत्तेस्तिद्विज वाससीति पथिकः प्राह प्रपापालिकाम् ॥ 318 ॥

बाले देयं पयोमे पथिक पशु भवन्माहिषंवानतत् कं
किं शीर्षं नोवनन्त द्विपिनमवगतन्दण्डका खाण्डवंवा ।
नोवारः कस्य भानुप्रभृतिषु नविषं तद्विहालाहलः किं
नोकाण्डः किं सदण्डः नहिनहि भुवनं भूर्भुवस्वः किमिष्टम् ॥

नोबाले पुष्करं तत् किमु करि करगं नो कृशं किं नुदर्भे
नो बाले तत्कबन्धं किमु वपुरशिरः सर्वतो वक्रमेतत् ।
किं तत् (ब्रह्मोत्तमांग) धातुश्शरीरं नरवलु धनरसः किं नव स्वादिमस्स्यात्
बाले जानीहि तन्नीरदसुममिति भोः किं सुमं दन्त युक्तम् ॥

कीलालं तद्धि रक्तं किमु नहिकमलं पङ्कजं किं तवेष्टं
नो तत् बालेऽमृतं स्यात् पथिक स भवतः कांक्षितः किन्तु मोक्षः ।
बाले कोनाममोक्षः पथिक रसिकधृक् गोचरो यस्सवेत्ति (?)
उक्तेतस्मिंस्तु नीवीं स्पृशति परवशा सा, प्रपापालिका भूत् ॥ 319 ॥

आलिंग्यश्लथनीविकां प्रियतमामारोप्य पर्यंकिकां
रन्तुं यत्नवति प्रिये जडनकिं दृश्यात्वया तादृशी ।
क्ष्माभृन्नर्तन चातुरीति कथितं छन्दं हि जानन् मुदा
लेभे तत्पुरुषायितोत्सव सुखं कामी कृतार्थोत्तमः ॥ 320 ॥



त्वत्कचात् कुसुमव्रातं मयिवर्षय कामिनि ।
इत्युक्ता नायिका यत्नं अकरोत्पुरुषायिते ॥ 321 ॥

चन्द्रबिम्बे तमः क्रीडा मया दृष्टा प्रियेनिशि ॥
इत्युक्ता सस्मिता बाला क्रीडा परवशा भवत् ॥ 322 ॥

कान्तेन्तरिक्षात् भगणाः पतन्ति पश्यास्य कालस्यहि वैपरीत्यम् ।
नो नाथ कालस्य तदावयोस्तु रतेरिति प्राह वधूस्मितेन ॥ 323 ॥

जारेण स्वगृहं गतेन सुतनुः नर्मालपन्ती रह-
स्यायाते दयिते निजे सखिसखि ज्ञातासि पुवेषतः ।
मन्नाथानुकृतिं करोषि तदलं याहीतिचोक्तश्शनैः
जारस्सोपससार कोहि वनितां जेतुं पुमान् शक्नुयात ॥ 324 ॥

कान्ते प्राप्य कवाटताडनकरे जारेण युक्तागृहे
पादस्थं अपवाहय कण्टकमथ प्राणेश्वरायाम्यहम् ।
इत्युक्त्वैव समाप्य तां रतिमहो निश्शंक सीत्कारतः
नीत्वा न्यायनमादरात् तमबला स्विन्ना कवाटं जहौ ॥ 325 ॥

रात्रौ बध्वा कवाटं हयुपपतिमबला प्रीणयन्ती धवेना-
प्येत्य द्वारः कवाटे करतलनिहते साप्यनुद्घाटथ नाथ ।
कान्ता गेहानि गच्छ त्वमिहतु कलये ध्यान मेकाकिनी चे-
त्येवं जारस्ययावत्बहिरपसरणं प्राप मिथ्याप्रलापम् ॥ 326 ॥

रात्रौ जारयुता वधू पतिमपि प्राप्तं विदित्वाररं
प्रोद्घाटय प्रियलोचने करयुगादाबध्य लीलामिषात् ।
केयं हात्र सखी वदेत्यकथयत् कांश्चित् सखीं सोवदत्
जारेचापि शनैर्गते नखलु काप्यत्रेति मुकत्वा हसत् ॥ 327 ॥

सखि रटति समन्तात् कुक्कुटै विह्लांगो मम गृहपति रेष्यत्यद्य निद्राकुलाक्षः ।
अररमर मिहोद्घाट्यादरा देहि शय्यां अवददिति शठन्तं प्राप्तमालोक्य कान्ता ॥ 328 ॥ ?



भृङ्गीभूतमहं विलोक्य सहसा कीटं विशोकाभवं
याते प्राणसमापते प्रियतमा तद्ध्यानतोहं परम् ।
भूत्वा सैव तवांगसंगमसुखं लप्स्ये भवान् किं करो-
त्यित्याहान्यवधूरतं स्वदयितं क्रोधाश्रु युक्ता वधूः ॥ 329 ॥

कस्त्वं पुष्पायुधस्य प्रियतम सचिवः चूतजीवातुरुर्व्या
स्त्रीकण्ठोदाहुतित्वे कविपरिगणितः कोकिलः तात कस्त्वम् ।
शिटाः श्राद्धादिकाले करधृतबलयः यं प्रतीच्छन्ति भक्त्या
सोहं रम्यस्वरूपः शुभतरनिनदः वायसाचार्य वर्यः ॥ 330 ॥

कस्त्वं लोहित पक्षकः चरसि भो ताक्ष्योण्डजानां पति
रेरे नोपि किमां कुतः कुलगुरः नोविष्णु वाहो जड ।
वाहः किन्वधिकः कुतोपि चगतेः मूढैतदास्तां भवान्
निंबखादसिकिं नहीति करटैराकर्ण्य हीही कृतम् ॥ 331 ॥

यूयं केवा महान्तः नृपमुख धनिकैः लालिता वाहवर्थाः
सेनाङ्गे मुख्य भूताः कथयत किमुवः कर्षणश्रेष्ठविद्या ।
नोनोधिग्वः कएषः पुरतइह महान् लंबते हन्त शुण्डा
किं तत्कृत्यं जलाद्याहरण महह वो नाम किं नागराजाः ॥ 332 ॥ (द्यात्म)

केस्मन्तुल्याहि यूयं श्रुणुत रचितभू कर्षणा त्याद्यकृत्याः
मध्यान्ह स्नानतो थो रचित तृणजलाहार रोमन्थ केज्या : ।
सैरभ्या धर्मपत्न्या सह, रति सुखतः कालशेषं क्षिपन्तः
निद्रां कुर्मश्च गोष्ठाश्रम शुचिशयने, सैरभा वैदिकेन्द्राः ॥ 333 ॥

कस्त्वं ब्राहमण वैदिकोहि सुभगे, संगीत धीस्तेस्ति किं
स्वल्पा सा, मम तर्हि किंचन पदं ब्रूह्योमिषे माद्दिज ।
हन्तालं कति वा, स्वराः कथयमे संगीत धी रस्तिचेत्
चत्वारः सुभगे कथं सरिगमा नो तर्हि उदात्तादयः ॥ 334 ॥

Full Sloka not readable in the manuscript.
बाले कुत्रच नैपुणी तव भवेत् वीणा विधौ सा कदा वीणाभ्यास दशा ॥ 335 ॥



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

द्विजान् विसृज्यैव कदाचिदेषो प्रकाश्यवातान् पदजातमेव ।
वदत्यहो छान्दसतात्र हेतुः वर्णक्रमज्ञान विहीनतावा ॥ 336 ॥

तिष्ठ स्वशास्त्रे तवकिं ममोर्ध्वे कोपं बलंवर्तति त्यक्ष क्रोधम् ।
आगच्छ येषा गृह रोचनस्य गुरोवयान्नं सवज्रं भुजावः ॥ 337 ॥ ?

नमेस्ति क्रोधः सखपाणिनित्वं साकंच क्षिप्रंवदश्लोकमुक्त्वा ।
एतद्दै एषस्य गृहे गच्छावो श्यामांच प्रायच्छ दयं ददाति ॥ 338 ॥ ?

समन्मथः सर्वजिदेकएव ध्रुवं तदत्यल्प शराहताश्चेत् ।
भवन्ति नारीगृहकुंभदासाः उपेन्द्रवज्रायुध शंकराद्याः ॥ 339 ॥

अस्माभिश्चेत् त्वद्गुणाम्भोधि बिन्दुः ज्ञातुं शक्यो नैवलक्ष्मीश सापि ।
नावैतित्वां ध्यातियानन्य कात्मा हन्तिप्रज्ञा शलिनीयोपिपंक्तिः ॥ 340 ॥ ?

Slokas 341 and 342 not readable in the manuscript (torn).

सर्वे कदाचि दबला स्मरणान्मुनीन्द्राः यान्ति स्मरस्य वशतां चपलः प्रकृत्या ।
तत्सन्तिधौ न पुरुषः विकृतो भवेच्चेत् हय्यं ॥ 343 ॥

तमोनिशामुखे नाथ पापरक्षस्तुबाधते ।
त्वभ्भक्तिजन्तु सत्वाख्यं अहस्तदवलुंपतु ॥ 344 ॥

विभ्राजतेयद्यतयो विशन्ति- श्रीभूमिनीलेश्वर तेतुभक्ता ।
स्वर्गादि लोकान्निरयायमत्वा तदेव सययान्ति पदं सदायत् (विभ्राजते) ॥ 345 ॥

लवण जलधि मध्यात् उत्थितं पांसु जालम् कपिभि रुदधिमध्ये पातिताः सेतु हेतोः ।
बृहदचलगणाये तन्नितंब प्रदेशे मद गज गण खाते चण्डवात प्रचारे ॥ 346 ॥

गङ्गा रुरोद निधनान्नरकासुरस्य विष्ण्वंघ्रि पंकज भवे क्षिति देव नद्यौ ।
स्वम्नीयतां अलभतावनि भूः सयस्याः साबन्धुवर्ग विरहासहन - स्वभावा । गङ्गारुरोद ॥ 347 ॥



क्रिया सिद्धिः सत्वे भवति महातां नोपकरणे * * * *
यो नभ्राता न चरथगजोश्वादिनिवहाः ।
द्विष क्सेनासातु प्रबल बहुरक्षोगणयुता
तथापि श्रीरामः सबलखर मेको हनदरं । क्रियासिद्धिस्सत्वे ॥ 348 ॥

Slokas 349 and 350 not clear in the manuscript.

तिर्यक जन्तुरपि प्रकृष्ट मनघं धर्मं ररक्षाभ्दुतम्
व्याघ्रादाप्त भयः पुमान् तरुमगात् यस्तं प्लवंगोहत्यपात् ।
नस्मिन्नप्यभय प्रदान कृति सद्रोहंचकारो धृणः
कीशस्सोपि महान् कृतघ्नमपि तंव्याघ्रादरक्षत्पुनः । तिर्यक् जन्तुरपि ॥ 351 ॥

कालस्थान भिदावशात् भवति खल्वेकंहि वस्त्वन्यथा-
यश्चन्द्रो निशिभाति निस्तुल महाकान्तिः सएवाहनि ।
प्राप्नोत्यप्रभतां मयूरसभया नागाः शिवंचेद्गताः
प्राप्ते षड्वदनेपि वाह सहिते तिष्ठन्ति निस्साध्वसाः। कालस्थान ॥ 352 ॥

लवण जलधि मध्ये पुष्प वृष्टिः बभूव रघुकुलपति पत्नीं जानकीं दृष्टुकामात्
जलधिमतिगभीरं लंघयन्तं जवेन पवनं तनय मुद्दिश्यादरात् देव मुक्ता । लवण ॥ 353 ॥

Sloka 354 not readable in the manuscript.

द्वाविंश प्रकरणं - अनुप्रासादिकम्

छेकानुप्रासः

पुरापुरादितेयास्तु येनामृतमृतंसखें ।
तेन तेन विनाश्रेयो मेनमेनच्छिदं भज ॥ 355 ॥

मारमारमणः पातु नीर नीरज लोचनः ।
सारसारं क्वतत्ध्यानं धीर धीर तराक्वमे ॥ 356॥



लाटानुप्रासः

शङ्करः शंकरोजिष्णुः जिष्णुः किंच विधिर्विधिः ।
सर्वान्तर्यामिन श्रीशे सहाये सन्ति केशवे ॥ 357 ॥

द्रौपदी द्रौपदी स्यात्किं पाण्डवाः पाण्डवाः कथम् ।
वृष्णयो वृष्णयः किंस्यु कृष्णे भवति नावनौ ॥ 358 ॥

वृत्यतुप्रत्सः

शुचायि चेतः किमुते पयोमुचा कचाकचि क्रीडन दक्षया तया ।
रुचा लसन्तं हरि मिन्दिरापतिं निचाय्यतं मृत्यु मुखात्प्रमुच्यते ॥ 359 ॥

पारावारसुतापयोधरतटीपाटीरसारच्छटा
संचर्चापरभागकान्तिविलसद्धाराधर श्रीतनो ।
सारं भोरुड खर्व गर्व हर दृक् नारायण श्रीपते
घोरापारगभीरसंसृति महाकूपारतः पाहिमाम् ॥ 360 ॥

Sloka 361 and 362 not readable in the manuscript

विरोधाभासः

गजास्यादर शालीशोप्यगजास्यादरो भवत् ।
विपक्षच्छिदपीन्द्रोभूत् अविपक्षच्छिदद्भुतम् ॥ 363 ॥

शेषार्चित पदांभो जोप्य शेषार्चित पद्दरिः ।
विराज मुखशाली सोप्य विराज मुखोद्भुतं ॥ 364 ॥

पुनरुक्तवदाभासः

स्रष्टा स्वयंभूर्लोकेशः धाताजश्चतुराननः ।
जिष्णु स्वाराट सुरश्रेष्ठा हरिनारायणोवतु ॥ 365 ॥



सर्वज्ञ श्रीघनश्शास्ता भगवान् रघुनन्दनः ।
मनुष्य धर्मा श्रीदस्सराजराजोऽवतात्सदा ॥ 366 ॥

त्रियोविंश प्रकरणं - निरोष्ठयादिकम्

निरोष्ठयं यथा

सारस श्रीक चरण करनेत्रश्रियाधिकः ।
राका निशाकरास्यस्सः जयतात् श्रीकरः सदा ॥ 367 ॥

निर्दन्त्यं यथा

शंख चक्रकर श्रीश शार्ङ्गपाणेऽमरप्रभो ।
अपार करुणागार पुण्डरीकाक्ष रक्षमाम् ॥ 368 ॥

निर्मूर्धन्यं यथा

वसुदेव सुतानन्त वनमालिन् बलानुज ।
भक्तानन्दद गोविन्द नन्दनन्दन नन्दय ॥ 369 ॥

निस्तालव्यं यथा

कमलासन कैलास वासवासव सादरम् ।
वन्दारुगण मन्दारं वन्देहं रघु नन्दनम् ॥ 370 ॥

निष्कण्ठयं यथा

उर्वीश्रीदृति सुप्रीति नीति भूति स्थितिस्सुचित् ।
श्रुतिस्मृति निधिर्विष्णुः निर्भीतिश्शुचि मूर्ति धृत् ॥ 371 ॥



निरन्तस्थं यथा

अब्जोपमान तुण्डाक्षि कण्ठः कैटभ नाशकः ।
भक्तजाल कृपासिन्धुः पातुमां मधुसूदनः ॥ 372 ॥

यथा व

शचीपति मृडानीश पितामह मुखादृतम् ।
पाण्डुनन्दन सच्चित्तं भजेहं नन्द नन्दनम् ॥ 373 ॥

निरुष्मकं यथा

जगदुत्पत्ति मुख्यानां कारणं कमलापतिम् ।
प्रपद्ये परमात्मानं प्रणतार्तिविलुण्ठनम् ॥ 374 ॥

यथा वा

गंभीर तोयभव नाल विराजमान मार्ताण्ड भानु विकचामल पदनेत्रः ।
अम्भोज भूमृडमुखैः अभिवन्दितांघ्रिः अव्यादपार करुणांबुनिधिः मुरारिः ॥ 375 ॥

सर्वलधु यथा

अघहरण चण सरसिरुह मदहर शुभ चरणयुग कमल नयन ।
अवसदयपद नयन कलशभवमुख, मुनिबिनुत रघुकुल तिलक ॥ 376 ॥

सर्वगुरु यथा

अम्भोजाक्षः श्रीमान् विष्णु लक्ष्मीवक्षा वृष्णिश्रेष्ठः ।
पार्थप्राणः पायात् कृष्णः कंसारातिः संसारान्माम् ॥ 377 ॥



गूढ प्रथमं यथा

कमलेक्षण माश्रयामिनित्यं कृपयामिश्र कटाक्ष मब्जनाभम् ।
क्षणदेशसमान वक्त्रभासं सकलेशं मुनिरक्षणैककृत्यम् ॥ 378 ॥

गूढद्वितीयं यथा

मुक्तिहेतुं अनवीनगीस्तुतं कंसमर्दनमुदाक्षीक्षणम् ।
योगिहार्द मसुरादिशिक्षकं सर्वलोक शरणं सदाश्रये ॥ 379 ॥

गूढत्रितीयं यथा

कुटिलालक मब्जसदृग्वदनं धुतभक्तभयं मुनिजालनुतम् ।
कमलानिलयं भजमानसमे जलजातसमेक्षण मार्तिहरम् ॥ 380 ॥

गूढ चतुर्थं यथा

क्षीराब्धिजा नयनचन्द्र मनादिदेवं दिव्यांगदं शुभमृडं द्रुहिणप्रवीरम् ।
देवादरं गुरुकृपा भजतां सुमित्रं नारयणं गरुडवाहवरंभजामि ॥ 381 ॥

अनावुत्तास्यकं यथा

अलकेश सहायांगः फणिमंच इदाभुजः ।
अनाथः खलघोधृष्ट इडा परिबृढोऽवतु ॥ 382 ॥

पादानुलोम प्रतिलोमं यथा

पालितामर धीशाजा जाशाधीरमतालिपा ।
पातुमा सममारामा मारामा मसमातुपा ॥ 383 ॥

अर्धातुलोम प्रतिलोमं यथा

कालकालतिकापाद पेशाजायिद घोरभा ।
भारधोदधिजा शापेदपाका तिलकालका ॥ 384 ॥ (Refer गदा बन्धः)

चतुर्विंश प्रकरणं - यमकम्

पावितातिजड पामराधिपा पालितादृतजपामराधिपा ।
वामनीरचित कालि कादिमा पातुशोभितिलका लकादिमा ॥ 385 ॥

पालितामरगणे कमलेपा पालितामरस चन्द्र रुचे ।
देविमानतमवानघ शोभा देविमानत त बह्वनुकंपे ॥ 386 ॥

क्षीरवारिनिधिभूः कृपानिधिः दानवारिनिधिभूतलोचना ।
पालितामरसहस्र संस्तुता पातुतामरसहस्त शोभिता ॥ 387 ॥

निस्तुलानबधि रत्न भूषिते कौस्तुभाख्यमणि रत्न भूषिते ।
देहिमेबहुल भव्यदेहितां तावकापचिति भव्य देहिताम् ॥ 388 ॥

कुरुमय्यधिकां करुणां कमलेक्षणदेवि भजेतव पत्कमले ।
तवदास्यरतिं ददमे कमले न मनोरमते मम ना कमले ॥ 389 ॥

कलशोदधिजापते समस्ते भुवनेप्यस्तिहि नो पुमान् समस्ते ।
सहितस्सुगुणैर्भवान्मनोज्ञैः क्रियतेन्यत्र जने वृथा मनोज्ञैः ॥ 390 ॥

तं पुमांस महमाश्रये सतामाश्रये सरसिजोप मेक्षणे ।
यत्र लोक जननी रसास्थिते नीरसास्थिर फलान्तरैरलम् ॥ 391 ॥

क्षीरपयोधि सुतारमणोव्यात् नीरजसार विलोचन केन ।
तेनविना मम कागतिरन्या नीरजसारविलोचनकेन ॥ 392 ॥



त्वद्वपुः परिमलादिक दृष्टौ पारिजात कुसुमेषु समांग ।
कस्य केशव भवेदभिलाषां पारिजात कुसुमेषु समांग ॥ 393 ॥

सौध संशोभितासार सालव्रता नस्थिरातस्य भूस्सार सालव्रता ।
तज्जयादुष्टयाऽहन्तया मोहितं दुर्नृपं त्यज्यतं हन्तया मोहितम् ॥ 394 ॥ ?

पद्मा सपद्मा सशिकोविधाता दित्यात्मदित्यात्म भवादयस्तु ।
दासानुदासानुभवन्ति यस्य पायादपायादनधस्सविष्णुः ॥ 395॥

पुरान्तकासत्रिपुरान्तकाज षण्मुखा मराधीश मुखामरान् अपात् ।
समापतिः पात्वसमापतिर्हरिः नमामि तं यातु नामऽमितं भयम् ॥ 396 ॥

सोव्याद्यमुत्कृष्टतरं पराशरः सवेद येनैव हतः पराशरः ।
यस्मातु लांकोहि सदापराशरः सर्वोच्युतोकल्कष चित्पराशरः ॥ 397 ॥

मनोभवजरोगेण मनोभवजपीडया ।
सन्ततंमे हतम्मोहात् सन्ततं मेहसावतु ॥ 398 ॥

साऽदरा हरिणाक्षि श्री जितेन सततंधृता ।
सादरा हरिणाक्षि श्रीरिन्दिरा पातुमां सदा॥ 399 ॥

साधुता दययालक्ष्म्याऽसाधुता पापकारिणी ।
साधुता दयया लक्ष्म्याः साधुता सागता मया ॥ 400 ॥

इति श्रीरामभद्र कविविरचिते चित्रकाव्ये
प्रथमः परिच्छेदः

श्रीराम भद्रोदितचित्रकाव्ये आद्यः परिच्छेद उदाररीतिः ।
चतुश्शतश्लोक परिष्कृतोयं ययौ समाप्तिं यमकावसानः ॥

चित्रकाव्यम्

CHITHRAKĀVYAM

PART II



श्री. उ. वे. शुण्डपालयम् तिरुमलै
रामभद्राचारियर्

SRI. U.VE. SUNDAPALAYAM TIRUMALAI
RAMABADRACHARIAR

चित्रकाव्ये द्वितीयः परिच्छेदः

कविना रामभद्रेण काव्ये चित्रमये कृते ।
द्वितीयस्तु परिच्छेदो बध्यते बन्धरूपतः ॥

तत्र प्रथमं पञ्चायुध प्रकरणम्

सुदर्शन बन्धः

सदा सत्सं सदासक्तं सर्वरक्षारतं समं ।
सशान्ति दन्तिपं सर्व - सचित् भव्यं भजे समम् ॥ 1 ॥



सदेति । सत्संसत् - नित्यसूरि गोष्ठी तस्यां सर्वदा आसक्तं । सर्वरक्षारतं - सर्वजगद्रक्षण जागरूकं । समं सर्वभूतसमं - वैषत्यरहितमित्यर्थः । सशान्ति दन्तिपं - नक्रोपद्रवात् देहेन्द्रियादि वैक्लव्य विशिष्ट गजेन्द्ररक्षकं । सर्व सचित् भव्यं - सचितः ज्ञानिनः, सर्वज्ञानिनां मङ्गळरूपं । समं - लक्ष्मीसहितं भजे ।

(Read all eight radials from the centre स in clock wise direction)

Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

शंख बन्धः

श्रीनन्दनद नक्कारे ह्यसुराधिद नन्दन ।

श्रीनन्दन दधिक्षीर-चोर पाहिनतं हरे ॥ 2 ॥

श्रीनन्दनेति । श्रीनन्दनः मन्मथः तं ददातीति तद् । स्त्रीपुं विभागमन्तरेण स्वसौन्दर्येण सर्वमोहन इत्यर्थः । नक्कारे असुराधिद (असुर + आधि + द) । दधिक्षीरचोर-स्पष्टं ।

नन्दन - सर्वानन्दकर । श्रीनन्दनः श्रियः नायकत्वेन आनन्दकरः श्रियः पतेरित्यर्थः हे हरे नतं मां पाहि ।



गदा बन्धः

काळिका लतिका पाद पेशाजाधिदघोरहा ।

हारघोदधिजाशापेदपाकातिलकाळिका ॥ 3 ॥

काळिकेति । अयं श्लोकः प्रथमपरिच्छेद त्रयोविंश-प्रकरणे अर्थाकनुलोमप्रतिलोमोदहरण श्लोकतया व्याख्यातः । (श्लो सं ३८४) तत् च एवं। काळिकेति - पूर्वद्येकपदं काळ्येब काळिका - उमा, सैव लतिका -लता, तस्याः पादपः * * * * * रुद्रः, अजः ब्रह्मा, तयोः अधिद - पीडां ददन्ति, घोराः -असुरराक्षस - श्रेष्टाः, तान् हन्तीति तथोक्ता । हारया हारस्य यः घटना संबन्ध इत्यर्थः सः यस्यामिति तथोक्ता । मुक्ताहारवतीति भावः । आशापेदपाका - आशाः दिशः पान्तीति आशापाः दिक्पालकाः तेषां श्री लक्ष्मीं तत् तत् ऐश्वर्यमिति अर्थ । तद् ददातीति तद्दः * * * * पाकः अर्भकः यस्यास्सा, तिलकाळिका - सतिलक ललाटतला । * * * * लक्ष्मीः पात्विति शेषः ।

लक्ष्म्यां कमल केसरे । इति श्लोक - द्वयापि नानार्थ रत्नमाला द्रष्टव्या ।



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

खड्ग बन्धः

सा रमा पातु मा देवी धूतकोपा शुभानना ।

नारायणमनः कोप - निवृत्ति निजमानसा ॥ 4 ॥

सादरा दासपर्येषु सुचंपक सदृङ्नसा ।

सागसं दासमगति-माद्रा गोपाय सक्षमा ॥ 5 ॥

सेति । स्पष्टर्थः ।



शार्ङ्ग बन्धः

तं नु रासपमेडेहं हंडेमेऽपसरानुतं ।

तं रमापयमार्यासा सार्या मायपमारतं ॥ 6 ॥



तंनु इति । (पदच्छेदः तं नु रासपं आ ईडे अहं हंडे अमे अपसर अनुतं तं रमा आप यं आर्या सा सार्या मा अयपमारतं) आर्या-सर्वप्रज्ञा रमा-रमाशब्द वाच्चा मा-लक्ष्मीः, सार्या-भूमिनीळासहिता सती यं आप, पतित्वेनेति शेषं । अयपमारतं - अयश् शुभावह विधिः तं पातीति तत्पा, या मा तस्यां रतं । रासपं - रासमण्डले प्रसन्नं । अनुतं एन ब्रह्मणानुतं तं, आ-संयक् ईडे - भजे । हण्डे-हे अमे-अविद्ये अपसर-मां विहाय याहि । 'पत्निष्वार्ते प्रसन्ने च' मा स्त्री माने मृतौ वेला मेघा श्री मधु मातृषु इति नानार्थ रत्न माला ।

द्वितीयं चक्रबन्ध प्रकरणम्

चतुरर चक्र बन्धः

नमामि दीनपालं त्वा नतदेवनगापमः ।

पतिन्नदीनवासं त्वामृते कोवनसुक्षमः ॥ 7 ॥

नमामीति । हे नतदेवनग ! आश्रित कल्प वृक्ष ! विष्णो इत्यर्थः । दीनपालं त्वा नमामि । नदीनवासं - क्षीराब्धिवासिनं त्वां ऋते-त्वां विना । अपमः -लक्ष्मी शून्यः को वा, अवन सुक्षमः रक्षण समर्थः । लक्ष्मीपतित्वात् त्वमेव रक्षकः नान्य । ह्रीश्चते लक्ष्मीश्च पत्न्यौ इत्यादि श्रुतिभिः श्रियः पतेरेव हि पुरुषोत्तमत्वं उक्तं इति भावः ।

Start from the centre न and read the four spokes. Then read along the circumference.



अन्योयञ्चतुरर चक्रबन्धः

मा रमा तेन्दिरा नामाऽमानाराध्यपदाऽसमा ।

मा सदा प्रणतं भीमाऽमाभीतं पातु मा रमा ॥ 8 ॥





मा रमेति । इन्दिरा नामा-इन्दिरेत्याख्या विशिष्टा । अमानैः निरहंकारैः आराध्य पदा । असमा - निस्तुला । रमा शब्द वाच्या - मा लक्ष्मीः । भीमा भयंकरी या अमा - अविद्या तत् भीतं । प्रणतं - शरणागतं, मा-मां सदा पातु । मा शब्दस्य ज्ञान वाचकत्वात् आमा शब्दः अविद्यापरः ।

Start from the centre and complete quarter by quarter circle.

द्विश्रृङ्गाटक चक्र बन्धः

दक्षौ ते चरणौ कान्तौ देवि चक्रि दयाद्र ते ।
तेजसा रविनीकाशै वंदे वरचयन्दद ॥ 9 ॥







दक्षौ इति । चक्रि - दयार्थं भगवतः अस्मदपराध - विस्मृति जनक कारुण्य भनार्थं आद्रते - चुरुषकारत्वेन अस्माभिः आश्रिते-हे देवि लक्ष्मि । तेजसा रविनीकाशौ कान्तौ - मनाज्ञौ । दक्षौ रक्षण्समर्त्थन ते चरणौ वन्दे । वरचयं - अस्मदभीष्टं सर्व ददं ।



द्विचतुष्क चक्र बन्धः

देवताराधितां श्रीदां वन्दे सादरमिन्दिरां ।
देहि तापाधिदाश्रीघ्नां वज्रि सादरवन्दितां ॥ 10 ॥

देवता इति । स्पष्टोर्थः ।



गरुडगति चक्र बन्धः

रक्षाधीश्वरमादक्ष क्षान्त्याधीरतमाक्षर ।
रजोचिन्त्यातुलश्च भ्रात् पूतनावेदनाकर ॥ 11 ॥

रक्षेति । अधीश्वर-सर्वेश्वर । धीरतम-अतिधीर । अक्षर-नित्य । पूतनावेदनाकर-श्रीकृष्ण । रजसा-रजस्तमोभ्यां अचिन्तयं अतुलञ्च यत् श्वभं संसार भीति भावः तस्मात् मा-मां,क्षान्त्या - क्षमया रक्ष । तव क्षमा अभावे मद्रक्षणकथैव नास्तीति भावः ।

कविनाम विषयनामाङ्क षडरचक्र बन्धः

लक्ष्मी राजितवत्स मेघनिभभाशालिन् नमद्रक्षकं
सर्वामर्त्य मनस्थित मुनिनुत श्री चक्र शंकृत्समं ।
भर्माभं प्रणमामि पुण्यनिलयं शक्रस्य पूतं सदा
दासोऽहं ललितं समोद भवतः कंजाभमंघ्रिं मुदा ॥ 12 ॥



लक्ष्मीति । लक्ष्मी राजित वत्स - रमा शोभित वक्षस्थलं । मंघनिभ भाशालिन् काळमेघ तुल्य कान्त ! मुनिनुत श्रीचक्र ! सुदर्शनेन अनेक सुरादि खण्डनात् मुनिनुतं तं चक्रस्येति बोध्यं । समोदं - नित्यानन्दः हे भगवन् इति शेषः । नमत् रक्षकं शरणागत रक्षकं । सर्वेत्यादि सकलामरध्यान विष्यमित्यर्थः । शंकृत् - सुखकरं । समं वैषम्य रहितं । भर्माभं - स्वर्ण सदृशं । शक्रस्य पुण्य निलयं । इन्द्रसंबन्धि सुकृत निलयं - इन्द्रस्य पदे पदे असुरैरुपद्रव संभवात् तन्निरासार्थं भगवदंघ्रि समाश्रयेण तन्निरासात् तत् सुकृतस्य फलजनकत्वं भगवदंघ्रि द्वारा इति तत्सुकृतस्य तन्निष्ठत्वोक्तिः । पूतं - सर्वपावनं, ललितं रम्यं यद्वा सुलभं कञ्जाभं - पद्मतुल्यं भवतः अंघ्रिं सदा दासोऽहं - प्रणमामि ।

त्रितियषष्ठकोष्टयोः "रामभद्रकृत वनमालि चक्र" इत्युद्धारः (द्रष्टव्यः)



गुरुनाम कर्तृनामविषय नामाङ्कितः अष्टारबन्धः

श्रीशावीन्दुवराक्ष रक्ष विमति क्रौर्य स्वकामप्रिय
श्रीनिक्षिप्त समस्वचित्त विशरीराविद्धमूला अमी ।
वार्यन्तेक्षजना हिताध्व विदिशिम्राकृदुर्हृदात्मस्पृशा
सन्गान्नाम ममातनुन्नविदतुः पूषाश्चभेनाविन ॥ 13 ॥



प्रथम त्रितीय षष्ठाकोष्टेषु उद्धारश्लोकस्तु (एवं)
श्री श्रीवास यमीशान वीक्षितेनामलात्मना ।
राम नामार्य विदुषा रचिता नुतिरीशितुः ॥ 14 ॥

गुरु इति। अवीन्दुवराक्ष - रविचन्द्ररूप श्रेष्ठनयन-विमति क्रैर्य-विरुद्ध मतिषु पुरुषेषु क्रौर्यं यस्य। स्वकामाः ज्ञानिनः तत् प्रिय। समं - निर्वैषम्यं। स्व चित्तं श्री निक्षिप्तं यस्य। इन-प्रभो हे श्रीश ! विशरीरेण-मन्मथेन अविद्धमूलाः आहत स्वमूल भूत मनस्काः सर्वस्यापीन्द्रिय व्यापारस्य मनोधीनत्वात् तन्मूलत्वं तस्येति भावः। अमी-मत्संबन्धिनः अक्षाणि - इन्द्रियाण्येव जनाः अक्षजनाः। तेषां स्वश्यत्व अभावेन स्वातन्त्रयोद्यतनाय जना इति। हिताध्वविदिशि-हितरूप भक्तिमार्गस्य विदिशि-विरुद्धमार्गे स्राक् झटिति वार्यन्ते तत् तत् विष्यैरितिशेषः। अत्रायं भावः। सुकृत लवेन मम मनसि भक्तिमार्गोन्मुखे सति मन्मथः तत् कलुषी करोति। तदा शब्दादि विषयाः तत् तत् इन्द्रियाणि स भक्तिमार्गगतिं निरुध्वा तानि आकर्षन्तीति। तस्मादित्यर्थः। आत्मस्पृशा - अत्रात्म शब्दो यत्नपरः। प्रयत्नवता दुर्हृदा - दुष्टहृदयेन मम अतनुं अधिकं संगं - विषय संबन्धं पापसंबन्धं वा। पूषा रविः अश्चभेनः अश्छानां भानां इनः-चन्द्रः तावपि न विदतुः। सूर्यचन्द्रयोः सर्व पाप साक्षित्वात् मत् कर्तृक पाप समूहः तयोरपि अविषय इति भावः। नामेति संभावनायां। तयोरप्यविषय इति मन्ये इत्यर्थः।

उद्धार श्लोके-श्रीत्यादि। श्रीमत् श्रीनिवास यतीन्द्र महादेशिकाव्य स्वाचार्य कटाक्षितेन अत एव निर्मल स्वरूपेण रामभद्र विदुषा ईशितुः भगवतः नुतिः रचितेति।

त्रितियूयं मन्त्र प्रकरणम्

तत्र द्वादशाक्षर गोरथ बन्धः

ओं कनद्वसनामोघकरुणानि भ लोचन।
श्रीपते भगवन्देवदेव दानवनाशन ॥ 15 ॥

कंसाराते नमस्तुभ्यं बहुधा वासवानुज।
करोमि सुगुणान्देहि न देहित्वं स्तवाश्रय ॥ 16 ॥

ओमिति। ओं-प्रणव वाच्य भूतं। कनद्वसन-पीतांबरेत्यर्थः। अमोघकरुण। अनिभलोचन। तुभ्यं नमः बहुधा करोमि। सुगुणान् - अपहत पाप्मत्वादि गुणान् देहि। देहित्वं - संसारभित्यर्थः (पुनरपिजननं) न देहि। शिष्टं स्पष्टं। (देहित्वं न देहि - मोक्षं देहि इति भावः)



अष्टाक्षर ढक्का बन्धः

ओं रमेश करोत्येष सन्नतोहं नमोऽधुना ।
रामायणादराणात्तु पात्राब्जे नयनायते ॥ 17 ॥

मध्यकोष्टेषु "ओं नमो नारायणाय" इत्यष्टाक्षरोद्धारः । ओमिति । ओं - प्रणववाच्य भूतरमेश-श्रियः पते । सन्नतः प्रणतः एषोऽहं । रामायणादराणां पात्रे - श्रीमद्रामायण भक्तिविशेषशालि पुरुषरक्षकाय पुण्डरीकाक्षाय तुभ्यं अधुना नमः करोमि इत्यर्थः ।



(உடுக்கை)

षडक्षरोलूखल बन्धः

ओं नमो भगवन् तुभ्यं विभो दीनदयासमो ।

श्रीपते विषयाणाञ्जिष्णवेस्तु प्रभवे सदा ॥ 18 ॥

मध्यकोष्टेषु ''ओं नमो विष्णवे'' इति विष्णुषडक्षरोद्धारः । ओमिति । असमो इति ऊकारः रश्रक्षणवाची, असमः ऊः-रक्षणं यस्य सः असमोः तस्य संबुद्धिः-असमो । विभोभगवन् दीनदय हे श्रीपते । विषयाणां जिष्णवे स्वाधीन सर्वेन्द्रियायेत्यर्थः । प्रभवे तुभ्यं सदा नमोस्तु । ओमिति पूर्ववत् । ऊकारः पुरुषे चन्द्रे राजपुत्रे गळे सुरे । प्राङ्गणोपमेयोः पूर्णकुम्भे वणिजि रक्षणे इति नानार्थ रत्नमाल ।

न	मो	ओं	भ	ग
वि	भ्यं		न्तु	व
भो	दी	न	द	या
	श्री	मो	स	
प	ते	वि	ष	या
स्तु	वे	ष्ण	ञ्जि	णा
प्र	भ	वे	स	दा

पञ्चाक्षर भृङ्गारक बन्धः

शंभुश्शिवाप्रियः श्रीदाता देवादिवन्दितश्शिक्षां ।

कालस्य योमलात्मा चक्रे विष्णुं पुनस्सवै वेत्ति ॥ 19

मध्यकोष्टेषु ''नमश्शिवाय'' इति शिवपञ्चाक्षरोद्धारः । शंभु इति । यः चक्रे स शिव एव विष्णुं वेत्ति - सर्वज्ञत्वात् स एव भगवन् माहात्म्यं वेत्ति नान्यः इत्यर्थः । वै इत्यवधारणे । पुनरिति वाक्यालङ्कारः । शिष्टं स्पष्टम् ।



चतुर्थ भोगोपकरणबन्ध प्रकरणम्

चित्रान्दोळिका बन्धः

शंमे कुर्यादमन्दं कमलवरसदृक्पादहस्तेक्षणं श्रीः

कंसश्रेयोहरस्म्राक् कुमति निशिचरध्वंसकृत्धूतसंगः ।

श्रीमान् क्षीराब्धिजेशः खरतरमुरहाऽपारसारस्थिरश्रीः

मायाहेयामयार्तात्स्मरपुरहरतः कञ्जयोनेश्च पूज्यः ॥ 20 ॥

शन्मेति । स्म्राक्-शीघ्रं कंसश्रेयोहरः । खरतरः अतिक्रूरो यो मुरः तं हन्तीति - मुरहा । मायैव-प्रकृतिरेव हेयामयः दुष्टरोगः तदार्तात् । स्मर पुरहरतः स्मरं पुरान् त्रिपुराञ्च हरति नाशयतीति - स्मरपुरहरः रुद्रः तस्मात् तदपेक्षया कञ्जयोनेश्च-चतुर्मुखोपेक्षया च पूज्यः । मायेत्यादि विशेषणं चतुर्मुखस्यापि बोध्यं । आब्रह्मस्तम्भपर्यन्ता इति वचनेन तयोरपि प्रकृतिवश्यत्वात् अकर्मवश्यो भगवानेव मे अमन्दं शं-सुखं मोक्षानन्दमित्यर्थः कुर्यात् । शिष्टं स्पष्टम् ।





साधारणान्दोळिका बन्धः

वन्दे परक्रूरदरश्रियं त्वां नित्यासम श्रीमहिमक्षमेश ।

भवाब्धिगन्मामवलोकय त्वं तं त्वा रमेशं न विना गतिर्मे ॥ 21 ॥

वन्देति । परेत्यादि-परेषां शत्रूणां क्रूरो या दरश्रीः शंख शोभा यस्य तं । शंख शब्देन शत्रूणां हुदयश्रवणादि निर्भेदात् तत् श्रीश्शत्रुभिरसह्येति भावः । श्रीः- शोभा महिमा-माहत्म्यं एते । नित्यासमे-सर्वकालेपि तुल्यरहिते ते यस्य क्षमेश-भूनायक त्वां वन्दे । शिष्टं स्पष्टम् ।



सवितान मञ्च बन्धः

कान्त्या कामसमं समस्त विहितं तं राघवेन्द्रं भजे
जेतारं सुरसार सूर कुलजं ताद्रन्दनृ पोन्यो नहि ।
कोरक्षोरणरङ्गनिस्तुलबलो बद्धाबधीशोभवेत्
रक्षोधीश्वरदारसारगुणभित् कोपप्रपन्नोपरः ॥ 22 ॥



कान्त्येति । बद्धाबधीशः - अपाम् अधीशः अबधीशः - समुद्र सः बद्धः येन सः । रक्षो धीश्वरणां-राक्षसश्रेष्ठानां दाराणां - पत्नीनां यस्सारगुणः - कण्ठसूत्रं तत् भित् कोपप्रपन्नः - कोपरचना यस्य सः । एवं भूतः अपरः तत्वयतिरिक्तः कः ? कोऽपि नास्तीत्यर्थः । श्री राघवस्यकोपे सति रक्षसस्त्रीणां वैधव्यं सिद्धमिति । तत् कण्ठसूत्रकभेदत्वं कोपप्रपन्नस्याक्तम् । प्रपन्नो निष्कृतौ स्तोमे रचनायं विपर्यये इति नानार्थ रत्नमाला । शिष्टं स्पष्टम् ॥

साधारण मञ्च बन्धः

श्रीभूमिनीळा सहितं तं वन्देऽखिलनायकम् ।
हितार्थि ना पुनः पुंसा कंसारिः प्राप्य उच्यते ॥ 23 ॥

श्रीति । स्पष्टोर्थः ।



डोळा बन्धः



श्रीमत्वदंघ्रिमतुलं मनसा भजेम त्वत्सेवका न तु कदाप्यपमा भवन्ति ।
कञ्जेक्षणाच्युत तवस्तव भावकं मा दामोदराव सदर स्थिरनीरदाभ ॥ 24 ॥

श्रीति । अपमाः अज्ञानिनः । सदर- सशंख । स्थिरा या नीरदस्याभा-तत्वदाभा यस्य-नीरदाभायास्थिरत्वा भावने कदाचित् श्वैत्यसंभवात् स्थिरत्व विशेषणं तवस्तव भावकं त्वदीय स्तुतिरसिकथा मा-मां अव । शिष्टं स्पष्टम् ।





साधारण श्छत्र बन्धः

माहिपानशनादीन नतदास सदातन ।

नदीनशाशान दीन नदीनाशन पाहिमा ॥ 25 ॥



माहिति । मां-लक्ष्मीं, अहिं-आदिशेषं च तत्तदुचित कैंकर्य प्रदानेन पातीति तथोक्तं । अनशन अशनायाद्यतीत, अशनमत्र हेयगुणोपलक्षणं । अदीन-परिपूर्ण । नतदास-आश्रितदास आश्रितानां सारथ्यादि दूतकार्यं अपि करेति इति भावः । सदातन-सर्वकालिक । नदीनश-क्षीराब्धिशायिन् । आशा नदीन नदीनाशन-आशा एव नदीनः-समुद्रः तस्य नदीनाशन-अगस्त्यः । आश्रितानां इच्छा विषयदानेन तदिच्छानाशक इत्यर्थः । एवं भूत भगवन् । मा-मां पाहि-मामपि त्वदीय कैंकर्यं सांराज्यदानेन रक्षतु इत्यर्थः ।

श्रीमदमन्दमनोहरकीर्तिं सारदरस्थिरमीशमशत्रुम् ।
अच्युतमस्तमनोलमीडे सादरपालित सर्वजनौघम् ॥ 26 ॥



श्रीमदिति । श्रीमती अमन्दा- अधिका मनोहरा च कीर्तिः यस्य तं,सारः दरः शंखः यस्य सः सारदरः सचासौ स्थिरश्चेति सारदरस्थिरं । आश्रित रक्षण विषये स्थिरमिति भावः । अस्तं-निरस्तं मनोमलं आश्रितनिष्ठरजस्तमोगुणः येन तं । शिष्टं स्पष्टम् ।

सादरदक्त दमादिगुणन्मे श्रीपतिपद्मपदं वशवर्ति ।

शन्दिशतु प्रचुरं वरयोगीन् मानसवर्ति सकल्मषदूरम् ॥ 27 ॥



सादरेति । वशवर्ति-शरणागति वश्यं । वराञ्च ते योगीशञ्च वरयोगीशः मुनीन्द्रश्रेष्ठतमाः तेषां मानसवर्ति तत् ध्यान विषयमित्यर्थः । सकल्मषदूरं-पापिनां दुर्लभं । सादरेति-स्पष्टं । श्रीपतिपद्मपदं-श्रियः पतेः पद्मतुल्यपदं मे-मह्यं प्रचुरं शं-सुखं दिशतु ।



तं रमाक्षदयोवश्री श्रीवयोदक्षमारतम् ।

तं श्रीवक्षसमीडेऽहं यो लोकेशः क्षमारतम् ॥ 28 ॥



तमिति । यो लोकेशः लोकनाथः । तं रमेत्याद्ये पदं - रमाक्षं-अत्राक्षशब्देन कटाक्ष उच्यते । लक्ष्मीकटाक्षः तद्दया च । यद्वा रमायां अक्षं यस्य स रमाक्षः - भगवान् तद्दया-उः-रुद्रः वः-वायुः तयोः श्रीः-एतदुभयोपादानं सर्वदिक्पालोक्षणार्थं सर्वदिक्पालैश्वर्यमित्यर्थः । श्रीः शोभा वयः - आयुः एतानि ददातीति । या क्षमौ-क्षान्तिः तस्यां रतं-प्रीतं क्षमागुणे सति एतत् सर्वं लस्यत इति भावः । क्षमारतं - भूदेव्यां प्रीतं । तं प्रसिद्धं श्रीवक्षसं - श्रियः पतिं ईडे ।



माक्षरक्षक सत्भासा भासते हह ते सभा ।

भास्तं भन नभस्तंभा साभासत्कक्ष रक्ष मा ॥ 29 ॥



माक्षेति । माक्ष-लक्ष्म्याम् एव नेत्रं यस्य तथा भूत । भास्तंभन-भया-दीप्त्या सर्वान् स्तंभयति इति तथा भूत-भगवतो निरतिशय दीप्त्यवलोकने सर्वेपि स्तब्धा भवन्तीति भावः । भासत्कक्ष-विराजमान कक्ष प्रदेशः - कक्षोक्तिः दिव्यमंगल विग्रहोपलक्षणार्था । रक्षक-निरुपाधिक रक्षक-नारायणेति शेषः । नभस्तंभा-नभसि-परमव्योम्नि स्तंभाः सहस्रसंख्यका स्थूणाः यस्यास्सा ते सभा- दिव्यपरिषत् । सत्भासा-दिव्य तेजसा भसते । हह-आश्चर्यं । मा-अकिञ्चनं मां रक्ष । तादृश सभाप्रवेशनेन रक्ष । मुक्तिं दद इति भावः ।

सा रमा पातु तत् भव्यदाऽसमा भवपापहा ।

सा रमापाकृतकृव्यपाऽसदंभकृपापहा ॥ 30 ॥



सारमेति । सारभृता - मा - ज्ञानं यस्याः सा तत् भव्यदा - तथा विधं भव्यं-मंगळं ददातीति तथोक्तं । असम-निस्थुला । भवपापहा-संसृति जन्यस्य - संसृतिजनकस्य च पापस्य नाशिका । अपाकृत कृव्यपाः कृव्यं - आमिषं पान्तीति कृव्यपाः राक्षसाः ते अपाकृताः यया सा । असदंभकृपा निर्व्याजकृपेत्यर्थः । पहा-पः प्रसन्नः, हः-हरिः यस्याः सा पहा । यद्वा पेषु-आर्तेषु हा-वीक्षणं यस्यास्सा-पहा ।

अथवा, पे कौस्तुभे हा वीक्षणं यस्यास्सा इति वा । सा मानाधिकरन्यात् तद्वीक्षणवति इत्यर्थः । मा स्त्री मानेमृतौ मेधा । पस्त्रिष्वार्ते प्रसन्ने च । पः पुमान् पवने शैले प्रकाशे कौस्तु भेक्षणे इति नानार्थ रत्नमालायां । सा-एवं भूता रमा पातु ।

रमारमिन् रक्ष नमामिनाथ क्षमापते कञ्जजमूलनाभ ।

सुनीलमेघाङ्ग पयोजतुल्य करोत्तमोरो जलजक्षमाक्ष ॥ 31 ॥

(मध्य कोष्टेषु श्लोकशेषः पठनियुः)

रमेति । रमया रमत इति रमारमी तस्य संबोधनं-रमारमिन्निति कञ्जजस्य - ब्रह्मणः मूलभूता नाभिः यस्य पयोजतुल्यकर । उत्तमोरो-जलजस्य क्षमे-हिते तुल्य इति अर्थः कुक्षे यस्य ।

मध्य कोष्टेषु (मोरोजलजक्षमाक्ष) श्लोकशेषपठनं बोध्यम् ।



महारथबन्धः

श्री श्रीवासगुरुं समस्तविहितं यत्रैवसानुष्टिति श्रौती साच विरागतातुल्यशस्तं ज्ञानसिन्धुं परम् ।
औन्नत्यात् गुणतो निराकृतमहामेरुम्मुनिक्ष्मापतिं दुर्गर्विष्ठिजितं कृपा जनपरायत्तं भजे तुष्टिदम् ॥ 32 ॥

स्पष्टोर्थः मध्यकोष्ठेषु ''श्रीवास यतीशगुरुर्विजयतु'' इत्युद्धारो द्रष्टव्यः ।



गज बन्धः

मा पातु मारमाता सा दाशावनवशाशया ।

कुशलापपलाशश्रीः यपालंका कृता पुरा ॥ 33 ॥

मा पात्विति । यया पुरा लंका अपपलाशश्रीः- अपगत राक्षसश्रीः कृता सा दासावन वशाशय-भक्तरक्षणैकमनसेत्यर्थः । कुशला-सर्वशक्ता मारमाता मा (रमा, मांच) मातु । कुशलं निपुणे त्रिषु इति नानार्थ माला । लंका येन कृता पुरा इति रेखायां लेखनं प्रामादिकम् इति ज्ञेयं ।



तुरग बन्धः

वन्दे मन्देतरश्रीकं तं कंसरिपुमापमा ।

मानितं सततं यं वै दीनपं जलजेक्षणं ॥ 34 ॥

वन्देति । यं मा-लक्ष्मीः आप तं वन्दे इत्यन्वयः । त विशेषण पदानि स्पष्टार्थानि । मन्देतर श्रीकं कंसरिपुं दीनपं (दीनरक्षकं) सततं मानितं जलजेक्षणं यं मा आप तं वन्दे ।



पदाति बन्धः

दुष्टसंहार सत्काम महत्सु विलसद्दय ।
मम त्वं शरणं भूयाः रतपूत रमापते ॥ 35 ॥

दुष्टेति । रतानां-स्वविषयक रागवतां पूत परिशुद्धिकर
स्वभक्तान् पापक्षयेन शुद्धीकरोतीति भावः ।

शिष्टं स्पष्टः ।



अयमपि पदाति बन्धः

पद्मतुल्यपदद्वन्द्व परेदैवत रक्ष माम् ।

परसारहशक्रादि-मादित्येश रमापते ॥ 36 ॥

पद्मेति । परसारहा-परेषां - शत्रूणां सारं-बलं हन्तीति परसारहः । शक्रः आदिमः येषां तेषां आदित्यानां देवानां ईश । एवं भूतं परेदैवत-नारायण मां रक्ष ।





Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

षष्टं आयुध बन्ध प्रकरणम्

खड्ग बन्धः

देव तव स्त्व रचनं मोदशद त्रिदशदुर्लभं राम ।

मन्दमतिरीतिरहं स त्रिदश श्रेष्ठेश किं करोम्यसम ॥ 37 ॥



देवति । मोदशद-मोदः सन्तोषः शं-सुखं, एते ददातीति मोदशदः । त्रिदश श्रेष्ठानां महेन्द्रशिव ब्रह्मणामीश असम-अतुल्य हे देव राम । तव स्तव रचनं त्रिदशदुर्लभं-तैरपि कर्तुं न शक्यं । मन्दमतिरीतिः जडस्वभावः * * * * त्वं यथा त्रिदशश्रेष्ठेशः तथा अहं सर्वजडश्रेष्ठः इति भावः । किं करोमि त्वदीय स्तुति बद्धोऽपि मदशक्य इत्यर्थः ।



कठारि बन्धः

राजराजराजमित्र देवदेवपाव मा मारवीर पाश एष मामिहाद्य बधते ।

ते भवाब्धिनाव धूर्व हे पदे भजे क्षमा-मानिवास सूरिसेवितांबुजोपमेहिते ॥ 38 ॥

राजेति । राजराजः कुबेरः राजा-चन्द्रः मित्रः-सूर्यः देवदेवः इन्द्रः एतान् पातीति तयोक्तम् सर्वामर रक्षकेत्युक्तं च । सूरिसेवित-नित्यसूरि-संसेवित । क्षमा मा निवास-क्षान्ति लक्ष्मी निवासभूत । हे भगवान् एष मारवीरपाशो मां अद्य बाधते हि । एष इति तत् बाधायाः प्रत्यक्षतः प्रदर्शनं, तस्मात् संसार सागरनावभूते ते पदे पद्मसदृशे भजे । मामवेत्यर्थः ।



त्रिशूल बन्धः

श्री भूमिनायकादंभा भासते हह ते सभा ।
भास्तंभन नभस्तंभा भासुराववरासुभा ॥ 39 ॥



व्या-श्रीभूमिनायकेति । श्री भूमिनायक ! लक्ष्मी भूमिपते ! भास्तंभन-स्वकीय तेजसा सर्वान् स्तंभयसीति भावः । नभस्तंभा-परम व्यापस्य सहस्र संख्याक सथूणा शोभिता । अदंभा-कपट लेशशून्या - सर्व हेयगुण रहितेत्युक्तम् । सुभा-शोभन दीप्तिमती शुद्धसत्वमयेत्यर्थः । भासुरा - स्वयं प्रकाशा! वरा-श्रेष्ठा । ते सभा भासते । परमपद इति शेषः । हहेत्याश्चर्ये । अव-मां रक्ष । मम तादृश सभाप्रवेशनं देहीति भावः ।

कुन्त बन्धः

माहिपानशनादीन नतदास सदातन ।

नदीनशाशानदीन नदीनाशन पाहि मा ॥

छत्रबन्धे व्याख्यातोयं श्लोकः ।

(Sloka 25)



माहिति । मां-लक्ष्मीं, अहिं-आदिशेषं च तत्तत् उचित कैंकर्य प्रदानेन पातीति तथोक्तम् । अनशन अशनायाद्यतीत-अशनमत्र हेयगुणोपलक्षणम् । अदीन-परिपूर्ण । नतदास-आश्रितदास आश्रितानां सारथ्यादि दूतकार्यमपि करोतीति भावः । सदातन-सर्वकालिक । नदीनशः - क्षीराब्धिशायिन् । आशानदीन नदीनाशन - आशैव नदीनः समुद्रः तस्य नदीनाशनः अगस्त्यः । आश्रितानामिच्छाविषय दानेन तदिच्छा - नाशक इत्यर्थः । एवं भूत भगवन्, मा-मां पाहि ममापि त्वदीयं कैङ्कर्यसारांज्य दानेन रक्षतु इत्यर्थः । (नदी + इनः - नदीनः)

परशु बन्धः

मारतारकजित् सारसामेतास्तुत दाशिषे ।
सुरजातस्तुता मे सा रसाजित्करता रमा ॥ 40 ॥



मारेति । मारतारक जितौ-शिव सुब्रंमन्यौ - तयार्यत् सारसमं - श्रेष्ठं स्तुतिरूपं साधुवाक्यं तेन इता - संगता । सुरजातस्तुता स्पष्टं । रसाजित् - क्षान्त्यादिगुणैः भूदेवी जेत्रक रता, के-विष्णौ रता सा-रमा । मे तदाशिषे - तथाविधाशिषे अस्तु । सुरजातापेक्षया शिवस्कन्धयोः पृथगुपादानं तयोः कैश्चित् परत्वांगीकारात् ताभ्यामपि स्तुतत्वोक्त्या तस्याः सर्वोत्कृष्टत्वद्योतनार्थम् । को ब्रह्मात्मानिलार्काग्नि चित्त धीयम के किषु । विष्णाविति नानार्थरत्नमाला ।



चाप बन्धः

वैदेहजापतिप्रीतिः पुरुषार्थ प्रदायिनी ।
तदन्य दयया किं स्यात् तमेवेडे सदा मुदा ॥ 41 ॥

स्पष्टोर्थः ।



शर बन्धः

रजस्तमोमुडंभोरुट्-समस्योदधिजापदः ।
रजस्तमोजडं भीरुम्मामव्यादघजापदः ॥ 42 ॥

रजेति । अम्भोरुट्समस्य-पद्मसदृशस्य उदधिजापदः लक्ष्मीचरणस्य तमोमुट्-तमोहरं रजः - पांसुः । रजस्तमो जडं-रजस्तमोभ्यां जड भूतम् भीरुं संसार भीरुं मां, अघजापदः बीजाङ्कुरन्यायेन संसारस्य कार्यभूतैः कारणभूतैः च अघैर्जन्या या आपत्-अविद्यावासनारुच्सादिकं तस्मात् अव्यात् ।

खेट बन्धः

सारागसाम भूत्सारा भासा रामेण सत्गतिः ।

गतिः को दिव्यभूत् भूमौ काकाभासस्य शंस मे ॥ 43 ॥

मध्यस्थ कोणाक्षरैः-रारााम-इत्युद्धारः ।



सारागसां - प्रयाश्चित्ता विनाश्यत्वेन सारभूतानेक पापवतां अपि, भासा-स्वतेजसा, सारा - उत्कृष्टभूता सत्गतिं - परम प्राप्य भूत फलं - मोक्ष इत्यर्थः रामेण अभूत् । प्रपत्तिद्वारेतिभावः । काकाभासस्य - मैथिली वक्षस्थल व्रणकरणरूप महापराधयतः काकासुरस्य दिवि भूमौ वा गतिः - रक्षकः कः अभूत् । मे शंस । श्री रामभद्रादेव हि तस्य रक्षणमभूत् इति भावः । स पित्राचेत्यादि श्रीमद्रामयण श्लोकः अत्रानु सन्धेयः ।



क्षुरिका बन्धः

वारितारिहरिप्रीता मारमाताविसेविता ।
तामसाशयनाशाशे शेशाना यशसा मता ॥ 44 ॥



वारीति । वारिताः अरयः येन तस्मिन् हरौ प्रीता । अविसेविता-सूर्यसेविता, सूर्यस्य ग्रहणं सर्वामरोपलक्षणार्थम् । तामसाशयानां-दुष्टताशयानां नाशे आशा-अभिप्रायो यस्यास्सा । ईशेशाना-ब्रह्मरुद्रादीनामपि नियन्त्री । यशसा मता-निरुपम यशसा सर्वसंमता मारमाता लक्ष्मीः रक्षकादि शेषः ।

असि बन्धः

धीरधीर वरस्तुत्य देवदेव सवप्रिय ।
वदेन्दिरापते त्वत् को गति रक्षितवासव ॥ 45 ॥



धीरेति । धीर धीर - अतिधृष्ट । वरैः - सनकादिभिः स्तुत्य । देवदेव - सर्वेश्वर । सवप्रिय-यज्ञप्रिय । रक्षित वासव-स्पष्टं । हे इन्दिरापते त्वत्-त्वत्तः गतिः कः? वद् ! त्वां विना मम गतिः नास्तीत्यर्थः ।

* * * बन्धम् ।



सप्तमं गोमूत्रिका बन्ध प्रकरणम्

अयं तु गोमूत्रिका बन्धस्साधारणः

देवताराधितां श्रीदां वन्दे सादरमिन्दिराम् ।

देहितापाधिदा श्रीघ्नां वज्रि सादरवन्दिताम् ॥ (Sloka 9)

अयमिति स्पष्टोऽर्थः ।



समानवृत्त पादानुलोम प्रतिलोम गोमूत्रिका बन्धः ।

अनुलोम लेखनिरयुः प्रथमश्लोकः ।

सारसायनगा सेव्या पातु सा सुवनावनी ।

दासतानतपादा या नीलसारसलोचना ॥ 46 ॥

प्रतिलोमलेखनिरयुः द्वितीयस्तु ।

काचनाऽसमसारानी चादान्तातनुतापदा ।

देवतावतु साऽकोपा संसेव्या ननु सागसा ॥ 47 ॥

सा	र	सा	य	न	गा	से	व्या
सा	ग	सा	नु	न	व्या	से	सं
पा	तु	सा	सु	व	ना	व	नी
पा	को	सा	तु	व	ता	व	दे
दा	स	ता	न	त	पा	दा	या
दा	प	ता	नु	त	न्ता	दा	चा
नी	ल	सा	र	स	लो	च	ना
नी	रा	सा	म	स	ना	च	का



सारसेति । सारस रुपं यदयनं - स्थानं तत् गा । दासता दाससमूहः तया नतपादा सा या लक्ष्मीः ।

शिष्टं स्पष्टम् । अयनं निलये मार्गे । या स्त्रियां यान मञ्जर्योः शोभा लक्ष्म्योश्चेति कोशः । नीचा ये अदान्ताः तेषां अधिकतापदा । देवता-लक्ष्मीः सगसा - अपराधिना संसेव्या ननु-पुरुषकारत्वेना श्रयणियया खलु । शिष्टं स्पष्टम् ।

इयं समानवृत्तार्धानुलोम प्रतिलोम गोमूत्रिकाऽपि भवति ।

→	सा	र	सा	य	न	गा	से	व्या	पा	तु	सा	सु	व	ना	व	नी
	सा	ग	सा	नु	न	व्या	से	सं	पा	को	सा	तु	व	ता	व	दे
→	दा	स	ता	न	त	पा	दा	या	नी	ल	सा	र	स	लो	च	ना
	दा	प	ता	नु	त	न्ता	दा	चा	नी	रा	सा	म	स	ना	च	का

Alternate lines forms the slokas. First sloka from top and from left to right Second sloka form bottom and from right to left.



समानवृत्त पादानुलोम गोमूत्रिका बन्धः

प्रथम श्लोकः

पातुमामक्षयस्थाना - पादनात् कमलापतिः ।
देवनाकमलेनाशा केवलानुभवेऽपिवा ॥ 48 ॥

द्वितियय श्लोकस्तु

रातुमामद्य यस्याना - नादरः कमलाऽक्षतिः ।
पावनी कमलेसाशा मा वरानुभवेऽत्रवा ॥ 49 ॥

पा	तु	मा	म	क्ष	य	स्था	ना
रा	तु	मा	म	द्य	य	स्या	ना
पा	द	नात्	क	म	ला	प	तिः
ना	द	रः	क	म	ला	क्ष	तिः
दे	व	ना	क	म	ले	ना	शा
पा	व	नी	क	म	ले	सा	शा
के	व	ला	नु	भ	वे	पि	वा
मा	व	रा	नु	भ	वे	त्र	वा

इयं समान वृत्तार्धानुलोम गोमूत्रिकाऽपि भवति । पात्विति । अक्षय स्थानापादनात्-परम पदप्रदानात् हे देव नाकमले-स्वर्गरूप नरके केवलानुभवे-कैवल्ये वा-मे नाशा । रात्विति । यस्याः अनादरो न भक्तेषु इति शेषः । कमलेसाशा मा अत्रवा एहि केवा - वरानुभवे वा-आमुष्मिकेवा-मां बुद्धिं रातु-सा यत्र बुद्धिं जायति तदेव मे स्यात् इति भावः शिष्टं स्पष्टम् ।

इयं समान वृत्तार्धानुलोम गोमूत्रिकाऽपि भवति ।



Read this way also in both forms.
(गोमूत्रिका)

पा	तु	मा	म	क्ष	य	स्था	ना	पा	द	नात्	क	म	ला	प	तिः
रा	तु	मा	म	द्य	य	स्या	ना	ना	द	रः	क	म	ला	क्ष	तिः
दे	व	ना	क	म	ले	ना	शा	के	व	ला	नु	भ	वे	पि	वा
पा	व	नी	क	म	ले	सा	शा	मा	व	रा	नु	भ	वे	त्र	वा



भिन्नवृत्तार्धानुलोम गोमूत्रिका बन्धः

प्रथम श्लोकः

क्षीरपयोधि भवाखिलसेव्या मारजनन्यसुरक्षयचित्ता ।

नामजपप्रहतादरदोषा पातु दयानिधि रक्षय शोभा ॥ 50 ॥

द्वितिय्य श्लोकः

स्फुरद्दयोच्चाभवखिन्न सेव्या माया जघन्यस्थिरकायसत्ता ।

श्रीमत्सु पद्मा हरिदत्तदोषा पायादमानिस्थिर दायजृंभा ॥ 51 ॥

क्षी	र	प	यो	धि	भ	वा	खि	ल	से	व्या	मा	र	ज	न	न्य	सु	र	क्ष	य	चि	त्ता
स्फु	र	द्द	यो	च्चा	भ	व	खि	न्न	से	व्या	मा	या	ज	घ	न्य	स्थि	र	का	य	स	त्ता
ना	म	ज	प	प्र	ह	ता	द	र	दो	षा	पा	तु	द	या	नि	धि	र	क्ष	य	शो	भा
श्री	म	त्सु	प	द्मा	ह	रि	द	त्त	दो	षा	पा	या	द	मा	नि	स्थि	र	दा	य	जृं	भा

क्षीरेति । स्पष्टः अर्थः । स्फुरदिति । स्फुरत् दयोच्चा अतिशयित दयया उच्चा - सर्वातिशायिनीत्यर्थः । हरिदत्तदोषा - भगवति निक्षिप्त भुजा (दोषा) अमानिस्थिरदाय जृंभा - स्थिरस्य स्थिरफलस्य दा-दानं अयं जृभं शुभावह विधिवर्धनञ्च अमनिषु यस्यास्सा । शिष्टं स्पष्टम् । दास्त्रियां क्षान्ति दानयोः । जृंभस्तु जृंभणे इति नानार्थ रत्नमाला ।

अयं हि भिन्न वृत्त पादानुलोम गोमूत्रिका बन्धोऽपि भवति ।

श्री	र	प	यो	धि	भ	वा	खि	ल	से	व्या
स्फु	र	द्द	यो	च्चा	भ	व	खि	न्न	से	व्या
मा	र	ज	न	न्य	सु	र	क्ष	य	चि	त्ता
मा	या	ज	घ	न्य	स्थि	र	का	य	स	त्ता
ना	म	ज	प	प्र	ह	ता	द	र	दो	षा
श्री	म	त्सु	प	द्मा	ह	रि	द	त्त	दो	षा
पा	तु	द	या	नि	धि	र	क्ष	य	शो	भा
पा	या	द	मा	नि	स्थि	र	दा	य	जृं	भा



इयं भिन्न वृत्तानुलोम गोमूत्रिका वृत्तान्तरेणापि लिख्यते यथा ।

प्रथम श्लोक:

सुरनुता कमला परदेवता त्वजितचित्त रमा नलिनोद्भवा ।

अतुल संहननावतु मानिता भुवनतापकरासुरनाशिनी ॥ 52 ॥

द्वितिय्यश्लोकस्तु

मारमाता नमत्पापहा देवता पूजिताचिन्नरज्ञान दानोत्सवा ।

पातु दासंजनम्पावनी मादृता जीवजातानुकंपा सुरेनावनी ॥ 53 ॥

सु	र	नु	ता	क	म	ला	प	र	दे	व	ता
मा	र	मा	ता	न	म	त्पा	प	हा	दे	व	ता
त्व	जि	त	चि	त्त	र	मा	न	लि	नो	द्भ	वा
पू	जि	ता	चि	न्न	र	ज्ञा	न	दा	नो	त्स	वा
अ	तु	ल	सं	ह	न	ना	व	तु	मा	नि	ता
पा	तु	दा	सं	ज	न	म्पा	व	नी	मा	दृ	ता
भु	व	न	ता	प	क	रा	सु	र	ना	शि	नी
जी	व	जा	ता	नु	क	म्पा	सु	रे	ना	व	नी

इयं अर्धानुलोमगोमूत्रिकाऽपि भवति

सु	र	नु	ता	क	म	ला	प	र	दे	व	ता	त्व	जि	त	चि	त्त	र	मा	न	लि	नो	द्भ	वा
मा	र	मा	ता	न	म	त्पा	प	हा	दे	व	ता	पू	जि	ता	चि	न्न	र	ज्ञा	न	दा	नो	त्स	वा
अ	तु	ल	सं	ह	न	ना	व	तु	मा	नि	ता	भु	व	न	ता	प	क	रा	सु	र	ना	शि	नी
पा	तु	दा	सं	ज	न	म्पा	व	नी	मा	दृ	ता	जी	व	जा	ता	नु	क	म्पा	सु	रे	ना	व	नी

सुरनुतेति । अजितस्य - विष्णो: चित्ते रमत इत्यजितचित्तरमा । अचित: ज्ञानशून्या: ये नरा: तेषां ज्ञानदानोत्सवा । देवता-पूजिता-सर्वदेव पूजिता । सुरेनं - इन्द्रं अवतीति सुरेनावनी । मादृता सर्वैरिति शेष: । पावनी-सर्वान् परिशुद्धयन्तीति । मा-लक्ष्मी: दासजनं पातु ।



भिन्नवृत्त पादानुलोमप्रतिलोम गोमूत्रिका बन्धः

(इयं गोमूत्रिका अर्तरूपा न भवति ।)

अनुलोमतया लेखनिरय्युः प्रथमश्लोकः ।

कलितामरमोद हरे द्विरदासमभीदम केशव देवपते ।

तदरातितं करुणाकर भो दह मेघ भवं कुटिलानुभवम् ॥ 54 ॥

प्रतिलोमतया लेखनिरयो द्वितिय्य श्लोकस्तु ।

शुभं कलान्मा कुसुभव्य मे दद स्थिर प्रणामाकलित स्थिरामृत ।

सपक्ष देवाशर मन्युभीम स स्फुरत्करेन्द्रादर रक्षिताजक ॥ 55 ॥

क	लि	ता	म	र	मो	द	ह	रे	द्वि	र	दा
क	ज	ता	क्षि	र	र	द	न्द्रा	रे	त्क	र	स्फु
स	म	भी	द	म	के	रा	व	दे	व	प	ते
स	म	भी	न्यु	म	र	श	वा	दे	क्ष	प	स
त	द	रा	ति	त	तं	क	रु	णा	क	र	भो
त	मृ	रा	स्थि	त	लि	क	मा	णा	प्र	र	स्थि
द	ह	मे	घ	भ	वं	कु	टि	ला	नु	भ	वं
द	द	मे	व्य	भ	सु	कु	न्मा	ला	म्क	भ	शु

कलितेति । द्विरदासम भीदम-द्विरदस्य गजेन्द्रस्य या असमा भीः - नक्रजातं भयं - तत् दमयतीति नाशयति इति तथोक्तम् । तैः अरातिभिः-काम क्रोध लोभ मोह मद मात्सर्यरूप षडात्मशत्रुभिः ततं व्याप्तं । तच्च प्रसिद्धारति वैलक्षण्यं जोत्यते । कुटिलानुभवं-असह्यानुभवं भवं दह ।

शुभेति । मा कु सुभव्य - लक्ष्मी भूम्यो मङ्गळ स्वरूप । स्थिरेत्यादि-स्थिरप्रणामः शरणागतिः तेन कलित स्थिरामृतं मोक्षः येन सः । सपक्षस्त सहाया देवा येन सः । आशराणां मन्युना भीमं राक्षसभयं करत्यर्थः । सेत्यादि-से-वायौ स्फुरत्करेन्द्र च आदरः यस्य । रक्षितौ अजकौ शिवचतुर्मुखौ येन । हे भगवन् मे शुभं कलां-विद्यां च दद ॥ सः पुंस्यामासुते वायौ इति नानार्यमाला । शिष्टं स्पष्टम् ।

Alternate lines forms the slokas. First Sloka from top and from left to right Second sloka from bottom from right to left.



भिन्नवृत्तार्धानुलोम प्रतिलोम गोमूत्रिका बन्धः

(इयं गोमूत्रिका पादरूपा न भवति)

अनुलोमतया लेखनिरय्यः प्रथम श्लोकः ।

नाकपकाल जलेश कुभेरा मारहवारि पितामह मुख्याः ।

यामनपायगुणामभिरामां हन्त भजन्ति हि सा कमलाऽव्यात् ॥ 56 ॥

प्रतिलोमतया लेचनिरय्यः द्वितिय्य श्लोकस्तु ।

विमुग्धमव्यात् पिकवागरम्मा रामा कुशीलेचल मापदीना ।

नीलाळकश्री हि भुजङ्गतल्पा माताभिशोणाम्घ्रियमानपाया ॥ 57 ॥

→	ना	क	प	का	ल	ज	ले	श	कु	भे	रा	मा	र	ह	वा	रि	पि	ता	म	ह	मु	ख्याः
	ना	दी	प	मा	ल	च	ले	शी	कु	मा	रा	म्मा	र	ग	वा	क	पि	व्यात्	म	ग्ध	मु	वि
→	या	म	न	पा	य	गु	णा	म	भि	रा	मा	म्हं	त	भ	ज	न्ति	हि	सा	क	म	ला	व्यात्
	या	पा	न	मा	य	म्घ्रि	णा	शो	भि	ता	मा	ल्पा	त	ङ्ग	ज	भु	हि	श्री	क	ळ	ला	नी

नाकेति । नाकप-काल जलेश कुभेराः इन्द्र यम-वरुण-वैश्रवणाः मार-मारस्य, हवस्य-यागस्य च अरिः (मारहवारि) रुद्रः इत्यर्थः । स च पितामहश्चतुर्मुखौ येषां ते एतद्विशेषणं इन्द्रादीनां । हन्त इति हर्षे । नीला अनकश्रीः यस्याः सा । अभिशोणः सम्यक् अरुणः अंघ्रियमः चरणद्वयं यस्याः सा । माता लोकमाता इत्यर्थः । इना-स्वामिनी । रामा-स्त्री विशेषण वलात् लक्ष्मीः इत्यर्थः । मा-माम् आपदि-आपत्काले । अरं शीघ्रं अव्यात् । शिष्टं स्पष्टं । कुशीलेचलमित्यपि अस्मत् शब्द विशेषणं । इना-मन्मथेन चलः अस्थिरस्वभाव इति इचलः । कुशीलश्चासापिचलश्चेति समासः । इकारः फणिरत्नार्चिषु अग्रतोर्धगुहान्धयोः हरे करेणौ कक्षान्ते निशाकर करे स्मरे ।

इनो भूपे रवौ पुंसि धनिक स्वामिनोस्त्रिषु। इति नानार्थरत्नमाला । यमस्तु यमळेन्तके । इति च ।



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

अष्टमं - नाग बन्ध प्रकरणं

कुण्डलित एक नाग बन्धः

स्वामि श्रीरङ्गवीक्षा महितयतिपतिर्यो महानस्तदोषो विद्वत्सम्मोददानस्थिरसुरधरणीरुट्क्षमक्षेमधाम ।
तं श्रीवेदोदधीन्दुं सलिलजलपनन्दीनपं वीतरुट्कं तद्धीमन्तन्नताश्रीक्षि दमदशविदं धीप्रदं सन्नमामि ॥ 58 ॥



व्या-स्वामित्यादि । सर्वशेषी श्री रंगनाथं कटाक्ष लब्ध महात्मयो यो यतिपतिः श्रीनिवास-महादेशिक इत्यर्थः । सलिलज लपनं-पद्मसदृश मुखं-तद्धीमन्तं-प्रसिद्ध सार्वज्ञय शलिनं । अदशविदं । न विद्यते दशा बालयास्था - यस्य सः अदशः युवात् कुमार इत्युक्त त्वान्नित्य युवत्वेन बायावस्था रहित इति भावः । तं वेत्तीति-अदशवित् एवं भूतं । तं आचार्यं नमामीति । शिष्टं स्पष्टं । कवेराचार्य भूत श्रीनीवास यतीन्द महा देशिक विषयोयं श्लोक : ।



साधारण नाग बन्धः

रक्षराम हताशेष -
राक्षस श्रीनिकेतन ।
न त्वां विना गतिर्मेस्ति
दासीभूतामराक्षर ॥ *
(दासीभूत + अमर + अक्षर)



सकलैश्शिरसाधार्या
धूकिस्सोदधिजापदः ।
सभयं पातुमां घोर
वृजिनोदधिजापदः ॥ 59 ॥



* This sloka has been scored out by the Kavi, in the manuscript perhaps thinking it is duplicated. Hence number has not been given.



चतुर्नाग बन्ध

अवकेशव मेघसमान रुचे हिमपाद सदृग्वदनाभयद ।
मदलोभ हराब्ज निवास रमेश्वर दीनजन श्रमतापहर ॥ 60 ॥

वरचाप सुकञ्जदृगीश सुरा भिमतासमसद्वरजात दय ।
जयपीत सुचेलनतादरक त्रिदशेशध निप्रमथे शधव ॥ 61 ॥



व्या-मदलोभहर-अरिषड्वर्गनाशक । अब्जं निवासः वासस्थानं यस्यास्तस्या-रमायाः ईश्वर । वरचापसुकञ्जदृक् शोभन पुण्डरीक लोचन । अतएव ईश सर्वेश्वर । यथा कप्यासं पुण्डरीकं एवमक्षिणीत्यादि श्रुत्या पुण्डरीकाक्षस्ये खलु सर्वेश्वरत्वमुक्तमिति भावः । सुराभिमत असम-सद्वरेति-सद्वरेषु साधु श्रेष्ठेषु जाता दया यस्य । पीत सुचेल-पीतांबर - त्रिदशेत्यादि-इन्द्र कुबेर रुद्र नायक - सर्वदिक्पाले -उपलक्षणमेतत् ।

शिष्टं स्पष्टम् ।

द्विनाग बन्धः

श्रीनिवास महमाश्रये रतं तं रतीश सुत नाभिजाजकं ।
कंजसंभव सुमानितं सदादासगश्रमह सादराशयं ॥ 62 ॥

पालको भवमुखा जरानतो तोन देव इतरोदराश्रयः ।
यः श्रमा सह सुशीलवान् पदादापदा जयमुषोभितोवतात् ॥ 63 ॥



व्या-रतीशस्सुतो यस्य सः रतीशसुतः । नाभिजः अजः यस्य सः । नाभिजाजकः बहुव्रीहौ कप्प्रत्ययः । रतीसुतस्चासौ नाभिजाजकश्चेति समासः । रतं रागविषयं । आश्रित विषयक रागवन्तमित्यर्थः । तं भगवन्तं श्रीनिवासं आश्रये । शिष्टं स्पष्टं ।

ननु वदन्यः । कथंनाश्रयाणियूय इतिचेत् तत्राहं-पालक इत्यादि । अतः अस्मान् इतरः देवः चतुर्मख इत्यर्थः । भवमुखाजरानतोपि-दराश्रयः शत्रु भीतः तस्मात् पालको न । तस्मात् श्रीमा सहस सुशीलवान् भक्तश्रमासहोयः स एव अपदान्जय - मुषः । आपन्नां शकादित्यर्थः । पदात् स्वचरणात् । हेतौ पन्चमी । स्वचरणद्वारेत्यर्थः । अभितः अवतात् । यद्वा-जयमुख इति पाठः । जयप्रधान इत्यर्थः । भगवद्विशेषणमेतत् - सः अभितः आपदां पदात् सर्वत्राप्यापत्स्थान भूतात् संसारादित्यर्थः । अव्यात् ।

अष्ट नाग बन्धः

श्रीवास सन्मुनीशानस्थिरकल्याण सत्गुणः ।
श्रेयोगुरणदक्षस्स देशिकक्षितिपो महान् ॥ 64 ॥
मायामहितरागादिद्विषन्मुदपनोदनः ।
दामोदरपद द्वन्द्वस्थितधीस्सुक्षमानिधिः ॥ 65 ॥
तेजोनिरुद्ध भीक श्रीजिततन्मिहिरोवतात् ।
यशोवताहितानन्दद्विषा शान्तद्वयात्मना ॥ 66 ॥
मन्दात्मजिकराधी प्रदेनोद्ध रणमंहसः ।
तमोहरेण यान्तिस्मजिह्मगा येन भासता ॥ 67 ॥



एतत् श्लोक चतुष्टयं श्रीनिवास यतीन्द्र महाद्धेशिक विषयकमेव । श्रेयोगुरणदक्षः श्रेयसामाद्यमने समर्थः मायया महिता ये रागदि द्विषः तन्मुद पदोनः । तन्नाशकः । तेजसा निरुद्धाभीः आश्रितभयं यस्य सः । श्रीजित तनमिहिरः (तन् + मि कान्ति जित सूर्यः) यशोवता अहितानन्दद्विषा) शान्ति सुख दुःखादि द्वन्द्वेन । धीप्रदेन - तमो हरेण भासता पिद्योत तेत्यर्थः । येन गुरुणा जिह्मगाः । पापिष्ठा अंहस - पापात् उद्धरणं-विमोचनं यान्तिस्म - अभजन् । सः अवतादिति पूर्वेणान्वयः । जिह्मगा इति मन्दात्म निकराणां विशेषणं । स्वतन्त्रं वा भवतु गुरणमाद्यम इत्यमरः ।

Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

कृष्ण सर्प बन्धः

बलदन्मधुर प्रचुर प्रगुणात्मगुणं शरणं रसभेदनुतं ।
मनुकश्रुतमप्रतिमप्रभवं शुभदं सुपदं मधुहं कलये ॥ 68 ॥



बलेति । बलदं-मनोधैर्यदं । मधुराः - भोग्यभूताः प्रचराः -अधिकाः, प्रगुणाः- अनघाः आत्मगुणाः यस्य तं । रसभेदनुतं - रागविशेषेण भक्तैः नुतं । मनुभिः केन - प्रजापतिना च श्रुतं - तेषां श्रवण मननध्यान विषयं इत्यर्थः । अप्रतिम प्रभवं - असमान विक्रमं । शोभनांघ्रिं शुभदं । मधुहं-भगवन्तं शरणं कलये । ऋजावजिह्म प्रगुणौ इत्यमरः । प्रभवो विक्रमेऽनान्मूले जनक कारण इति नानार्थ रत्नमाला ।

वासुकि द्विनाग बन्धः



जगत्प्रभु रक्षतु दीनसद्दयो
विदेहजा मानसपद्म भास्करः ।
दशास्यसार स्थिरमान दर्पहा
विचक्षणो मामिह पद्मलोचनः ॥ 69 ॥

स्पष्टोऽर्थः ।

(दीनसत् + दयो)



नवमं पद्म बन्ध प्रकरणम्

कुमुद बन्धः





नाथ किं सद्मना नारकश्छद्मना नापि वा बन्धुनाऽनादृत स्वामिना ।

नाथये त्वां विना नान्यमेवाऽधुना नाथवान्विष्णुना नानकिं जिष्णुना ॥ 70 ॥

नाथेति । नरकाणां समूहः नारकं - तस्यश्छद्मना-निलयं भूतेन-सद्मना गृहेण किम् ? अनादृत स्वामिना अनाराधित गोविन्देन बन्धुना वा-न तेनाऽपि न फलमित्यर्थः । ना-मनुष्यः, जिष्णुना-विष्णुना नाथवान्न किम् ? तेनैव नाथवानित्यर्थः । तस्मात् त्वां विना नान्यं नैव नाथये-प्रार्थये । नाथृ-याचने । श्छद्म सद्मनि कैतवे इति नानार्थ रत्नमाला

पञ्च दळ पुण्डरीक बन्धः



मामवत्वखिलेऽचा मा

रजनीश समानना ।

शुभदा मारमातासाऽघज

माधव कोपहा ॥ 71 ॥

मामेति । अघज माधव कोपहा-अस्मद्रचितानाद्यनेक पापजनित भगन्निग्रह शमनीत्यर्थः । शिष्टं स्पष्टम् ।



अष्टदळ पद्म बन्धः

तादृशादिनुता भीमा मा भीतान् पातु सा मता ।
तामसार्तिरताऽभीमा माभीतारर्तिवशादृता ॥ 72 ॥



तादृशेति । तादृशाः ये आदयः पूर्वे ब्रह्मादयः सनकादराश्च तैः नुता । मता- सर्वसम्मता । तामसानां आर्तौ - पीडायां रता । भीतार्तिवशादृता - भीतेषु आर्तिवशेषु आर्तेष्वित्यर्थः तेष्वादरवती । अभीमा अभयंकरी । सामा - लक्ष्मीः भीमा या अमा-अविद्या-तत् भीतान् अस्मानिति शेषः पातु ।

अष्टदळ नीलोत्पल बन्धः

नृहरितनुसुधामा वारितस्वाश्रिताऽमा सुचपलदृगभीमा नीररुट्जन्मधामा ।
गुणवरगण सीमा सोमजित्वक्त्र भामा शिवदबहुसुनामा पातु पूता रमा मा ॥ 73 ॥



नृहरीति । नृहरितनुः - नृसिंह दिव्य वक्षः स्थलमेव शोभस्थानं यस्याःसा । वारिता-निरुद्धा स्वाश्रितानां (अमा) अविद्या या सा । सुचपलदृक शोभन चञ्चल नेत्रा अभीमा । गुणवर गणानां सीमा-क्षेत्र भूता । पूता-पावनी । रमा शब्दवाच्य-मा । मा-मां पातु । शिष्टं स्पष्टं । सीमसीमे उभे क्षेत्रे इति नानार्थ रत्नमाला ।



अन्तः कविनामाङ्कितष्टदळ पद्म बन्धः

श्री जानकीश तव राघव पादयुग्म मंभोजतुल्यमस्तु भघ्नमहं भजामि ।
द्रव्यादितर्ष मुख कश्मलहेतुघोर - मद्य प्रभो भवमलं क्षिप सानुकंप ॥ 74 ॥



अन्तर्दळाष्टके श्रीरामभद्र कमलं इति श्रीजानकीशेति । द्रव्यादि तर्षमुखैः द्रव्यादि मनोरथं प्रमुख जनकत्वात् कश्मलहेतु-पापहेतु भूतं घोर भवमलं - संसारनरकं क्षिप - नाशय - शिष्टं स्पष्टम् ।



महाष्टदळ पद्म बन्धः



पापासभ्यासदस्या सदहतिमतिसत् स्तोमसक्तशयापा

पायाशक्तासमस्तोर्ध्व सुगतिनयने श्रीदपद्या दयापा ।

पायादद्यापदश्रीहतिमतिसुजन ज्ञानसुस्थान्तयापा

पायान्तस्था सुनज्ञा मतिरपिहि, यया स्यादसभ्यास पापा ॥ 75 ॥

पापेति । पापाः असभ्याः असाधवः सदसत् योग्या असदस्याः एवं भूताश्च ये असन्तः तैः अहतमतीनां अप्रकंप्य मतीनां सतां - साधूनां स्तोमे सक्तः आशयः भावो यस्यास्सा अपापाया - अपायरहिता-समस्तोर्ध्व सुगतिनयने शक्ता स्वर्गादि सर्व सत्गति प्रापणे समर्था - श्रीदपत्-संपत् - प्रदा आपदां दयापा - कृपया

प्रसन्ना - आपदश्रीहतौमतिः इच्छा येषां तेषां सुजनानां ज्ञान सुस्थः ज्ञानविषयः अन्तः स्वरूपं यस्यास्तया- अरिष्टदारिद्रय निवृत्यादिकाम सज्जनध्येययेत्यर्थः । यया सपापा - असभ्या मतिरपि - मादृशां बुद्धिरपि । सनज्ञा - शोभनं सदासर्वविषयकमित्यर्थः । ज्ञानं यस्य सः सुनः भगवान् तं जानातीति तत्ज्ञा । भगवद्विषयणीत्यर्थः । अपापायान्तस्था च- अनपाय निस्चयस्था च अवास्तवार्था ग्राहिणी चेति भावः । स्यात् भवेत् । लक्ष्मीकटाक्षेण मन्दाः पापिनोऽपि भगवत् ध्यानपराः भ्रमादिरहितास्समीचीन ज्ञानाश्च भवतीति भावः । सा एवं भूता या लक्ष्मीः पायात् ।

सभ्यास्सामाजिके साधौ । पस्त्रिष्वार्ते प्रसन्ने च । नाभौ नं ज्ञानवाद्ययोः । अन्तो स्त्री निश्चये नाशे स्वरूपे मतिरिच्छाधिषणयोः । यां स्त्रियां यान मञ्जर्याश्शोभा लक्ष्म्योश्चेति सर्वत्र नानार्थ रत्नमाला ।

कविनामाङ्कताष्टदळ पद्म बन्धः



वामाहित्राण रागानघमहिमघनश्याम ते श्रीक्षमा वा

वामाक्ष श्री शुभं त्वत्सदवनवदसत्क्रुद्रथाङ्गादिरावा ।

वारादिङ्गाम्हि सुस्था मतिगतगतिमत्राकरोस्वङ्गमावा

वामाङ्गस्वन्नमस्ते ह मतउत महत्पालमात्राहि मा वा ॥ 76 ॥

वामे ति । अनघमहिम घनश्याम-स्पष्टं । ते वामा-रम्या श्रीः रमा । त्राणरागा हि-भक्तरक्षणमकामा खलु । हे वामाक्ष-रम्यनेत्र । क्षमा-क्षान्तिः । श्री-संपत् । शुभं-मङ्गळं । हरा-वाक् च । सदवनवत्-सरधुरक्षणशालि । असत् क्रुत्-असत् विषयक कोपञ्च । यद्रथाङ्गं - चक्रं, तत् यस्य - तस्मात् त्वत्र त्वत्र

Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

एव सिध्यतीति शेषः । स्वंगमावा-अत्र वा इत्युपमाने शेभन देह लक्ष्मीवत् इत्यर्थः । वामाङ्ग रम्यदेह । वाः - जलं आदिः यस्याः तां । गां-भूमिं अतिगतगतिं - गत्यन्तररहितत्वेन रसातलस्थां । सुस्थां - वराहावतारकाले सुप्रतिष्ठामकरोः । अतः मा-मां त्राहि रक्ष । उत-अथवा मा-मा त्रहीत्यर्थः । अथमत्राशयः यथा स्वशेष भूतां स्वपत्नी भूताञ्च भूमिं असुरेण रसातलनीतां आलोक्य निर्व्याजकृपया वराहरूपेणावतीर्य तदुद्धरणमकरोः । तत्वत् ममापि त्वत् शेषत्वेन त्वदीयत्वात् मद्रक्षणं तवैव भरः । अतः मम रक्षण अरक्षणे च मम विचारो नास्तीति ।

बाह्यदळाष्टके ''रामभद्रसुकमल'' इत्युद्धारः ।

बहिः कविनामाङ्कताष्टदळ पद्मस्यैव रेखा भेदः



विषयनामाङ्कितष्टदळ बन्धः



नन्दात्मजन् दयासारं गोपीभाग्यं परात्परं ।

सुराधीशं तमोदूरमेति हन्मेतिसुन्दरं ॥ 77 ॥

दळाग्रेषु नन्दगोपसुत मेति इति विषयनामोद्धारः ।

स्पष्टोर्थः (इण् - गतौ - मे हृत् एति अतिसुन्दरम्)

द्वादशदळ पद्म बन्धः

चतुरर चक्र बन्धे लिखितोयं श्लोकः



मा रमा तेन्दिरा नामऽमानाराध्यपदाऽसमा ।

मा सदा प्रणतं भीमाऽमाभीतं पातु मा रमा ॥ 78 ॥

षोडशदळ पद्म बन्धः



उमा क्षमादिमाद्यमा रमाताऽमान्यमाऽक्षमा ।

सोमार्यमा क्षमान्यामाऽसमाऽवमा रमा ॥ 79 ॥

उमेति । उमा क्षमादिमाद्यमा - उमा क्षमादिमानां पार्वती वसुन्धरा प्रभृति स्त्रीणां आद्या-मुखभूता । मारमाता - स्पष्टं । अमान्यमाऽक्षमा - अमानिषु - साधुषु या अमा-अज्ञानं तन्न क्षमत इति तदक्षमा । सोमार्यमा क्षमान्या - चन्द्रसूर्यलोचन भगवन् - नान्या। असमा, वामा-रम्या रमा-रमानामेत्यर्थः । मा-मा शब्दवाच्या त्वमिति शेषः । मा-मां अव-रक्ष ।

द्वादशदळ नळिन बन्धः



माद्यसऽसाममाऽमनमहिमा माधवीरमा ।

मारमाताऽसमा मास दयाऽभी माऽतुलोद्यमा ॥ 80 ॥

व्या-मा-अद्य-सा-असमसा-अतुल्य ज्ञानेत्यर्थः अमानमहिमा-अप्रमेय प्रभावेत्यर्थः । माधवी-रमा [illegible]रमाता-असमा-मा-मामित्यर्थः - सदया - अभीमा अतुलोद्यमा - अप्रतिहतोद्योगेति भावः । पात्विति शेषः ।

विलक्षणचतुर्दळ पद्म बन्धः

जानकीश नरदानवामर व्रात पूजित विनीतवत्सल ।

मामरासम गुणामलात्मभिर्ध्येय मत् भयहराय ते नमः ॥ 81 ॥

स्पष्टोर्थः

(मां अव ! असम ! गुणामलात्मभिः ध्येयः !

नर दानव अमरव्रात पूजित ! विनीतवत्सल !

मत्भयहराय ते नमः ॥ – PKS)



पञ्च दळ उत्पल बन्धः



सकलामर संसेव्यं जंगमस्थायिनां पतिं ।

राम प्रीतिं मम स्वान्त भज रंग पतिं भज ॥ 82 ॥

स्पष्टोर्थः

रामे प्रीतिं राम प्रीतिं भज हे मम स्वान्त । भज रंगपतिं ।

षोडश दळ कमल बन्धः

रमाऽसमा सुमाक्षमा रसा सदा सुरक्षणा ।

रजस्कृताग सामघं समस्तमत्र दारुणं ।

सुमाना सानिरस्यनः क्षमा शुभेक्षणावतु ॥ 83 ॥

व्या- रमा - असमा - सुमा - समीचीबज्ञाना - क्षमा - रसा- क्षान्ति गुण प्रिया - सदा सुरक्षणा - सर्वदा निर्व्याज रक्षणा - सुमानसा- अत एव समीचीन हृदया - क्षमा शुभेक्षणा क्षमया - शुभे - कारुण्यार्थे ईक्षणे यस्यास्या - रजस्कृतागसां - रजो रचिता पराधानां - नः - दारुणं - समस्तं अघं निरस्य अवतु ।



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

द्वात्रिंशत्दळ कमल बन्धः

उदग्रं सर्व वीरन्तं मन्युहाररतं विभुं ।
जिष्णुं ज्वलत्प्रभाभान्तं सर्वचेतोदमुन्नखं ॥ 84 ॥
नृशक्ति सिंहं रक्षोभीपोषणं भक्त भद्रदं ।
अमृत्युं मृत्युहं वन्दे सन्नतं मावकाम्यहं ॥ 85 ॥
अस्मिन् नृसिहं विषय श्लोक द्वये-
उग्रं वीरन्महाविष्णुं ज्वलन्तं सर्वतोमुखं ।
नृसिंहं भीषणं भद्रम्मृत्युमृत्युन्नमाम्यहं ॥
इति नृसिंह महामन्त्रोद्वारः तत्र तत्र द्रष्ट व्यः ।



(By PKS)

उद्रग्रं - महोन्नतं । मन्युहाररतं - भक्त शोकहरण प्रियं ज्वलत्प्रभयालसन्तं । सर्व चेतोदं-सर्वेषां योगिनां चेतोभिः गृहीतं योगिध्येयमित्यर्थः । उन्नखं-हिरण्य वक्षोविधारणाय ऊर्ध्व मुख नखं । मृत्युहं - भक्त मृत्युजाशकं । शिष्टं स्पष्टं अहं कामी-फलकामः । सन्नतं तदर्थं शरणागतं मां अव नृसिंहेति संबोधन पद मध्याहार्यं । हार्यं । तं क्लीबे पान वैराग्य कळत्रेष्ववलोकने । भेद्य लिंगस्त्वयं मूके ग्रहीते द्रावके शुचौ । इति नानार्थ रत्नमाला ।– PKS)



(By Poet)

Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

स्थल कमल बन्धः

वन्दे नतसुखातपालं कुलपतिं गुरुं ।
रणोत्कमत्तघं रामं नरपालं गुणोत्तमम् ॥ 86 ॥

वन्देति । स्पष्टोर्थः

[उत्कः - उत्कण्ठितः - स्यादुत्क उन्मनाः इत्यमरः उत्तघं - भक्षित अघं - नाशित अघं इत्यर्थः अस्मिन् श्लोके गूढचतर्थं अपि द्रष्टव्यं - तदपि बहिरष्टळेषु क्रमेण चतुर्थ पादोद्धारः मिलति । (स्थलकमलं - Rose Flower) PKS]



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

दशमं सङ्कीर्ण बन्ध प्रकरणम्

ऊर्ध्व पुण्ड्र बन्धः

पारावारसुता पायात् पापाकूपारपातिनम् ।
पालितानवमारामाऽमारामावनतालिपा ॥ 87 ॥

पारावारेति । पालितनवमा-अनवमाः - ज्ञानोत्कृष्टाः पालिताः यया सः ।

अमारा मृत्युरहिताः सर्वविकारेत्यर्थः । अवनतानां - प्रपन्नानां आलिं पङ्क्तिं पातीति तथोक्ता । रामा-भगवत इति शेषः । मा-लक्ष्मीः । शिष्टं स्पष्टम् । मा रोना मरणे कामे इति नानार्थ रत्नमाला ।

घण्टा बन्धः

देव तव स्तवरचनं मोदशद त्रिदशदुर्लभं राम ।
मम तव सरोजपादे देहि रतिं वरद खण्डितासत्य ॥ 88 ॥

देवेति । पूर्वार्धं खड्गबन्धे व्याख्यातं । सरोजपादे - पद्मतुल्य पदयुगळे मम रतिं देहि । मां त्वच्चरकमल-सक्त हृदयं कुरु । शिष्टं स्पष्टम् । (देव ! राम ! खण्डि असत्य ! मोद ! शद ! मुदं-सन्तोषं, शं-सुखं च ददातीति मोद शद ! तव स्तवरचनं त्रिदशदुर्लभं-ब्रह्म रुद्रादि देवैः अपि न शकयं - इति)





करक बन्धः

माता स्मरस्याखिलदेवधीरा नारायणोरस्थल वासकामा ।

माऽकारणामन्ददया धुतामावन्दारुमन्दार धुरन्धराव्यात् ॥

मातेति । अखिल देव धीरा-अखिलदेवापेक्षयापि धीरा-धैर्यशालिनी । अनेकजन्यानुभाव्य पापवतामपि मे रक्षणं कल्यातितिभावः । अकारणा अवतार रक्षणादिषु स्वकृपा व्यतिरिक्त कारणान्तर रहितेत्यर्थः । धुतामा (धुत आमा) विध्वस्ताश्रितविद्या । शिष्टं स्पष्टम् ।



This has been scored out by the Poet in the manuscript note book and sloka not numbered.

पुष्पहार बन्धः



पारावाराधिराट् भूस्सुरवरहर शक्रादिमादित्यदिक् -

पैर्ध्यांता पूतानतानां वरसुर धरणीरुट् दरोदर्यदण्डा ।

कामांबामारमा श्रीसखनखमुख संगाद रादभ्युदञ्चत् कोका -

स्तोकाञ्जिकारिस्तनघन विनताब्यादघादत्यदक्षम् ॥ 89 ॥

पारावारेति । नतानां सुखरधरणीरुट् अश्रित कलपवृक्षः । दरोदरी अल्पोदरी। अदण्डा-पतिरिव न दण्डधरा । क्रूर-पापानपि भक्तान् न शिक्षयतीति अर्थः । श्रीत्यादि-श्रीसखस्य भगवतः नख-मुख संगादरात् संभोग काले दिव्य पाणिनख क्षतात् अभ्युदञ्चत् तौ विवृत्तौ-कोकेन-चक्रवाकेन अस्तोकाञ्जिकारिणौ तत्तुल्यावित्यर्थः । तादृक्भां स्तनाभ्यां घना-सान्द्रा-अत एव विनता विशेषेण नम्रा । शिष्टं स्पष्टं । मा-लक्ष्मीः अत्यदक्षं - अत्यन्तं असममित्यर्थः । अकिञ्चनं अनन्यगतिं च मां - अघात् - पापात् अव्यात ।

Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

पुरुष बन्धः

पद्मनाभ भनाथास्य भगवन् रक्ष मानघ ।

घनमाक्षर भोयान कळभाशु शुभाळक ॥ 90 ॥

पद्मनाभेति । घनमा-सान्द्र मा-धीः यस्य तथा भूत, सर्वज्ञत्यर्थः ।

अक्षर-नित्य ! यानकळभ-गमन-विषये गजाभिन्न, गजगमनतुल्य गमनेति भावः । शुभाळक - भो भगवन् मा-मां आशु रक्ष । शिष्टं स्पष्टम् ।



नारी बन्धः

पद्मनाभ भनाथास्य भगवन् पाहि मानघ ।

घनमाहिश भोयान कळभाशु शुभाळक ॥ 91 ॥

पद्मनाभेति । घनमा-सर्वज्ञ !

अहौ शेत इत्यहिश- शेषशायिन् इत्यर्थः ।

शिष्टं स्पष्टम् ।





हंस बन्धः



तव हंसपते पक्षौ दक्षौ जलजमानस ।

पाण्डरराण्डपाजस्य वाह देवगणस्तुत ॥ 92 ॥

तवेति । हंस बन्ध श्लोकत्वात् चातुर्यात् तत् विषयक एवायं श्लोकः कृतः । जलजमानस-पद्मप्रिय ! देवगणस्तुत ! पाण्डर-शुभ्र शरीर ! अर-शीघ्रगामिन् ! अण्डपाजस्य अण्डातिपति चतुर्मुखस्य वाह-वाहनभूत हे हंसपते ! तव पक्षौ दक्षौ-गमन इत्यर्थः । अत एव अरेति साभिप्राय विशेषणं बोध्यम् । अरन्तु शीघ्रे चक्रकाङ्गे शीघ्रगामिनि तु त्रिष्विवि नानार्थ रत्नमाला ।

मयूर बन्धः



ददमोदम मन्दंमे नमे जलजलोचन ।

शरणं घोरशमन प्राचाममदमो दद ॥ 93 ॥

ददेति । हे जलज लोचन ! पुण्डरीकाक्ष ! घोराशमन ! क्रूर राक्षसादि नाशक ! प्राचां - तव भक्तानामिति शेषः । अमदमो दद मदाभावं मोदञ्च ददातीति तथोक्तं । मे-मम न शरणं त्वां विना रक्षकान्तरन्नास्ति । अतः अमन्दं मोदं दद-मह्यं मोक्षं देहीत्यर्थः ।

मुरज बन्धः

असुरादिपराक्षयश्री सुराद्याजराक्षय ।

यक्षराजपरामर्ष रक्ष रादिपराम मां ॥ 94 ॥

असुरेति । असुरादीनां पा-शत्रो । अक्षयश्री-नित्या-श्रीः सा हि श्रीरम्यता सतां इत्युक्त ज्ञानं येषां तेषां - सुराणां नित्यसूरिणामित्यर्थः । आद्या-अजर अक्षय-जराक्षय रहित । जर, क्षय शब्दस्सर्वविकारोपलक्षणार्थः । यक्षराजपरामर्ष - यक्षराजस्य - कुबेरस्य परः - शत्रुः रावणः तस्मिन् अमर्षः यस्य (सः) रादिपं - रादिभ्यो भयादिभ्यः पातीति तथोक्तं । एवं भूत राम मां रक्ष । रं क्लीबे रुधिरे ध्यानव्योमाण्ड कुक्षिषु मूर्ध्नि । वक्त्रे भये तु इति नानार्थ रत्नमाला । आश्रित भयनाशकः इत्यर्थः ।

अ	सु	रा	दि	प	रा	क्ष	य
श्री	सु	रा	द्या	ज	रा	क्ष	य
य	क्ष	रा	ज	प	रा	म	र्ष
र	क्ष	रा	दि	प	रा	म	मां

Regular Way



Second Way







Third Way

अङ्गद बन्धः



तंनुरासपमेडेहं

हंडेमेऽपसरानुतं ।

तं रमापयमार्यासा

सार्यामायपमारतं ॥ ॥

शार्ङ्ग बन्धे लिखितोऽयं श्लोक :

(Sloka 6)

गुच्छ बन्धः



धीर धीर सुरस्तुत्य नित्य सत्य नयप्रिय--।

भयनाशन शक्रेश दय श्रेय: प्रयेश्च मे-॥ 95 ॥

स्पष्टोर्थः



कण्ठाभरण बन्धः



तं श्री देव भव प्रजापति पतिं सोमार्यमाक्षं पर-

क्रूरं धीरवरं वरांबरधरं गोवर्धनोद्धारणम् ।

वन्देहं वसुदेव नन्द वदनानन्द प्रदं क्षमापतिं

नीतिक्षेमदमादरं घनघन श्री पात्र गात्रं हितम् ॥ 96 ॥

तमिति । धनेत्यादि-घनाः - जलसान्द्राः ये घनाः मेघाः तेषां श्रियः शोभायाः पात्रं-भाजनं गात्रं यस्य तं काळमेघ सदृश दिव्य विग्रहमित्यर्थः । हितं - सर्वेषां पितृत्वात् पथ्य भूतं भगवन्तं अहं भजे ।



मत्स्य बन्धः



क्षीराब्धितनयानर्ध न्यूत्नरत्नचया रमा ।।

मारमातऽसमा सर्वनुता धृता शुभावतात् ॥ 97 ॥

श्रीरेति । अनर्घः न्यूत्नानां रत्नानां चयः यस्यास्सा । शिष्टं स्पष्टं ॥

वृश्चिक बन्धः



तेपमार सरोजाक्ष घनसार रसानघ ।

घनामोद दमोनाघहमीडेंघ्रिं रमापते ॥ 98 ॥

तेपमारेति । अपमार-अमृत्यो । घनसाररस-घनसारस्य कर्पूरस्य रुचिरिव रुचिः यस्य आयोगिभोग्यगुण इत्यर्थः । घनामोदद नित्यानन्दद । अनघ । हे सरोजाक्ष । रमापते । मोनाघहं - मया-ज्ञानेन ऊनानां-हीनानां अज्ञानमित्यर्थः अघं - पापं हन्तीति मोनाघहं ते अंघ्रिं इडे । मा रोना मरणे कामे श्रृंगार मुख्य मधुरादि सुरसोनिर्यास राग शरल * * पारदेषु । आस्वादन ध्वनि सुधाम्बु इति नानार्थरत्नमाला ।



गोपुर बन्धः



श्रीदेव्या सह यं ह्यदार पुरुषं नारीद्वयं सेवते
गोरिक्य प्रमदं सु सम्ज्ञयमुनिभिः स्नेहप्रकर्षस्तुतं ।
संसद्रञ्जनमानसं सुरनदी स्यान्दांघ्रिपाथोरुहं
दीप्यच्छशोभमहो ममाद्य विरसा ताञ्चाप वागस्थिरा ॥ 99 ॥

श्रीति । यं पुरुषं श्रीदेव्या सह नारीद्वयं - भूनीळा - रूप महिषीद्वयं सेवते । स कथं ब्रूत इत्यत्राह - उदार पुरुषं गोरिक्थ प्रमदं-गोधने आनन्दो यस्य तं-गोपालमित्यर्थः । संसदः नित्यसूरिपरिषदः रञ्ने तत् तत् कैंकर्य प्रदानेन प्रीतिजनने मानसं यस्य तं । सुरनदीस्यन्दः अंघ्रिपाथोरुहात् यस्य तं - गंगा प्रवाहनिदान पदकमलं इत्यर्थः । सुसंज्ञेत्यादि - समीचीनज्ञान सनकादी मुनिस्तं इत्यर्थः । दीप्यछशोभं स्पष्टं । एवं भूतं तं तथाविधं भगवन्तमपि अद्य विरसा-निस्सारा अस्थिरा ममवाक् आप स्तोतुमिति शेषः । ब्रह्मादिभिः स्तोतुं अशक्यस्य तस्य स्तोत्रे निर्लज्जः कथं प्रवृत्तोऽहमिति भावः । पार्श्वद्वय कोष्टेषु ''रामभद्र सम्श्राय सद्धरीय पञ्चास्य दीप्रहरिगोपुर'' इत्युद्धारो द्रष्टव्यः ।

(द्रव्यं वित्तं स्वापथेयं रिक्थमृक्थं धनं वसु ।

मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः । इति अमरः)



बृन्दावन बन्धः



उद्वृत्तकन्नैच्यनिधिं कोपिनं त्वेनसांबिलम् ।

नेच्छन्राघवसाघस्त्वत्पदं लिप्सेऽवमागतिम् ॥ 100 ॥

उद्वृत्तकमिति । उद्वृत्तकं - रजस्तमः प्रचुरत्वेन सदाचाररहितं । नैच्यनिधिं - संसारित्वेन नीचत्वाश्रयं । कोपिनं - स्पष्टं । एनसांबिलं - प्रकृतिवश्यत्वेन अनादिपापवासनात् दूषितहृदयं त्वदन्यमिति शेषः । न इच्छन्-चतुर्मुखादेरपि प्रकृतिवश्यत्वेन मत्समान योगक्षेमत्वात् तत् प्राप्तौ प्रयोजनाभावात् तथा तथाविधे त्वत् व्यतिरिक्त पुरुषे मम इच्छा नास्तीति भावः । साघः अनेकपापवान् अहं - हे राघव ! अगतिं मां अव-शरणागतं मां मोक्षप्रदानेन रक्ष इति भावः । मद्यकोष्टेषु " उन्नैनंबिनेन्राघव" (इति द्रविडभाषा वाक्यं - यस्यार्थः च त्वां एव विश्वसिमि राघव इति भवति) इत्युद्धारः ।

अर्धभ्रमक बन्धः

असुराधिकरानन्त सुराधिपनतावन ।

राधिकापावेशतारांधिप पाब्दि भवेन क ॥ 101 ॥

असुरेति । असुराधिकर - असुरोपद्रव कर । अनन्त । सुराधिप । नतान् अवतीति तथोक्तं । राधा एव-राधिका तां पातीति तथोक्तं । इश सर्वेश्वर । ताराधिपवत् पा-प्रसन्ना या अब्धिभवा - लक्ष्मीः तस्याः इनः - प्रभो । क-विष्णो अव-रक्ष । पास्त्रिष्वार्ते प्रसन्नेच । को ब्रह्मात्मानिलार्काग्नि विष्णुधी यम केकिषु इति नानार्थ रत्नमाला ।

अ	सु	रा	धि	क	रा	न	न्त
सु	रा	धि	प	न	ता	व	न
रा	धि	का	पा	वे	श	ता	रा
धि	प	पा	ब्दि	भ	वे	न	क

1 ↓	3 ↓	5 ↓	7 ↓	2 →			
				4 →			
				6 →			
				8 →			



सर्वतो भद्र बन्धः

शपा रमा मारपाश - पानताजजतानपा ।

रताजराराजतार - माजराननराजमा ॥ 102 ॥

श	पा	र	मा	मा	र	पा	श
पा	न	ता	ज	ज	ता	न	पा
र	ता	ज	रा	रा	ज	ता	र
मा	ज	रा	न	न	रा	ज	मा

मा	ज	रा	न	न	रा	ज	मा
र	ता	ज	रा	रा	ज	ता	र
पा	न	ता	ज	ज	ता	न	पा
श	पा	र	मा	मा	र	पा	श

शपेति । शपा-शे-श्रेयसि विषये पा-प्रसन्ना । मारपाशपानताजजतानपा - मारपाशेन पाः - आर्ताः ये आनताः भक्ताः तेषां ये अजजता - मन्मथजेतृत्वं नः - ज्ञानं मन्मथजयहेतु भूत विवेकं चेतित्यर्थः तौ पातीति तथोक्ता । यद्वा तयोर्विषये पाः - प्रसन्ना तेषां मन्मथजयः तत् हेतु भूतविवेकश्च भूयादित्यनुग्रहं करोतीति भावः । रताजरा - रतः प्रीतः, अजरः भगवान् यस्यामिति तयोक्ता । अरमा-रः क्षयः, मः-बन्धनञ्च न विद्यते यस्याः सा - सर्वविकाररहिता अप्रतिहत शक्तिश्चेत्यर्थः । अजराननराजमा - अजरः - विष्णुः तस्य



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath



आननमेव राजा-चन्द्रः तस्मिन् मा-धीः यस्याः सा रमा लक्ष्मीः अराजत-विष्णुवक्षसि इति शेषः । अथ शं क्लीबे शास्त्रे श्रेयसि मंगळे । मः पुंसि बञ्जने । मा स्त्री माने मृतो वेला मेधा श्री मध्यमातृषु । पस्त्रिष्वार्ते प्रसन्नेच । अजश्शंभौ विष्णुधात्रोः कामे । जो जपे विजये मेरौ शब्दे जेतरि मत्सरे । नाभौ नं ज्ञानवाद्ययोः । रः पुमान् पावके कामे क्षये । इति सर्वत्र नानार्थ रत्नमाला ।

This sloka can be read from left to right and right to left, as also from top to bottom and bottom to top.

चतुरङ्गे तुरग बन्धः

तरसाऽता दयाराऽख रामामोद्य दरापहा ।

क्षणमा भाक्षिहाऽलेपा रक्षतु प्राज्ञ्यति प्रति ॥ 103 ॥

अयं चतुरङ्ग बन्धे पङ्क्तितिशोलेख्य श्लोकः । तुरगपदोधृत श्लोकस्तु ''तमोदपतिहा प्राण सादरा पातिभाऽक्षरा । मारमाता क्षिप्रहाया लेखराज्ञ्यद्य रक्षतु'' ।

त 1	र 30	सा 9	ता 20	द 3	या 24	रा 11	ख 26
रा 16	मा 19	मो 2	द्य 29	द 10	रा 27	प 4	हा 23
क्ष 31	ण 8	मा 17	भा 14	क्षि 21	हा 6	ले 25	पा 12
र 18	क्ष 15	तु 32	प्रा 7	ज्ञ्य 28	ति 13	प्र 22	ति 5

पूर्वं द्वात्रिंशत् कोष्टक्रमेण लिखितः । चतुरङ्गरीत्या चतुष्षष्टि कोष्टक्रमेण लेखने तुरगपदक्रमेण श्लोकोद्धारे द्वात्रिंशत् कोष्ठाः पर्याप्ताः । शेषाणां किञ्चित् छिन्नं निवेश्य दर्शने तेपि तुरगपदो धृता भवन्ति । पूर्वार्धः पूर्वभागे उक्तं । * * * * * * तरभागे पठनियुयं । तरसेति । चतुरङ्ग बन्धे पङ्क्तशो लेख्य प्रथम श्लोकार्थः अता-कोपशून्या । दयारा-रा आदाने, दयवतीत्यर्थः अखरो-अतीक्ष्णा । अमोद्यदुरापहा-अमया-अविद्यया उद्यन् यं अरः - यानाभावः तमपहन्तीति तथा भूता । क्षणमा-उत्सवप्रिया । क्षणे-उत्सवे मा-धीः यस्याः । भाक्षिहा-भयादीप्त्या सर्वेषामक्षिणी हन्तीति तथोक्ता । अलेपा-गर्वशून्या । प्राज्ञी-सर्वज्ञा मा-लक्ष्मीः । तरसा-शीघ्रं । अति अत्यन्तं, प्रति-मुहुर्मुहुः रक्षतु । अत्यन्तं रक्षणं नाम सर्वविषय रक्षणं ।

तुरगपदोधृत श्लोकार्थस्तु (एवम्) तमोदपतीति । तमोदपतिहा - तमोदाः शोकप्रदाः ये असुरादयः तेषां पतीन् - श्रेष्ठान् हन्तीति तथोक्ता । प्राणसादरा प्राणेषु आत्मसु आदरवती । पा-प्रसन्ना अतिभा-निरतिशय तेजस्विनी । अक्षरा-नित्या । क्षिप्रहाया-क्षिप्रं शीघ्रं हे-हरौ, अयः शुभावहविधिः यस्यास्सा । लेखराज्ञी-देव चक्रवर्ती । महिषी। भगवतो देवराजत्वात् तत्पत्न्याः देवराज्ञीत्वं । एवं भूता मारमाता-लक्ष्मीः अद्य रक्षतु । तमो



त 1	(1) र	सा 9	(13) ता	द 3	(3) या	रा 11	(7) ख
रा 16	(12) मा	मो 2	(2) द्य	द 10	(6) रा	प 4	(4) हा
(16) क्ष	ण 8	(10) मा	भा 14	(14) क्षि	हा 6	(8) ले	पा 12
(11) र	क्ष 15	(15) तु	प्रा 7	(9) ज्ञ्य	ति 13	(5) प्र	ति 5
(17) त	र 30	(29) सा	ता 20	(19) द	या 24	(23) रा	ख 26
(32) रा	मा 17	(18) मो	द्य 29	(26) द	रा 27	(20) प	हा 23
क्ष 31	(28) ण	मा 19	(30) भा	क्षि 21	(22) हा	ले 25	(24) पा
र 18	(31) क्ष	तु 32	(27) प्रा	ज्ञ्य 28	(25) ति	प्र 22	(21) ति

राहौ गुणे ध्वान्ते शोके । देहान्तरानिले प्राणे जीवा पर माति नोः । पस्त्रिष्वार्ते प्रसन्नेच । भश्शंकरे हरौ मूर्ध्नि । अयश्शुभावहो विधिः । त शब्दः पुंसि संभोगे विश्चये गोपपुच्छयोः । मास्त्री मानेमृतौ वेला मेधा श्री । रं क्लीबे रुधिरे मूर्ध्नि ध्यान व्योम । लेपो भाजन गर्वयोः । अति स्यादधिकार्योक्तौ प्रशंसायामतिक्रमे । प्रति - प्रतिनिधौ इत्तं भूतार्थानाभि मुखयोः । वीप्सायां लक्षणे भागे । इति सर्वत्र नानार्थ रत्नमाला ।

1 to 32 तमोदपतिहा प्राण सादरा पाति भाक्षरा ।
मारमाता क्षिप्रहाया लेखराज्ञ्यद्य रक्षतु ॥

(1) to (32) रद्ययाहाप्रराखलेज्ञ्य मारमाताक्षितुक्ष ।
तमोदपति हारापातिद प्राणसाभाक्षरा ॥

Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

हल बन्धः

वासवानलपाशाद्याद्याशा पालनतस्तुत ।

तवाच्युत पदं वन्दे यजतां ममतां जय ॥ 104 ॥

वासवेति । वासवः अनिलः । पाशः आद्यः - मुख्यः यस्य सः पाशाद्यः वरुण इत्यर्थः । ततश्च इन्द्राग्नि वरुण प्रमुख दिक्पालैः नतस्तुत इत्यर्थः । यजतां त्वदाराधकानां ममतां -अहंकार ममकारादिकं, जय-नाशाय । एवं च त्वदाराधकस्य मम अहंकारादिकं च नाशयेति भावः ।



हलबन्धस्यैव कोष्ट क्रमभेदः



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

विणा बन्धः

पारावारक्षितिपतिभवा भव्य दिव्यस्वरा-स्वर्वामोर्वादि स्तुतपद पयोजातयुग्माखिलेड्या ।
राकाचन्द्र प्रतिमवदना स्मेर पाथोजहस्ता शक्ता शस्ता हरिपदयुगन्यस्त चित्ता रमाव्यात् ॥ 105 ॥

पारावारेति । स्पष्टोर्थः ।



निश्रेणिका बन्धः

वन्दे दशास्यान्तकमंगदस्व -
श्रीराघवत्वादरमाशरघ्न ।
देवेन्दिरावन्दित शान्तचित्त
दमादरामन्द दयारयाद ॥ 106 ॥

वन्देति । अङ्गदस्व - अङ्गदस्य आत्मीय भगवतो भक्त-पराधीनत्वात्-अङ्गदस्य च तत् भक्तवरत्वात् तत् पराधीन इत्यर्थः । लक्ष्मण भरतादिष्वाङ्गदेपि स्वामिनो भ्रातृवात्सल्य इति भावः । अर-नाशरहित । याद-शोभाप्रद । अदरं - भयरहितं । यद्वा न विद्यते दरो यस्मात् आश्रितानामिति वा अदरः तं । अथवा वन्दे इति क्रिया विशेषणं । शिष्टं स्पष्टम् । रः पुमान् पावके कामे क्षये शोभालके इति नानार्थ रत्नमाला ।



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

तुला बन्धः

सारस्फुरत्स्फारगुण त्रिधामन् राधापते दानवदावदाव ।

मोदप्रद श्रीदयितारिकाल राकास्य मां धीरवदावदाव ॥ 107 ॥

सारेति । साराः-श्रेष्ठाः स्फरन्तः स्फाराः अधिकाश्च गुणा यस्य तथा भूतं । त्रीणि धामानि यस्य-तथोक्तम् । अंभस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे इत्युक्त वेंकटाचल क्षीराब्धि परमपद स्थानत्रय रसिकेत्यर्थः । दानवा एव दावाः वनानि तेषां दाव-वनाग्नि भूत । धीर-धृष्ट-अत एव वदावद-सभायं सर्व मनोरञ्जकत्वेन न्यायादि व्यवहतेत्यर्थः । यद्वा धीरवदावदेत्येकं पदं । धीरेषु वदावद-अति श्रेष्ठेत्यर्थः । शिष्टं स्पष्टं । वदोवदावदो वक्ता वागीशो वाक्पतिः समौ इत्यमरः । दवदावौ वनारण्यौ वह्नी इत्यमरः ।





नव वर्षक जंबू द्वीप बन्धः

कंस प्रभङ्ग प्रद माधवाव कंजस्फुरद्वक्त्र वसादरुक्ष ।

क्षपेश वक्त्र प्रभधर्म भाव वरप्रद प्रस्पुरदंबुजाक्ष ॥ 108 ॥

व्या-वसां अदन्तीति-वसादाः -राक्षसाः तेषां रुक्ष भयंकरेति भावः । कञ्जेत्यादिना पद्मतुल्यत्वं । क्षपेशेत्यादिवा चन्द्र तुल्यत्वं मुखस्योक्तं । उभय सांयासंभवात् । धर्म भाव-धर्मेषु आचार मूलेषु सत्कर्मसुभावः यस्य । आचार प्रभवो धर्मो धर्मस्य प्ररुरच्युत इति वाक्यमत्रानु-सन्धेयं ।

(रक्षस्त्वप्रेम्ण्यचिक्कणे इत्यमरः PKS)



Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

दीपस्तंभ बन्धः

देवदेव ममादम्भ दयादरदराहर ।

हतारातेहरेविष्णो हरादरदमामव ॥ 109 ॥

देवेति । अदंभदय - निर्व्याजकृप । अदरद-आश्रितानां अभयप्रद । राहर-रः-अग्निः अः ब्रह्मा हःरुद्रः एते रे - कुक्षौ यस्य तथा भूतः सर्वभूतोपलक्षणं उक्त देवतात्रयमिति बोध्यं । सर्व चराचरकारण भूतेति भावः । हरादरद-रुद्रत रुद्रेत्यर्थः । मम देवदेवेति अन्वयः । शिष्टं स्पष्टं । रः पुमान् पावके कामे रं क्लीबे रुधिरे मूर्ध्नि याने व्योमाण्ड कुक्षिषु । हश्शंकरेहरौ । अकारो ब्रह्मविष्णूवीश । इति नानार्थ रत्नमाला ।



वृक्ष बन्धः

रचिता सदमोदासा दामोदरमता सदा ।

सतामधिकदा पद्मा पदाकमलभाऽसहा ।

सभालसदिरामाव्यात् मारादिजननी शुभा ॥ 110 ॥

रचितेति । अमोदः - दुःखं । असतां अमोदः रचितः यया सा । पदेत्यादि-कमलादायधिक श्रीक पदेति अर्थः । समायां परिषदि लसन्ती इरा-वाक् यस्यास्सा । तद्विषयक बागेव सर्व सभास्वपि प्रकाशत इति भावः । शिष्टं स्पष्टम् ।



घटिका यन्त्र बन्धः

सकल सुरवर श्रीवन्द्य वन्दारु चारुस्थिरतर फलदालस्यन्दमेदं रमेश ।

सरुडसुरविनाशे साश राम क्षमध्वं मम महदघदण्डं रक्ष रक्ष प्रजेश ॥ 111 ॥

सकलेति । सकलसुरवरैः श्रिया च वन्द्य । वन्दारुस्येर्थः सेवेकेभ्यः चारूणि आनन्दप्रदत्वेन रम्याणि-स्थिरतराणि शाश्वतानि च फलानि ददातीति - वन्दारुचारुस्थितर - फलद । सुविना शेसाश-सकोपासुर विनाशाभिलाषेत्यर्थः । रमेश - श्रियः पते । अत एव प्रजेश-सर्वेश्वर राम मम आलस्यं - जाडयं दम-नाशय । मदज्ञानं निवर्तय इत्यर्थः । ममहत् अघदण्डं दण्डवत् अनुवर्तमानं अघं क्षमध्वं । रक्ष रक्ष । अविद्यापापरूपा - निष्टानिवृत्तिं कृत्वा इष्टाञ्च दद ।



॥ बन्धं १०० सम्पूर्णम् ॥

प्राचीन लक्ष्यात् प्रायेण युक्त्या चोहेन दुष्कराः ।

बन्धा बहुविधाश्चित्रा रसिकानन्ददाः कृताः ॥

पञ्च श्रीश सदायुधान्यथ रक्षाङ्गानां क्रमास्सप्तवै

चत्वारो मनवः भोगोपकरणान्येकदशोक्तान्यथ ।

सेनाङ्गानि षडायुधानि दश तत् गोमूत्रिका सप्तकं

सर्पास्सप्त सटा सरोजगणना सङ्कीर्ण संख्या तरिः ॥

इत्थं चित्रमये काव्ये शत बन्ध परिष्कृतः ।

द्वितिय्योऽपि परिच्छेदः समाप्तिमगमत् क्रमात् ॥

इति श्रीरामभद्रविरचिते चित्रकाव्ये द्वितिय्य परिच्छेदः समाप्तः ।

इतिश्रीशैलकुलतिलकेन श्रीनिवासयतीन्द्र महादेशिक कटाक्ष लब्ध

सत्ताकेन श्रीरामभद्र बुधवरेण विरचितं चित्रकाव्यं समाप्तम् ।

(सम्पादकस्य टिप्पणि । पञ्चेति-अत्र कविः स्वविरचित शत बन्धानां पृथक् रूपेण संख्या विवरणं करोति) ।

तच्च एवं	-	नारायणस्य पञ्चायुधबन्धाः	-	५
		चक्रबन्धाः	-	७
		मन्त्र बन्धाः	-	४
		भोगोपकरण बन्धाः	-	११
कटपयादि सूत्रानुसारेण		सेनाङ्ग बन्धाः	-	६
सटा - १७		आयुध बन्धा :	-	१०
तरिः - २६		गोमूत्रिका बन्धा :	-	७
		सर्प बन्धाः	-	७
		पद्म बन्धाः	-	१७
		सङ्कीर्ण बन्धाः	-	२६
		अहत्य बन्धाः	-	१००

इति बोध्यम् ।